ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/451/છ, તા.03/07/2019-થી મંજૂર

# अनिवार्यसंस्कृतम् (काव्यम्)

## प्रथमा १

## (ધોરણ 9)

**प्रतिज्ञापत्रम्**

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि ।
प्रत्येकेन सह शिष्टव्यवहारं च करिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां च कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

**मूल्यम् : ₹ 32.00**

तमसो मा ज्योतिर्गमय

**गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्**
**'विद्यायनम्', सेक्टर 10-ए, गान्धीनगरम्-382 010**

© गुजरात राज्य शाला पाठ्यपुस्तक मण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यशालापाठ्यपुस्तकमण्डलाधीनाः सन्ति।
अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रूपेण गुजरातराज्य-शालापाठ्यपुस्तकमण्डलिनयामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषय-मार्गदर्शनम्**

हेमेन्द्रकुमारः दवे

**लेखनम्**

श्री हिंमत दवे

डॉ. अर्चना दुबे

श्री परागः जोषी

श्री पुरुषोत्तमः रावलः

श्री नयनः वालांगरः

श्री राहुलः जोषी

**समीक्षणम्**

श्री महेन्द्रकुमारः दवे

डॉ. रामकिशोरः त्रिपाठी

श्री जितेशः आरम्भडिया

श्री उषाबा गोहिलः

**भाषाशुद्धिः**

श्री सतीषः गज्जरः

**संयोजनम्**

डॉ. क्रिष्णा दवे

(विषय-संयोजकः - अंग्रेजी)

**निर्माणायोजनम्**

श्री हरेन शाह

(उपनियामकः - शैक्षणिकः)

**मुद्रणसंयोजनम्**

श्री हरेश एस. लीम्बाचीया

(उपनियामकः- उत्पादनम् )

## प्रस्तावना

प्राच्यगुरुकुल-परम्परानुसारम् अभ्यासं कुर्वतः संस्कृतपाठशालीय-विद्यार्थिनः लक्षीकृतयप्राचीनार्वाचीनो-भयपद्धत्यो सरस-सरलसमन्वयपूर्वकं गुजरातराज्यमाध्यमिकोच्चतरमाध्यमिकशिक्षणबोर्डद्वारा अभ्यासक्रमसंरचना जाताऽस्ति, एते अभ्यासक्रमाः गुजरातसर्वकारद्वारा मानिताः प्रमाणीकृताश्च सन्ति।

गुजरातसर्वकारप्रमाणितस्य **अनिवार्यसंस्कृतम् (काव्यम्) प्रथमा १ (धो२ण 9)** इति विषयस्य संवर्द्धिताभ्यासक्रमानुसारं सज्जीभूतस्य पाठ्यपुस्तकस्य संवर्द्धितामावृत्तिं विद्यार्थिसमक्षं प्रस्तुवन्मण्डलमे आनन्दमनुभवति। अस्याः पाठ्यपुस्तकसंवर्द्धितावृत्तेः प्रकाशनात्प्राक् हस्तलिपीनां शिक्षणकार्यं कुर्वद्भिः शिक्षकैः तज्ज्ञैश्च सर्वाङ्गिसमीक्षणं कृतमस्ति। शिक्षकतज्ज्ञानानां सूचनानुसारं हस्तलिपिषु योग्यां शुद्धिं कृत्वा पाठ्यपुस्तकमिदं प्राकाश्यं नीतमस्ति।

प्रस्तुतं पाठ्यपुस्तकं सरसम् उपयोगि क्षतिरहितं कर्तुं मण्डलं सश्रद्धं प्रायतत। तथापि शिक्षणरसिकेभ्यः पाठ्यपुस्तकस्य गुणवत्तावहाः सूचनाः स्वीकार्याः सन्ति।

**पी. भारती** (IAS)
नियामकः कार्यवाहकःप्रमुखः
ता.06-07-2019 गान्धीनगरम्

**प्रथमावृत्ति : 2019**

**प्रकाशक** : गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामकः

**मुद्रक** :

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

(क) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

(ख) स्वातन्त्र्याय अम्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

(घ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

(ज) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

* भारतीयं संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका

## पद्यम्


| | | |
|---|---|---|
| 1. | ऋग्वन्दना | 1 |
| 2. | 'कन्या-पितृत्वं खलु भागधेयम्' | 4 |
| 3. | उमाबटुसंवाद: | 7 |
| 4. | बुद्धस्य विहार: | 13 |
| 5. | गीतोपदेश:-2 | 18 |
| 6. | बालसुभाषितानि | 22 |
| 7. | प्रहेलिका | 25 |
| 8. | वृत्तपरिचय: | 29 |


## गद्यम्


| | | |
|---|---|---|
| 9. | एकलव्यस्य गुरुभक्ति: | 33 |
| 10. | मृच्छकटिकम् | 37 |
| 11. | भारतं पञ्चमो वेद: | 40 |
| 12. | दिलीप-सिंहसंवाद: | 44 |
| 13. | समवायो हि दुर्जय: | 48 |
| 14. | पुराणपरिचय: | 52 |
| 15. | रामायणम् | 56 |
| 16. | कर्णस्य औदार्यम् | 59 |
| 17. | भारतभरतशाकुन्तल: | 62 |
| 18. | ''ग्रन्थस्य मनोदशा'' | 66 |
| 19. | शरीरमाद्यं खलु धर्मसाधनम् | 69 |
| 20. | पर्यावरणम् | 73 |
| 21. | संहति: कार्यसाधिका | 77 |
| 22. | यत्र स्वच्छता तत्र प्रभुता | 83 |
| 23. | यद्भविष्यो विनश्यति | 87 |
| 24. | संस्कृतभाषाया: महत्त्वम् | 91 |
| 25. | शास्त्रपरिचय:-1 | 94 |
| 26. | शास्त्रपरिचय:-2 | 97 |

पद्यम्

1

# ऋग्वन्दना

**प्रस्तावना**

विश्ववाङ्मये प्राचीनतमो ग्रन्थः ऋग्वेदः वर्तते। ऋच्यते स्तूयते यया सा ऋक्, तासां ऋचां समूहः यत्र वर्तते तादृशः वेदः ऋग्वेदः इति प्रसिद्धम्। अयं वेदः मण्डलक्रमेण-अष्टकक्रमेण च द्विधा वर्तते। तत्र अष्टकक्रमः सरलतया कण्ठस्थीकरणाय आसीत्। मण्डलक्रमे 10 मण्डलानि सन्ति। तत्र 1017 सूक्तानि, 10,552 ऋचः सन्ति। इदानीं ऋग्वेदस्य शाकल-बाष्कल-आश्वलायनशाङ्खायनमाण्डुकायनाः इति पञ्चशाखाः समुपलब्धाः सन्ति। तथा च प्रमुखतमासु दशोपनिषत्सु ऐतरीयोपनिषद् इति ऋग्वेदेन सह सम्बद्धो वर्तते।

ऋग्वेदस्य प्रमुखो विषयः देवतानां स्तुतिः वर्तते। तत्र प्राकृतिकदेवताः सन्ति। तथा च दार्शनिकसंवादादीनि सूक्तान्यपि सन्ति।

अत्र ऋग्वेदात् पञ्चानाम् ऋचां चयनं कृतमस्ति। तत्र अग्निदेवता-सरस्वतीदेवता इत्यादीनां स्तुतिः वर्तते। अन्याः सांधिकभावनायाः समुद्घोषकारिण्यः सन्ति।

---

1. **अग्निमीं॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म्। होता॑रं रत्न॒धात॑मम्॥**

**पदपाठः** - अग्निम्। ईडे। पुरोहितम्। यज्ञस्य। देवम्। ऋत्विजम्। होतारम् रत्नधातमम्।

**भावार्थः** - अहं यज्ञस्य देवम् (अग्निम्) यज्ञस्य ऋत्विजम् (देवानां यज्ञकार्येषु होतृनाम् ऋत्विजम् अग्निरेव।) यज्ञस्य पुरोहितम् (यथा पुरोहितः राज्ञः अभीष्टं सम्पादयति तथैव यज्ञस्याभीष्टं सम्पादयन्यग्निरिति इति), यज्ञस्य होतारम् (अग्निर्वै देवानां होता) रत्नधातमम् (यागफलरूपाणां) रत्नानां धारयितारम् (अग्निम्) ईडे (स्तौमि) वाजेभिः = अन्नप्रदानेन धान्यपूरयित्रीत्वेन वा।

2. **पा॒व॒का न॒ः सर॑स्वती वाजे॑भिर्वा॒जिनी॑वती। य॒ज्ञं व॑ष्टु धि॒याव॑सुः।**

**पदपाठः** - पावका। नः। सरस्वती। वाजेभिः। वाजिनीवती। यज्ञम्। वष्टु। धियावसुः।

**भावार्थः** - पवित्रतां कारयित्री, अन्नैः यज्ञक्रियाधिष्ठात्री (वाजा अन्नानि विद्यन्ते यस्यां सा वाजिनी यज्ञक्रिया। वाजिनी विद्यते यस्याः सा वाजिनीवती यज्ञक्रियाधिष्ठात्री), सरस्वती (ज्ञानसम्पन्ना वाणी) धियावसुः (शुद्धकर्मभिःसहवासिनि) यज्ञम् (क्रियारुपं यज्ञम्) भवतु वष्टु (प्रकाशदायिनीभवतु)

3. **सं ग॑च्छध्वं॒ सं व॑दध्वं॒ सं वो॒ मनां॑सि जानताम्।**
**दे॒वा भा॒गं यथा॒ पूर्वे॑ सं जा॒ना॒ना उ॒पास॑ते॥**

**पदपाठः** - संगच्छध्वम्। संवदध्वम्। सं वः। मनांसि। जानताम्। देवाः। भागम्। यथा पूर्वे। सं जानाना। उपासते।

**भावार्थः** - युष्माकं गमनं समानं भवेत, परस्परं वचनं च समानं भवेत्। परस्परं मनांसि (विचाराः) ज्ञायन्त। यथा पूर्वे देवाः यज्ञान्नं समानं स्वीकृतवन्तः तथैव सम्मील्य भागं स्वीकुरुत।

4. **स॒मा॒नो मन्त्र॒ः समि॑तिः स॒मा॒नी स॑मा॒नं मनः॑ स॒हचित्त॑मेषाम्।**
**स॒मा॒नं मन्त्र॑म॒भि मन्त्रये वः सभानेन वो ह॒विषा जुहोमि॥**

**पदपाठः** - समानः। मन्त्रः। समितिः। समानी। समानम्। मनः। सहचित्तम्। एषाम्। समानम्। मन्त्रम्। अभिमन्त्रये। वः। समानेन। वः। हविषा। जुहोमि।

**भावार्थः** - एषां सर्वेषां मन्त्रः (विचारः) समानः भवेत्। समाना सभा भवेत्, सर्वेषां मनांसि समानानि स्युः। सर्वेषामन्तःकरणं सांधिकं स्यात्। वयं समानं विचारं कुर्मः। वयं समानेन यज्ञान्नेन हवनं कुर्मः।

**5. समानी व आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति॥**

**पदपाठः** - समानी। वः। आकूतिः। समानाः। हृदयानि। वः। समानम्। अस्तु। वः। मनः। यथा। वः। सुसहासति।

**भावार्थः** - यूयं समानं सङ्कल्पं कुरुत। यूयं समानभावान् कुरुत। युष्माकं मनः समानं भवतु। युष्माकं गतिः परस्परं सम्मील्य भवत।

## शब्दार्थाः

ईडे = स्तुतिं करोमि
वाजेभिः = अन्नैः
मनांसि = विचाराः
समितिः = सभा
आकूति = संकल्पः
सुसहासनिः = सम्यकपरस्परंसम्मील्यगमनम्

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) प्रस्तुतमन्त्राणां चयनं कस्मात् वेदात् कृतमस्ति।
(क) ऋग्वेदात् (ख) यजुर्वेदात् (ग) सामवेदात् (घ) अथर्ववेदात्

(2) अग्निवंदनायाम् अग्निदेवतायाः कति विशेषणानि सन्ति?
(क) 3 (ख) 4 (ग) 5 (घ) 6

(3) 'ईळे' अर्थात् किम्?
(क) स्तुतः (ख) स्तुतिः (ग) स्तौमि (घ) स्तोत्रम्

(4) 'पुरोहितम्' इति पदेन कस्य देवस्य बोधः भवति।
(क) इन्द्रस्य (ख) ब्रह्मणः (ग) अग्नेः (घ) ब्राह्मणस्य

(5) 'रत्नधातमम्' अत्र रत्नं नाम किम्?
(क) यज्ञफलम् (ख) मणिः (ग) चन्द्रः (घ) सूर्यः

(6) 'वाजेभिः' इति पदं किमर्थं कम् अर्थं बोधयति?
(क) औषधिभिः (ख) ज्ञानैः (ग) अन्नैः (घ) अश्वैः

(7) 'मन्त्रः' इति पदस्य अत्र कः अभिप्रायः वर्तते?
(क) ऋक् (ख) विचारः (ग) श्लोकः (घ) छन्दः

(8) समितिः अर्थात् किम्?
(क) समानता (ख) सभा (ग) गोष्ठिः (घ) मीमांसा

(9) आकूतिः इति पदस्य कः भावः?
(क) विकल्पः (ख) सभा (ग) अन्तःकरणम् (घ) सभा

(10) 'भावाः समानाः सन्तु' इत्यर्थाय अत्र का पङ्क्तिः वर्तते?
(क) समानी आकूतिः (ख) समाना हृदयानि (ग) समाना मन्त्रः (घ) समानमस्तु मनः

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) अग्निदेवता पुरोहितं कथं वर्तते?

(2) वाजिनीवती इति पदस्य व्युत्पत्तिं कुरुत।

(3) देवाः भागं कथं स्वीकृतवन्तः?

(4) ऋग्वेदस्य विभाजनं कतिधा वर्तते?

(5) ऋग्वेदस्य कति मण्डलानि सन्ति?

(6) ऋग्वेदे कति ऋचः सन्ति?

(7) 'समानी मन्त्रः' इति ऋक् कस्मिन् मण्डले वर्तते?

**3. पञ्चवाक्यैः प्रश्नानाम् उत्तराणि लिखत :**

(1) ऋग्वाङ्मयस्य परिचयं ददत।

(2) अग्निस्तुतिं वर्णयत।

(3) सांधिक भावनायाः निरुपणं कुरुत।

**4. मन्त्रपूर्तिं कुरुत :**

(1) पावका नः .......... वष्टुः।

(2) संगच्छध्वं .......... उपासते।

(3) समानो मन्त्रः .......... जुहोमि।

**छात्रप्रवृत्तिः**

छात्राः ऋग्वेदस्य अन्यपञ्चमन्त्रान् पठन्तु।

**अध्यापकप्रवृत्तिः**

अध्यापकाः वेदानाम् अपौरुषेयत्वम् छात्रान् पाठयेयुः।

# 2

# कन्या-पितृत्वं खलु भागधेयम्

**प्रस्तावना**

'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' यस्मिन् गृहे नारीणां सम्मानं भवति तस्मिन् गृहे देवानां वासो भवति। नारी माता, भगिनी, भार्यादि रूपेण संसारेऽस्मिन् स्वजनानां अहर्निशं पालनपोषणं करोति। ज्ञानक्षेत्रे शौर्यक्षेत्रे च नारीणां महत्त्वपूर्णं योगदानम् इतिहासे वर्णितम् अस्ति। अतः साम्प्रतं राष्ट्रेऽपि स्त्रीशक्तिकरणम्, 'बेटी बचाओ बेटी पढाओ' सदृशानि कार्याणि प्रचलन्ति।

प्रस्तुतपद्येषु कन्यायाः महत्त्वं तथा कन्यायाः पितृत्वं महद्भाग्येन प्राप्तं भवति इति भावः प्रकटितः।

---

1. **कन्या भवन्ती कमनीयरुपा स्नेहान्विता सत्सरलस्वभावा।**
**चेतोऽब्धि बद्धा भुवि चन्द्रिकेयं, कन्यापितृत्वं खलु भागधेयम्॥**

**अन्वयः** - इयं कन्या कमनीयरुपा भवन्ती स्नेहान्विता, सत्सरलस्वभावा चेतोऽब्धि बद्धा भुवि चन्द्रिका (अतः) कन्यापितृत्वं खलु भागधेयम्।

**अर्थः** - कन्या मनोहरा भवति स्नेहयुक्ता तथा सरलस्वभावा भवति। जगति एषा चन्द्रिकारुपाऽस्ति या (पितॄणां) चित्तरुपेण समुद्रेण सह बद्धाऽस्ति। अतः खलु कन्या-पितृत्वं महद् भाग्यम्।

2. **कन्या पितॄणामिह नेत्रदृष्टिः, अन्तः स्थितां निर्मलतां तनोति।**
**शरीरशक्तिं हृदये बलं च, कन्यापितृत्वं खलु भागधेयम्॥**

**अन्वयः** - कन्या इह पितॄणां नेत्रदृष्टिः (या) अन्तः स्थितां निर्मलतां शरीरशक्तिं, हृदये बलं च तनोति। अतः कन्यापितृत्वं खलु भागधेयम्।

**अर्थः** - अस्मिन् संसारे कन्या पितॄणां नेत्रस्य ज्योतिरस्ति। अन्तः करणे मनोगतां वा निर्मलतां विस्तारयति। शरीरे शक्तिं हृदये आत्मबलं च वर्धयति। अतः खलु कन्यापितृत्वं महद् भाग्यम्।

3. **नगाधिराजो गिरिजामवाप्य, सूत्तुङ्गशृङ्गः स यथार्थनामा।**
**देवाधिदेवेन नमस्कृतोऽतः, कन्यापितृत्वं खलु भागधेयम्॥**

**अन्वयः** - गिरिजाम् अवाप्य नगाधिराजः देवाधिदेवेन नमस्कृतः अतः सूत्तुङ्गशृङ्गः यथार्थनामा स (अतः) कन्यापितृत्वं खलु भागधेयम्॥

**अर्थः** - गिरिजां प्राप्य नगाधिराजस्य हिमालयस्य सूत्तुङ्गशृङ्ग इति नाम सार्थकम् अभवत् कारणं देवाधिदेवेन शिवेन (अयं) नमस्कृतः अतः कन्यापितृत्वं खलु महद् भाग्यम्।

4. **माता स्नुषा वा भगिनी न यत्र गेहं न गेहं गहनं विना ताः।**
**ताभिस्समेतं सुमवाटिकेव, कन्यापितृत्वं खलु भागधेयम्॥**

**अन्वयः** - माता, स्नुषा भगिनी वा यत्र न ताः विना गेहं न गेहं गहनम् ताभिः समेतं सुमवाटिका इव (अतः) कन्यापितृत्वं खलु भागधेयम्॥

**अर्थः** - यत्र (यस्मिन् गृहे) माता, पुत्रवधूः अथवा भगिनी न सन्ति तद् गृहं गृहं न भवति अपितु गहनम् अस्ति। ताभिः कन्याभिः युक्तं (गृहं) कुसुमवाटिका इव (शोभते) अतः कन्यापितृत्वं खलु महद् भाग्यम्।

5. **मीनानिवासे पयसां स्थितिश्च, जीवज्जने प्राणगतिस्तथैव।**
**स्थितिर्गतिर्गेहभृतां सुकन्या, कन्या पितृत्वं खलु भागधेयम्॥**

**अन्वयः** – मीनानिवासे पयसां स्थितिः जीवज्जने प्राणगतिः च तथैव सुकन्या गेहभृतां स्थितिः गतिः (अतः) कन्यापितृत्वं खलु भागधेयम्॥

**अर्थः** – मीनानां निवासाय जलस्थितिः अनिवार्या भवति। देहधारिणः जीवितमानवस्य कृते श्वासोच्छ्वासक्रिया (प्राणगति) अनिवार्या भवति। तथैव गृहस्थिनां कृते सुकन्या स्थिति गतिरूपाचास्ति अतः खलु कन्यापितृत्वं महद् भाग्यम्॥

6. **कन्याविहीनं भवनं स्मशानं कङ्कालभुग्भोजन भूरितुल्यम्।**
**तया समेतं शुकनीडतुल्यं, कन्यापितृत्वं खलु भागधेयम्॥**

**अन्वयः** – कन्याविहीनं भवनं कङ्कालभुग्भोजनभूरितुल्यं स्मशानं तया समेतं शुकपिकनीडम् (अतः) कन्यापितृत्वं खलु भागधेयम्।

**अर्थः** – कन्यारहितं गृहं कङ्कालभक्षकानां भोजनसमानं स्मशानं भवति तया कन्यया युक्तं भवनं शुकपिकनीडं इव भवति अतः कन्यापितृत्वं खलु महद्भाग्यम्॥

7. **कन्याऽमृतं नो भवसागराप्तं सैषा स्थली रत्नयुताऽस्मदीया।**
**लक्ष्म्या समेतो रसधिः सरत्नः कन्यापितृत्वं खलु भागधेयम्॥**

**अन्वयः** – कन्या भवसागराप्तं नः अमृतम्। सा एषा अस्मदीया रत्नयुता स्थली लक्ष्म्या समेतः रसधिः सरत्नः (अतः) कन्यापितृत्वं खलु भागधेयम्॥

**अर्थः** – अस्माकं कन्या अस्मात् संसारसागरात् प्राप्तं अमृतमस्ति। इयं अस्माकं रत्नसहिता स्थली अस्ति। उदधिः लक्ष्म्यान्वितः सरत्नः कथ्यते अतः कन्यापितृत्वं खलु महद् भाग्यम्।

8. **न्यासोऽस्ति दायित्वयुतोऽर्ककल्पो, गर्वान्वितानां हिमखण्डगर्वः।**
**तेजस्विनी दीपशिखेव नान्या कन्यापितृत्वं खलु भागधेयम्॥**

**अन्वयः** – दायित्वयुतः न्यासोऽस्ति (थापण) गर्वान्वितानां हिमखण्डगर्वः अर्ककल्पः दीपशिखा इव तेजस्विनी नान्या (अतः) कन्यापितृत्वं खलु भागधेयम्।

**अर्थः** – कन्या उत्तरदायित्वयुतः अर्थः न्यासभूता थापणरूपा अस्ति। यथा सूर्यः हिमखण्डस्य गर्वं नाशयति तथैव कन्यापि मदान्वितानां मदं दूरीकरोति। कन्या तेजोमयदीपशिखा इव अस्ति तत्समाना नान्या भवति अतः कन्यापितृत्वं खलु महद्भाग्यम्।

## शब्दार्थाः

| | |
|---|---|
| निर्मलतां = पवित्रतां | स्थली = स्थानम् |
| गिरिजां = पार्वतीं | रसधिः = समुद्रः |
| गहनं = वनं | हिमखण्डस्य = तुषारस्य |
| कुसुमवाटिका = पुष्पोद्यानं | मीनानां = मत्स्यानां |

## स्वाध्यायः

1. **प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) कन्यायाः स्वभावः कीदृशो भवति?

(क) कठिनः (ख) सरलः (ग) जटिलः (घ) निष्ठुरः

(2) संसारे पितॄणां नेत्रज्योतिः का?

(क) भार्या (ख) भगिनी (ग) कन्या (घ) स्नुषा

(3) कन्या अन्तः स्थितां कां तनोति?

(क) मलिनतां (ख) निर्मलतां (ग) वत्सलतां (घ) रमणीयतां

(4) हिमालयस्य किं नाम सार्थकं अभवत्?

(क) उन्मुखशृङ्गः (ख) सूतुङ्गशृङ्गः (ग) उर्ध्वशृङ्गः (घ) ध्वस्तशृङ्गः

(5) नगाधिराजः काम् अवाप्य यथार्थनामा जातः?

(क) गिरिजां (ख) अम्बिकां (ग) सीता (घ) सुभद्रां

(6) मत्स्यानां निवासे केषां स्थिति अनिवार्या?

(क) पङ्कानां (ख) पयसां (ग) रसानां (घ) दध्नां

(7) कन्या संसारसागरात् प्राप्तं किम् अस्ति?

(क) रत्नं (ख) अमृतं (ग) जलं (घ) मलम्

(8) कन्या चेतोऽब्धिबद्धा काऽस्ति?

(क) माला (ख) चन्द्रिका (ग) धरा (घ) गंगा

(9) कन्या हृदये किं वर्धयति?

(क) ज्ञानं (ख) बलं (ग) भयं (घ) शीलं

(10) कन्या समेतं गृहं कीदृशम् अस्ति?

(क) पारावतनीडम् (ख) शुकपिकनीडम् (ग) सारसनीडम् (घ) चक्रवाकनीडम्

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत :**

(1) काः विना गृहं वनं भवति?
(2) सुकन्या गेहभृतां कृते किम् अस्ति?
(3) कन्याविहीनं भवनं कीदृशम् अस्ति?
(4) कन्या कीदृशी स्थली अस्ति?
(5) रुदधिः, किमर्थं सरलः कथ्यते?

**3. पञ्चवाक्ये प्रश्नानाम् उत्तराणि लिखत :**

(1) गेहभृतां कृते कन्या किं महत्वं धारयति इति वर्णयत।
(2) निजशब्दैः कन्यामहत्वं प्रतिपादयत।
(3) कन्यापितृत्वं खलु भागधेयमिति विवेचयत।

**4. श्लोकपूर्ति कुरुत :**

(1) माता स्नुषा .......... भागधेयम्।
(2) कन्याऽमृतं .......... भागधेयम्।
(3) न्यासोऽस्ति .......... भागधेयम्।

**5. विभक्तिपरिचयं लिखत :**

(1) पितॄणां (2) गिरिजां (3) देवाधिदेवेन
(4) ताभिः (5) गहनं (6) सुमवाटिका

**छात्रप्रवृत्तिः**

कन्यामहत्वं स्वजीवने धारयन्तु।

**अध्यापकप्रवृत्तिः**

इतिहासे वर्णितानि नारीचरित्राणि च उपदिशन्तु॥

# 3

# उमाबटुसंवादः

**प्रास्तावना**

यथा ब्रह्मणः जगति सूर्यः प्राधान्यं भजते तथैव कवीनां जगति कविशिरोमणिः कालिदासः प्राधान्यं भजते। अयं महाकविः बाल्यावस्थायां मूर्खः आसीत्। देव्याः कृपया पाण्डित्यम् अवाप्य सप्तग्रन्थानां रचनाम् अकरोत्। तत्र रघुवंशं, कुमारसम्भवं चेति द्वे महाकाव्ये, ऋतुसंहारः, मेघदूतं द्वे खण्डकाव्ये, अभिज्ञानशाकुन्तलं, मालविकाग्निमित्रं, विक्रमोर्वशीयम् इति त्रीणि नाटकानि वर्तन्ते।

एतेषु सप्तग्रन्थेषु कुमारसम्भवं महाकाव्यम् अन्यतमम् अस्ति। अस्मिन् महाकाव्ये उमा-उत्पत्तिः ब्रह्मसाक्षात्कारः, कुमाराभिषेकः, देवासुरसङ्ग्रामः तारकासुरवधः, इत्यादयः विषयाः सन्ति।

प्रस्तुतपद्यानि अस्य महाकाव्यस्य पञ्चमसर्गात् उद्धृतानि सन्ति। यदा पार्वती भगवतः शिवस्य प्राप्त्यर्थं गिरिशिखरे तपः करोति तदा तत्र ब्रह्मचारिणः बटोः आगमनं भवति। सः पार्वतीं तपसः प्रयोजनं पृच्छति। पार्वत्याः सखी तद् विज्ञापयति। तच्छ्रुत्वा सः बटुः भगवतः शिवस्य निन्दां कुर्वन् कथयति यद् भोगसम्पन्ने भवने निवासयोग्यायाः ते श्मशाने कथं निवासः शक्यः? शिवः विवाहेन वृषभमारुह्य त्वां नेष्यति। एतच्छ्रुत्वा पार्वती तं बटुं वदति यत् संसारे भगवन्तं शिवं न कोऽपि जानाति। यदा शिवः वृषभमारुह्य गच्छति तदा शिवस्य अग्रे इन्द्रादयः देवाः नमन्ति। त्वम् इदानीम् एव इतः गच्छ यतः महतां निन्दां यः करोति तेन समं यः निन्दां श‍ृणोति सोऽपि पापभाक् भवति। अथवा अहम् एव गच्छामि इत्युक्त्वा यदा पार्वती गच्छति तदानीम् एव भगवान् शिवः वास्तविकं रूपं तस्यै दर्शयति।

---

1. **अथाजिनाषाढधरः प्रगल्भवाग्ज्वलन्निव ब्रह्ममयेन तेजसा।**
   **विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा॥**

   **अन्वयः** - अथ अजिनाषाढधरः प्रगल्भवाक् ब्रह्ममयेन तेजसा ज्वलन् इव कश्चित् जटिलः शरीरबद्धः प्रथमाश्रमो यथा तपोवनं विवेश॥

   **अर्थः** - (पार्वती यत्र तपः करोति तस्मिन् स्थाने) अधुना मृगचर्मधरः पलाशदण्डं गृहीत्वा प्रगल्भवाक् वाचालः वेदाध्ययनोद्भवेन तेजसा प्रकाशमानः जटावान् तथा एतादृक् प्रतिभाति स्म यत् ब्रह्मचर्याश्रमः एव वपुः धृत्वा (सः बटुः) तपोवनं प्रविष्टवान्।

2. **अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते।**
   **अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम्॥**

   **अन्वयः** - अपि क्रियार्थं समित्कुशं सुलभम्? अपि जलानि ते स्नानविधिक्षमाणि? अपि स्वशक्त्या तपसि प्रवर्तसे? खलु शरीरम् आद्यं धर्मसाधनम्॥

   **अर्थः** - (ब्रह्मचारी बटुः उमां पृच्छति यत्) यज्ञक्रियायै समिधः कुशाश्च सहजतया सुलभेन वा प्राप्ताः भवन्ति? जलमपि स्नानंकर्तुं योग्यम् पर्याप्तं अस्ति? एवम् च स्वशक्त्यनुसारं एव तपः करोषि न वा? यतः शरीरं एव धर्मकर्मणि प्रधानसाधनम् अस्ति॥

3. **कुले प्रसूतिः प्रथमस्य वेधसस्त्रिलोकसौन्दर्यमिवोदितं वपुः।**
**समृग्यमैश्वर्यसुखं नवं वयस्तपः फलं स्यात्किमतः परं वद॥**

**अन्वयः** - प्रथमस्य वेधसः कुले प्रसूतिः, वपुः त्रिलोकसौन्दर्यम् इव, उदितम् ऐश्वर्यसुखं, नवं वयः, अतः परं किं तपः फलं? वद॥

**अर्थः** - आदिब्रह्मणः कुले तव जन्म, त्रिलोकस्य सौन्दर्यम् एकत्रैव समाहितं स्यात् तादृक् भवच्छरीरमस्ति। अन्वेषणीयं न भवेत् एतादृशं स्वतः सुलभं ऐश्वर्यसुखम् अस्ति। नवं च वयः। एतस्मात् अधिकं तपसः फलं भवति किं लब्धुमिच्छति? कथय?

4. **किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम्।**
**वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते॥**

**अन्वयः** - (हे गौरि) किमिति यौवने त्वया आभरणानि अपास्य वार्धकशोभि वल्कलं धृतम्? प्रदोषे स्फुटचन्द्रतारका विभावरी अरुणाय कल्पते यदि? वद।

**अर्थः** - (अधुना ब्रह्मचारी पार्वत्यै तपसः प्रयोजनं पृच्छति यत्) केन हेतुना युवावस्थायां अलङ्कारान् परित्यज्य वृद्धावस्थानुरूपं वल्कलं त्वया धृतम्? भवती एव कथयतु किं जाज्वल्यमानचन्द्रेण तारकाभिश्च समलङ्कृता निशा स्वारम्भकाले एव प्रभातस्य लौहित्यं दधाति किम्? अर्थात् तादृशी निशा अरुणसहवासं कदापि नेच्छति।

5. **इयं महेन्द्रप्रभृतीनधिश्रियश्चतुर्दिगीशानवमत्य मानिनी।**
**अरूपहार्यं मदनस्य निग्रहात् पिनाकपाणिं पतिमाप्तुमिच्छति॥**

**अन्वयः** - मानिनी इयम् अधिश्रियः महेन्द्रप्रभृतीन् चतुर्दिगीशान् अवमत्य मदनस्य निग्रहात् अरूपहार्यं पिनाकपाणिं पतिम् आप्तुम् इच्छति।

**अर्थः** - पार्वत्याः सखी तपसः प्रयोजनं विज्ञापयति। इयं मानिनी पार्वती चतसृणां दिशां प्रभूत-ऐश्वर्य सम्पन्नानां इन्द्रादिदिक्पालानां अवगणनां कृत्वा कामदेवस्य निग्रहं कुर्वाणं रूपमात्रेण अहार्यं भगवन्तं पिनाकपाणिं शिवं पतित्वेन प्राप्तुम् इच्छति।

6. **यदा च तस्याधिगमे जगत्पतेरपश्यदन्यं न विधिं विचिन्वती।**
**तदा सहास्माभिरनुज्ञया गुरोरियं प्रपन्ना तपसे तपोवनम्॥**

**अन्वयः** - जगत् पतेः तस्य अधिगमे अन्यं विधिं विचिन्वती यदा न अपश्यत् तदा इयं गुरोः अनुज्ञया अस्माभिः सह तपसे तपोवनं प्रपन्ना।

**अर्थः** - जगन्नाथं भगवन्तं (शिवं) पतित्वेन प्राप्तुम् उपायं गवेषयन्ती सा पार्वती यदा अन्यं कञ्चन मार्गं न अपश्यत् तदा गुरोः नारदस्य आज्ञाम् अवाप्य अस्माभिः सखीभिः सह तपः कर्तुं तपोवनं प्राप्ता। आगतवती इति भावः॥

7. **अथाह वर्णी विदितो महेश्वरस्तदर्थिनी त्वं पुनरेव वर्तसे।**
**अमङ्गलाभ्यासरतिं विचिन्त्य तं तवानुवृत्तिं न च कर्तुमुत्सहे॥**

**अन्वयः** - अथ वर्णी आह - महेश्वरो विदितः पुनः त्वं तदर्थिनी वर्तसे? तम् अमङ्गलाभ्यासरतिं विचिन्त्य तव अनुवृत्तिं कर्तुं न उत्सहे॥

**अर्थः** - ब्रह्मचारी बटुः कथयति यद् अहं शिवं जानामि। तथापि त्वं तमेव प्राप्तुं तपः कर्मणि प्रवृत्ता असि। तम् (शिवं) अमङ्गलाचरणे प्रणयिनं मत्वा अहं तव अनुमोदनं कर्तुं न शक्नोमि॥

**8. अवस्तुनिर्बन्धपरे कथं नु ते करोऽयमामुक्तविवाहकौतुकः।**
**करेण शंभोर्वलयीकृताहिना सहिष्यते तत्प्रथमावलम्बनम्॥**

**अन्वयः** – हे अवस्तुनिर्बन्धपरे। आमुक्तविवाहकञ्चुकः ते अयं करः वलयीकृताऽहिना शंभोः करेण तत्प्रथमाऽवलंबनं कथं नु सहिष्यते॥

**अर्थः** – अयोग्ये वस्तुनि अनुरक्ते। वलयम् इव (शिवस्य) हस्ते सर्पः अस्ति। तादृशस्य सर्पयुक्तस्य हस्तस्य पाणिग्रहणवेलायां प्रथमम् अवलम्बनं मङ्गलसूत्रेण बद्धः तव हस्तः कथं नु सहिष्यते॥

**9. इयं च तेऽन्या पुरतो विडम्बना यदूढया वारणराजहार्यया।**
**विलोक्य वृद्धोक्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति।**

**अन्वयः** – इयं च ते पुरतः अन्या विडम्बना यत् ऊढया वारणराजहार्यया त्वया अधिष्ठितं वृद्धोक्षं विलोक्य महाजनः स्मेरमुखो भविष्यति॥

**अर्थः** – ब्रह्मचारी बटुः पार्वती उपहासभागिनी भविष्यतीति कथयन् विवृणोति यत् तव उद्वाहानन्तरम् अन्यः एकोऽपि उपहासः प्रारम्भे एव उपस्थास्यति यत् परिणीता भवती श्रेष्ठगजोपरि आरोहणयोग्याऽपि विपरीतं वृद्धवृषभम् आरुह्य गमिष्यति तदा वृद्धवृषभं वीक्ष्य त्वां सज्जनाः हसिष्यन्ति॥

**10. उवाच चैन परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम्।**
**अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम्॥**

**अन्वयः** – अथ एनम् उवाच च त्वं परमार्थतो हरं न वेत्सि नूनम्, यत एवम् आत्थ। मन्दा अलोकसामान्यम् अचिन्त्यहेतुकं महात्मनां चरितं द्विषन्ति।

**अर्थः** – अनन्तरं पार्वती ब्रह्मचारिणे कथयति – त्वं परमार्थरूपेण यथार्थरूपेण भगवन्तं शिवं न जानासि अतः एवं वदसि। महापुरुषाणाम् आचरणं ये न जानन्ति, तेषां प्रयोजनम् अपि ज्ञातुं न शक्नुवन्ति तादृशाः मूर्खाः तेषां द्वेषम् एव कुर्वन्ति।

**11. अकिञ्चनः सन्प्रभवः स संपदां, त्रिलोकनाथः पितृसद्म गोचरः।**
**स भीमरूपः शिव इत्युदीर्यते न सन्ति याथार्थ्यविदः पिनाकिनः॥**

**अन्वयः** – सः अकिञ्चनः सन् संपदां प्रभवः पितृसद्मगोचरः सन् त्रिलोकनाथः भीमरूपः सन् 'शिव' इति उदीर्यते। अतः पिनाकिनः याथार्थ्यविदो न सन्ति।

**अर्थः** – महादेवः निरपेक्षः अपि सम्पदां दाता अस्ति, श्मशानम् आश्रितः अपि त्रिलोकनाथः अस्ति। भीषणाकृतिः सन् 'शिवः' कथ्यते अतः महादेवस्य यथार्थतत्त्वज्ञातारः न सन्ति।

**12. विभूषणोद्भासि पिनद्धभोगि वा गजाजिनालम्बि दुकूलधारि वा।**
**कपालि वा स्यादथवेन्दुशेखरं न विश्वमूर्तेरवधार्यते वपुः॥**

**अन्वयः** – पार्वती ब्रह्मचारिणमुत्तरति विश्वमूर्तेः वपुः विभूषणोद्भासि पिनद्धभोगि वा, गजाजिनालम्बि दुकूलधारि वा, कपालि वा अथवा इन्दुशेखरं स्यात् न अवधार्यते॥

**अर्थः** – (शिवस्य शरीरं) आभरणैः अलङ्कृतं स्यात् सर्पैरावृतं वा स्यात्, गजचर्मधृतं स्यात् दुकूलावृतं वा, स्यात् कपालयुक्तं स्यात् इन्दुशेखरं वा स्यात् तस्य विश्वरूपस्य शिवस्य स्वरूपं न कश्चन पारं याति।

**13. अलं विवादेन यथा श्रुतस्त्वया तथाविधस्तावदशेषमस्तु स:।**
**ममात्र भावैकरसं मन: स्थितं न कामवृत्तिर्वचनीयमीक्षते॥**

**अन्वय:** – विवादेन अलम् त्वया यथा स श्रुत: अशेष: तथाविध: अस्तु। मम मन: अत्र भावैकरसं स्थितम्। कामवृत्ति: वचनीयं न ईक्षते।

**अर्थ:** – त्वया यथा श्रुतं संपूर्णतया तथैव स: अस्तु तथापि मम मन: तस्मिन् (शिवे) प्रेमरसयुक्तं स्थितम् अस्ति। अत: अधुना विवादं मा कुरु कारणं मनस्विन: लोकनिन्दां वा अपवादं न पश्यन्ति (न शृण्वन्ति इति भाव:)॥

**14. निवार्यतामालि किमप्ययं बटु: पुनर्विवक्षु: स्फुरितोत्तराधर:।**
**न केवलं यो महतोऽपभाषते शृणोति तस्मादपि य: स पापभाक्॥**

**अन्वय:** – हे आलि। स्फुरितोत्तराधर: अयं बटु: पुन: किमपि विवक्षु: निवार्यताम्। यो महत: अपभाषते न केवलं स पापभाक् (भवति) य: तस्मात् शृणोति सोऽपि पापभाक् भवति।

**अर्थ:** – हे सखि! अस्य ओष्ठ: स्फुरति तेन पुन: किमपि वक्तुम् इच्छति इति भाति अत: एनं दूरीकुरु। स: एव पापभाक् न भवति य: गुरुं निन्दति अपि तु तस्मात् निन्दकात् य: निन्दां शृणोति सोऽपि पापभाक् भवति॥

**15. इतो गमिष्याम्यथवेति वादिनी चचाल बाला स्तनभिन्नवल्कला।**
**स्वरूपमास्थाय च तां कृतस्मित: समाललम्बे वृषराजकेतन:॥**

**अन्वय:** – अथवा इतो गमिष्यामि। इति वादिनी स्तनभिन्नवल्कला बाला चचाल। वृक्षराजकेतन: स्वरूपं आस्थाय कृतस्मित: सन् तां समाललम्बे॥

**अर्थ:** – अथवा अहं इत: गमिष्यामि इति वदन्त्या: यस्या: स्तनात् वल्कलवस्त्रं अपतत् तादृशी पतितवल्कलवस्त्रस्तनी बाला पार्वती तत: चलति तदानीमेव बटुरूप: शिव: निजवास्तविकं रूपं प्रकटय्य सस्मित: पार्वतीम् अग्रहीत्।

**16. अद्य प्रभृत्यवनताङ्गि तवास्मि दास: क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ।**
**अह्नाय सा नियमजं क्लममुत्ससर्ज क्लेश: फ़लेन हि पुनर्नवतां विधत्ते॥**

**अन्वय:** – हे अवनताङ्गि! अद्यप्रभृति तव तपोभि: क्रीत: दास: अस्मि इति चन्द्रमौलौ वादिनि सति सा अह्नाय नियमजं क्लमम् उत्ससर्ज हि क्लेश: फ़लेन पुन: नवतां विधत्ते॥

**अर्थ:** – हे नताङ्गि! अद्य प्रारभ्य अहं तपोभि: क्रीत: तव दास: अस्मि इत्युक्ते शिवे पार्वती तपोजन्यं क्लेशं सत्वरं विस्मृतवती यतो हि क्लेश: फ़लप्राप्त्यनन्तरं नवतां याति॥

## शब्दार्था:

प्रगल्भवाक् = वाचाल:
परमार्थरूपेण = यथार्थरूपेण
पारम् = अन्तम्
निवार्यताम् = दूरीकुरु
क्लेशम् = दु:खम्
अवाप्य = प्राप्य
भीमरूप: = भयङ्कररूप:
भावैकरसम् = प्रेमैकरसम्
विधाय = कृत्वा

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) ब्रह्मचारी बटुः कुत्र प्रविष्टवान् ?

(क) देवालयम् (ख) भोजनालयम् (ग) तपोवनम् (घ) रुग्णालयम्

(2) आद्यं धर्मसाधनं खलु किम् ?

(क) ज्ञानम् (ख) शरीरम् (ग) भक्तिः (घ) तपः

(3) पार्वत्याः कस्मिन् कुले जन्म अभवत् ?

(क) विष्णोः (ख) ब्रह्मणः (ग) शिवस्य (घ) इन्द्रस्य

(4) पार्वत्या युवावस्थायां केषां त्यागः कृतः ?

(क) भवनानाम् (ख) संमृद्धीनाम् (ग) आभरणानाम् (घ) भोगानाम्

(5) पार्वती कम् आप्तुम् इच्छति ?

(क) विष्णुम् (ख) कुबेरम् (ग) पिनाकपाणिम् (घ) इन्द्रम्

(6) पार्वती तपोवनं किमर्थम् आगतवती ?

(क) क्रीडायै (ख) मृगयायै (ग) तपसे (घ) भ्रमणाय

(7) शिवः कस्य आचरणे स्नेहं दधाति ?

(क) मङ्गलस्य (ख) अमङ्गलस्य (ग) सज्जनस्य (घ) पार्वत्याः

(8) पार्वती विवाहान्ते कस्योपरि आरोहणयोग्या ?

(क) अश्वोपरि (ख) गजोपरि (ग) उक्षोपरि (घ) अजोपरि

(9) बटुः परमार्थतः कं न वेत्ति ?

(क) ब्रह्माणम् (ख) वामनम् (ग) शिवम् (घ) अर्जुनम्

(10) शिवः केषां कारणम् अस्ति ?

(क) आपदाम् (ख) संपदाम् (ग) संमृद्धीनाम् (घ) भोगानाम्

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) भगवान् शिवः कस्मिन् वेशे वनम् आयाति ?

(2) शरीरमाद्यं खलु धर्मसाधनम् इति कः वदति ?

(3) पार्वत्या यौवने कीदृशं वस्त्रं धृतम् ?

(4) पार्वती कीदृशं पिनाकपाणिं पतिमाप्तुमिच्छति ?

(5) पार्वती तपः कर्तुं कदा वनं गतवती ?

(6) शिवस्य हस्तः कीदृशः अस्ति ?

(7) सज्जनाः किमर्थं हास्यं करिष्यन्ति ?

**3. पञ्चवाक्यैः प्रश्नानाम् उत्तराणि लिखत।**

(1) ब्रह्मचारिणा उक्तानि शिवनिन्दात्मकवचांसि लिखत।

(2) पार्वती शिवविषये किं किं कथयति?

(3) शरीरमाद्यं खलु धर्मसाधनम् इति विवेचयत।

(4) पार्वती किम् उक्त्वा बटुं निवारयति?

**4. प्रदत्तश्लोकानां सान्वयं भावार्थं लिखत।**

(1) अलं विवादेन .......... वचनीयमीक्षते।

(2) निवार्यतामालि .......... यः स पापभाक्।

(3) अद्य प्रभृत्यवन .......... पुनर्नवतां विधत्ते।

**5. सन्धिविच्छेदं कुरुत।**

| | |
|---|---|
| (1) स्वशक्त्यनुसारम् | (4) भावैकरसम् |
| (2) जलान्यपि | (5) स्फुरितोत्तराधरः |
| (3) सज्जनाः | (6) इत्युक्ते |

**छात्रप्रवृत्तिः**

पद्ये प्रदत्तश्लोकान् कण्ठस्थान् कुरुत।

**अध्यापकप्रवृत्तिः**

कुमारसम्भवमहाकाव्यस्य परिचयं यच्छत।

●

# 4

# बुद्धस्य विहारः

**प्रस्तावना**

संस्कृतसाहित्ये प्रायः सर्वेषां कृतिकाराणां जीवनसमयविषये निश्चयेन वक्तुं न शक्यते। एवमेव अश्वघोषविषये अपि विद्वांसः नैकमताः। अश्वघोषस्य मातुः नाम सुवर्णाक्षिः इति प्रसिद्धम्। तस्य जननम् अयोध्यायां जातम् इति। अश्वघोषसन्दर्भे किंवदन्त्यः प्रसिद्धाः सन्ति। तत्र अश्वघोषः इति विचित्रं नाम एव कारणम्। एकस्यां कथायां महाराजः कनिष्कः अश्वान् दिवसावसानपर्यन्तम् आहारं न ददाति। अग्रिमे दिवसे तृणं दत्त्वा अश्वघोषम् उपदेशाय निर्देशं करोति। अश्वाः तृणकवलं विस्मृत्य अश्वघोषस्य उपदेशं शृण्वन्ति। अतः सः 'अश्वघोषः' इति उपाधिना प्रसिद्धः जातः। अश्वघोषस्य तिस्रः कृतयः सन्ति। तत्र 'बुद्धचरितम्' सौन्दरानन्दः इति द्वे महाकाव्ये, शारिपुत्रप्रकरणम् इति रूपकमपि प्राप्यते। अत्र सर्वत्र कथाबीजं बुद्धजीवनात् स्वीकरोति। अतः केषाञ्चन मतं वर्तते यत् अश्वघोषः बौद्धभिक्षुः आसीत्। किन्तु पूर्वाश्रमे सः ब्राह्मणः आसीत् पश्चात् बौद्धधर्ममङ्गीकृतवान् इति केषाञ्चन मतम्।

अत्र पद्ये 'बुद्धचरितम्' महाकाव्यस्य तृतीयसर्गे सिद्धार्थस्य नगरविहारस्य प्रसङ्गो वर्तते। तस्मात् प्रसङ्गात् केचन नियतश्लोकाः अत्र प्रस्तूयन्ते।

---

1. **श्रुत्वा ततः स्त्रीजनवल्लभानां मनोज्ञभावं पुरकाननानाम्।**
   **बहिः प्रयाणाय चकार बुद्धिमन्तर्गृहे नाग इवावरुद्धः॥**

   **अन्वयः** – ततः स्त्रीजनवल्लभानां पुरकाननानां मनोज्ञभावं श्रुत्वा अन्तर्गृहे अवरुद्धः नागः इव बहिः प्रयाणाय बुद्धिं चकार।

   **अर्थः** – तदनन्तरं नारीप्रियाणां नगरवनानां रमणीयतां श्रुत्वा अन्तर्गृहे अवरुद्धः नागः इव बहिः प्रयाणाय बुद्धिं चकार।

2. **ततो नृपस्तस्य निशम्य भावं पुत्राभिधानस्य मनोरथस्य।**
   **स्नेहस्य लक्ष्म्या वयसश्च योग्यामाज्ञापयामास विहारयात्राम्॥**

   **अन्वयः** – ततः नृपः पुत्राभिधानस्य तस्य मनोरथस्य भावं निशम्य स्नेहस्य च लक्ष्म्याः च वचसः योग्यां विहारयात्राम् आज्ञापयामास।

   **अर्थः** – तदनन्तरं राजा तस्य पुत्रस्य स्पृहायाः भावं श्रुत्वा स्नेहेन, लक्ष्म्या वयसा च योग्यां विहारयात्रार्थम् आज्ञां ददौ।

3. **तं ताः कुमारं पथि वीक्षमाणाः स्त्रियो बभुर्गामिव गन्तुकामाः।**
   **ऊर्ध्वोन्मुखाश्चैनमुदीक्षमाणा नरा बभुर्द्यामिव गन्तुकामाः॥**

   **अन्वयः** – तं कुमारं पथि वीक्षमाणाः ताः स्त्रियः गाम् इव गन्तुकामाः बभुः एनं च ऊर्ध्वोन्मुखाः उदीक्षमाणाः नराः द्याम् इव गन्तुकामाः बभुः।

   **अर्थः** – सिद्धार्थं मार्गे पश्यन्त्यः स्त्रियः पृथ्वीं प्रति गन्तुम् इच्छन्त्यः बभुः। तथा च उपरि पश्यन्तः नराः आकाशं प्रति गमनाय इच्छां कृतवन्तः इति।

**4. दृष्ट्वा च तं राजसुतं स्त्रियस्ता जाज्वल्यमानं वपुषा श्रिया च।**
**धन्यास्य भार्येति शनैरवोचन् शुद्धैर्मनोभिः खलु नान्यभावात्॥**

**अन्वयः** – ताः स्त्रियः वपुषा श्रिया च जाज्वल्यमानं तं राजसुतं दृष्ट्वा अस्य भार्या धन्या इति शुद्धैः मनोभिः शनैः शनैः अवोचत् न खलु अन्यभावात्।

**अर्थः** – ताः वीक्षमाणाः स्त्रियः शरीरेण समृद्ध्या सौन्दर्येण च प्रकाशमानं तं सिद्धार्थं राजसुतं दृष्ट्वा अस्य सिद्धार्थस्य भार्या धन्या इति विमलैः मनोभिः शनैः शनैः उक्तवन्त्यः न तत्र खलु इतरभावात् इति।

**5. पुरं तु तत्स्वर्गमिव प्रहृष्टं शुद्धाधिवासः समवेक्ष्य देवाः।**
**जीर्णं नरं निर्ममिरे प्रयातुं संचोदनार्थं क्षितिपात्मजस्य॥**

**अन्वयः** – शुद्धाधिवासाः देवाः तु तत् परं स्वर्ग इव प्रहृष्टं समवेक्ष्य क्षितिपात्मजस्य प्रयातुं संचोदनार्थं जीर्णं नरं निर्ममिरे।

**अर्थः** – शुद्धनिवासे वसन्तः देवाः तत् नगरं स्वर्ग इव आनन्दितम् इति अवलोक्य राजपुत्रे सिद्धार्थे वैराग्यं जनयितुं वृद्धस्य नरस्य निर्माणं कृत्वा प्रेषितवन्तः।

**6. ततः कुमारो जरयाभिभूतं दृष्ट्वा नरेभ्यः पृथगाकृतिं तम्।**
**उवाच सङ्ग्राहकमागतस्थस्तत्रैव निष्कम्पनिविष्टदृष्टिः॥**

**अन्वयः** – ततः जरया अभिभूतं नरेभ्यः पृथगाकृतिं तम् दृष्ट्वा आगतास्थः तत्र एव निष्कम्पनिविष्टदृष्टिः कुमारः सङ्ग्राहकम् उवाच।

**अर्थः** – तदनन्तरं वृद्धावस्थया अभिभूतम् इतरनरेभ्यः भिन्नाकृतिं तं वृद्धम् अवलोक्य प्राप्तविचारः तत्रैव स्थिरलोचनः कुमारः सारथिम् अवदत्।

**7. क एष भोः सूत नरोऽभ्युपेतः कैशः सितैर्यष्टिविषक्तहस्तः।**
**भ्रूसंवृताक्षः शिथिलानताङ्गः किं विक्रियैषा प्रकृतिर्यदृच्छा॥**

**अन्वयः** – भो सूत! सितैः केशैः एष कः नरः अभ्युपेतः?

यष्टिविषक्तहस्तः, भ्रूसंवृताक्षः, शिथिलानताङ्गः, किम् एषा विक्रिया? प्रकृतिः (किम्)? यदृच्छा (का)?

**अर्थः** – अरे सूत! श्वेतकेशैः एषः कः नरः आगतः? दण्डसहायेन गच्छन्, भृकुट्यावृतनेत्रः, शिथिलतया-आनत-अङ्गः, किम् एषा विचित्रा क्रिया? का प्रकृतिः? तत्र कः संयोगः?

**8. रूपस्य हन्त्री व्यसनं बलस्य शोकस्य योनिर्निधनं रतीनाम्।**
**नाशः स्मृतीनां रिपुरिन्द्रियाणामेषा जरा नाम ययैष भग्नः॥**

**अन्वयः** – रूपस्य हन्त्री, बलस्य व्यसनम्, शोकस्य योनिः, रतीनां निधनम्, स्मृतीनां नाशः, इन्द्रियाणां रिपुः, एषा नाम जरा।

**अर्थः** – सौन्दर्यस्य हननकर्त्री, बलस्य नाशकर्त्री, शोकस्य जननी, भोगानां निधनम्, स्मरणशक्तेः नाशयित्री, इन्द्रियाणां शत्रुः, एषा वृद्धावस्था अस्ति।

**9. अथापरं व्याधिपरीतदेहं त एव देवाः ससृजुर्मनुष्यम्।**
**दृष्ट्वा च तं सारथिमाबभाषे शौद्धोदनिस्तद्गतदृष्टिरेव॥**

**अन्वयः** – अथ ते एव देवा अपरं व्याधिपरीतदेहं मनुष्यं ससृजुः। तं च दृष्ट्वा तद्गतदृष्टिः एव शौद्धोदनिः सारथिम् आबभाषे।

**अर्थः** – तद् पश्चाद् देवाः पुनः व्याधिग्रस्तशरीरयुक्तस्य मनुष्यस्य निर्माणं चक्रुः। तस्मिन् व्याधिग्रस्त, शरीरे बद्धदृष्टिः सिद्धार्थः सारथिम् उवाच।

**10. स्थूलोदरः श्वासचलच्छरीरः स्रस्तांसबाहुः कृशपाण्डुगात्रः।**
**अम्बेति वाचं करुणं ब्रुवाणः परं समाश्रित्य नरः क एषः॥**

**अन्वयः** - स्थूलोदरः श्वासचलच्छरीरः, स्रंस्तांसबाहुः, कृशपाण्डुगात्रः परं समाश्रित्य अम्ब! इति करुणं वाचं ब्रुवाणः एषः कः नरः?

**अर्थः** - पीनोदरः श्वासोच्छ्वासेन कम्पमानाशरीरः, शिथिलस्कन्धः, दुर्बलनिस्तेजाङ्गः, पराश्रितः, हे अम्ब! इति करुणोद्गारं वदन् एषः कः नरः? इति सिद्धार्थः सारथिं पृच्छति।

**11. ततो बभाषे स रथप्रणेता कुमार साधारण एष दोषः।**
**एवं हि रोगैः परिपीड्यमानो रुजातुरो हर्षमुपैति लोकः॥**

**अन्वयः** - ततः सः रथप्रणेता बभाषे कुमार! एष साधारणः दोषः एवं रोगैः परिपीड्यमानः रुजातुरः लोकः हर्षम् उपैति।

**अर्थः** - एवं पृच्छानन्तरं सः रथस्य चालकः उवाच - हे कुमार! एषस्तु (पूर्ववर्णितः) साधारणः दोषः वर्तते। एवं रीत्या रोगैः पीडाम् अनुभवन्नपि कष्टातुरः संसारः आनन्दं प्राप्नोति।

**12. ततस्तथा गच्छति राजपुत्रे तैरेव देवैर्विहितो गतासुः।**
**तं चैव मार्गे मृतमुह्यमानं सूतः कुमारश्च ददर्श नान्यः॥**

**अन्वयः** - ततः तथा राजपुत्रे गच्छति तैः एव देवैः मार्गे गतासुः विहितः। तं च मृतम् उह्यमानम् सूतः कुमारः च एव ददर्श अन्यः न (ददर्श)।

**अर्थः** - ततः पुनः नगरभ्रमणावसरे राजपुत्रः गच्छति तदा ते एव देवाः मार्गे निष्प्राणं शरीरम् अवास्थापयन्। तं निर्जीवदेहं वहन्तं केवलं सूतः कुमारः च ददर्श न अन्यः कोऽपि ददर्श।

**13. ततः प्रणेता वदति स्म तस्मै सर्वप्रजानामिदमन्तकर्म।**
**हीनस्य मध्यस्य महात्मनो वा सर्वस्य लोके नियतो विनाशः।**

**अन्वयः** - ततः प्रणेता तस्मै वदति स्म सर्वप्रजानाम् इदम् अन्त्यकर्म लोके हीनस्य मध्यस्य वा महात्मनः सर्वस्य विनाशः नियतः।

**अर्थः** - संसारदुःखदर्शनानन्तरं सारथिः सिद्धार्थम् अवदत् - संसारे सर्वप्रजानाम् अन्तिमकर्म नाम मृत्युः एव भवति तद् निम्नस्य मध्यस्य वा महात्मनः भवेत् तत्तु निश्चितमेव।

**14. इयं च निष्ठा नियता प्रजानां प्रमाद्यति त्यक्तभयश्च लोकः।**
**मनांसि शङ्के कठिनानि नृणां स्वस्थास्तथाह्यध्वनि वर्तमानाः॥**

**अन्वयः** - प्रजानाम् इयं निष्ठा नियता च त्यक्तभयः लोकः प्रमाद्यति शङ्के नृणां मनांसि कठिनानि हि अध्वनि वर्तमानाः तथा स्वस्थाः।

**अर्थः** - जनानाम् एतादृशी (मरणशीला) स्थितिः निश्चिता। तथापि संसारे जनाः भयमुक्ताः प्रमादं कुर्वन्ति इति विचारयामि। अतः मानवानां मनांसि कठिनानि सन्ति। यतो हि मृत्युः निश्चितोऽस्ति तथापि जनाः स्वस्थाः सन्ति। इति आश्चर्यम्।

**शब्दार्थाः**

निशम्य = अवगम्य
जाज्वल्यमानम् = प्रकाशमानम्
निर्भमिरे = निर्माणं चकार
ऊर्ध्वोन्मुखाश्चैनमुदीक्षमाणाः = उपरिविक्षमाणाः
शुद्धाधिवासः = शुद्धनिवासवसन्तः
निष्कम्पनिविष्टदृष्टिः = अनिमेषस्थिरदृष्टिः

संग्राहकम् = रथचालकम्

हन्त्री = हनन कर्त्री

ससृजुः = सर्जनं चक्रुः

अध्वनि = मार्गे

भ्रूसंवृताक्षः = भृकुट्यावृत्तनेत्रः

व्याधिपरीतदेहं = रोगग्रस्तशरीरम्

रूजातुरः = कष्टातुरः

## सन्धिः

ऊर्ध्वोन्मुखाश्चैनमुदीक्षमाणा = ऊर्ध्व + उन्मुखाः + च + एनम् + उदीक्षमाणा

नान्यभावात् = न + अन्यभावात्।

क्षितिपात्मजस्य = क्षितिप + आत्मजस्य।

जरयाभिभूतम् = जरया + अभिभूतम्

नरोऽभ्युपेतः = नरः + अभ्युपेतः।

विक्रियैषा = विक्रिया + एषा।

रिपुरिन्द्रियाणाम् = रिपुः + इन्द्रियाणाम्।

अथापरम् = अथ + अपरम्

ससृजुर्मनुष्यम् = ससृजुः + मनुष्यम्

शौद्धोदनिस्तद्गतदृष्टिरेव = शौद्धोदनिः + तद्गतदृष्टिः + एव।

स्थूलोदरः = स्थूल + उदरः।

श्वासचलच्छरीरः = श्वासचलत् + शरीरः।

अम्बेति = अम्ब + इति।

तैरेवदेवैर्विहितो गतासुः – तैः + एव + देवैः + विहितः + गतासुः।

कुमारश्च = कुमारः + च।

नान्यः = न + अन्यः।

त्यक्तभयश्च = त्यक्तभयः + च।

स्वस्थास्तथाह्यध्वनि = स्वस्थाः + तथा, हि + अध्वनि

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) प्रस्तुतपद्यानि अश्वघोषस्य कस्मात् ग्रन्थात् उद्धृतानि सन्ति?

(क) सौन्दरानन्दः (ख) बुद्धचरितम् (ग) शारिपुत्रप्रकरणम् (घ) बुद्धस्य विहारः

(2) अश्वघोषस्य दन्तकथा केन राज्ञा सह सम्बद्धा वर्तते?

(क) राजा अशोकः (ख) कनिष्कः (ग) नन्दः (घ) शुद्धोदनः

(3) अश्वघोषस्य निष्ठा कस्मिन् सम्प्रदाये आसीत्?

(क) शैवे (ख) बौद्धे (ग) जैने (घ) वैष्णवे

(4) अन्तर्गृहे अवरुद्धः सिद्धार्थः कीदृशः प्रतिभाति?

(क) नाग इव (ख) व्याघ्र इव (ग) हंस इव (घ) सिंह इव

(5) कुमारं पथि वीक्षमाणाः स्त्रियः कुत्र गन्तुकामाः सन्ति?

(क) मार्गम् (ख) ऊर्ध्वम् (ग) गाम् (घ) वनम्

(6) देवाः सिद्धार्थस्य संचोदनार्थं कीदृशं नरं निर्ममिरे?

(क) मृतम् (ख) व्याधिग्रस्तम् (ग) जीर्णम् (घ) संन्यस्तम्

(7) रूपस्य हन्त्री का?

(क) सम्पत्तिः (ख) जरा (ग) चिन्ता (घ) व्याधिः

(8) अम्ब! इति करुणं वाचं ब्रुवाणः कः आसीत्?

(क) वृद्धः (ख) रोगी (ग) सारथिः (घ) सिद्धार्थः

(9) अश्वघोषस्य कति ग्रन्थाः सन्ति?

(क) 3 (ख) 4 (ग) 5 (घ) 2

(10) अश्वघोषः पूर्वाश्रमे कः आसीत्?

(क) ब्राह्मणः (ख) क्षत्रियः (ग) वैश्यः (घ) शूद्रः

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) कुमारं दृष्ट्वा स्त्रियः शनैः किमवोचन्?

(2) कविना जरा कीदृशी वर्णिता?

(3) रोगिजनः कीदृशः दृश्यते?

(4) मृतम् उह्यमानं कः ददर्शः?

(5) अश्वघोषस्य मातुर्नाम किम्?

(6) अश्वघोषस्य जननं कुत्र आसीत्?

(7) अश्वघोषस्योपदेशकथनावसरे अश्वाः किं कृतवन्तः?

**3. पञ्चवाक्यैः प्रश्नानाम् उत्तराणि लिखत।**

(1) सारथिसिद्धार्थयोः संवादं लिखत।

(2) शीर्षकस्य सार्थकतां साधयतु।

(3) सिद्धार्थे वैराग्यं जनयितुं देवानां भूमिकां निरूपयन्तु।

**4. सन्धिविच्छेदं कुरुत।**

(1) नरोऽभ्युपेतः।

(2) रिपुरिन्द्रियाणाम्।

(3) ससृजुर्मनुष्यम्।

(4) श्वासचलच्छरीरः।

(5) तैरेवदेवैर्विहितो गतासुः

**5. श्लोकपूर्तिं कुरुत।**

(1) परं तु .......... क्षितिपात्मजस्य।

(2) रूपस्य हन्त्री .......... ययैष भग्नः।

(3) स्थूलोदरः .......... नरः क एषः।

(4) ततस्तथा .......... ददर्श नान्यः।

(5) इयं च निष्ठा .......... वर्तमानाः।

**छात्रप्रवृत्तिः**

अश्वघोषस्य अन्यग्रन्थाणां परिचयो विधेयः।

**अध्यापकप्रवृत्तिः**

अध्यापकाः बुद्धचरितस्य सम्पूर्णकथया छात्रान् बोधयेयुः। कविपरिचयोऽपि विस्तरेण देयः।

# 5

# गीतोपदेशः-2

**प्रस्तावना**

संस्कृतवाङ्मये श्रीमद्भगवद्गीतायाः स्थानं महत्त्वपूर्णं वर्तते। अस्यां गीतायां भगवान् श्रीकृष्णः युद्धार्थम् उपस्थितम् अर्जुनम् उपदिशति। श्रीकृष्णस्य मार्मिकवचोभिः प्रेरितः अर्जुनः युद्धार्थं सिद्धः भवति। अस्याः गीतायाः उपदेशात्मकाः केचन श्लोकाः अत्र प्रस्तुताः सन्ति।

1. **जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।**
   **तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥ 2-27॥**

   **अन्वयः** - जातस्य हि मृत्युः ध्रुवः, मृतस्य च जन्म ध्रुवम्। तस्मात् अपरिहार्ये अर्थे त्वम् शोचितुम् न अर्हसि।

   **भावार्थः** - यस्य जन्म भवति तस्य मरणं निश्चितम् अस्ति तथा यस्य मरणं भवति तस्य जन्म अपि निश्चितम् अस्ति। अतः (हे अर्जुन!) अस्मिन् अनिवार्ये जन्मनि मरणे च त्वं शोकं कर्तुं न शक्नोषि।

2. **नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।**
   **न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥ 2-23॥**

   **अन्वयः** - एनम् (आत्मानं) शस्त्राणि न छिन्दन्ति, एनं पावकः न दहति, एनम् आपः न क्लेदयन्ति न च मारुतः शोषयति।

   **भावार्थः** - हे अर्जुन! एनम् आत्मानं शस्त्राणि न छिन्दन्ति।

   अग्निः न दहति, जलं न क्लिद्यति, वायुः न शोषयति।

3. **कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
   **मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥ 2-47॥**

   **अन्वयः** - ते अधिकारः कर्मणि एव, फलेषु कदाचन मा। (त्वं) कर्मफले हेतुः मा भूः, ते सङ्गः अकर्मणि मा अस्तु।

   **भावार्थः** - हे अर्जुन! त्वं कर्म एव कुरु। कर्मणि एव तव अधिकारः अस्ति, फलेषु, कदापि न। पुनश्च त्वं कर्मणः फलस्य हेतुः अपि न भव। (यदि फले अधिकारः नास्ति, तर्हि किमर्थं कर्म कुर्याम् इति विचारे सति) तव बुद्धिः अकर्मणि अपि न भवतु।

4. **यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
   **अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम्॥ 4-7 ॥**

   **अन्वयः** - (हे) भारत! यदा यदा हि धर्मस्य ग्लानिः (तथा) अधर्मस्य अभ्युत्थानं भवति तदा अहम् आत्मानं सृजामि।

   **भावार्थः** - हे अर्जुन! अस्मिन् संसारे यदा यदा धर्मस्य हानिः भवति अधर्मस्य वृद्धिः च भवति तदा अहं स्वयम् अवताररूपेण आत्मानं सृजामि, अवतारं धृत्वा आगच्छामि इत्यर्थः।

5. **निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः।**
   **द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत्॥ 15-5॥**

   **अन्वयः** - निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः सुखदुःखसंज्ञैः द्वन्द्वैः विमुक्ताः अमूढाः तत् अव्ययं पदं गच्छन्ति।

**भावार्थः** - ये मान-मोह-रहिताः भवन्ति, यैः सङ्गादोषाः जिताः, ये नित्यम् अध्यात्मरताः सन्ति, येषां कामनाः इच्छाः विनिवृत्ताः (विनिर्गताः) सन्ति, ये च सुखदुःखादिभिः द्वन्द्वैः विमुक्ताः सन्ति, ये अमूढाः (पण्डिताः, = पूर्वोक्ताः) भवन्ति ते एव पुरुषोत्तमस्य अविनाशि स्थानं प्राप्नुवन्ति।

6. **क्रोधाद्भवति सम्मोहः सम्मोहास्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति॥ 2-63॥**

**अन्वयः** - क्रोधात् सम्मोहः भवति, सम्मोहात् स्मृतिविभ्रमः (भवति), स्मृतिभ्रंशाद् बुद्धिनाशः (भवति), बुद्धिनाशात् (स्वयम्) प्रणश्यति।

**भावार्थः** - क्रोधात् सम्मोहः जायते। सम्मोहात् स्मृतिः भ्रष्टा भवति। यदा स्मृतेः भ्रंशः भवति तदा बुद्धेः नाशः भवति। बुद्धिनाशे सति स्वयमपि नष्टः भवति। विनाशस्य कारणं क्रोधः अस्ति अतः यत्नेन क्रोधः वारणीयः इति भावः।

7. **दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।**
**देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्॥ 17-20॥**

**अन्वयः** - यत् दानं दातव्यम् इति अनुपकारिणे देशे काले पात्रे च दीयते तत् दानं सात्त्विकं स्मृतम्॥

**भावार्थः** - 'दानं दातव्यम्' इति निश्चयेन सह यत् दानम् अनुपकारिणे = यः कमपि उपकारं न करोति अथवा यस्य प्रत्युपकारः न आवश्यकः, तस्मै दीयते तथा योग्यकाले योग्यदेशे योग्याय पात्राय च दीयते तत् दानं सात्त्विकं दानं कथ्यते।

8. **अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥ 17-15॥**

**अन्वयः** - यत् वाक्यम् अनुद्वेगकरं सत्यं प्रियहितं च (भवति) स्वाध्यायाभ्यसनं च (भवति) (तत्) वाङ्मयं तपः उच्यते।

**भावार्थः** - येन वाक्येन कस्यापि उद्वेगः दुःखं वा न भवेत्, यत् वाक्यं सत्यं, प्रियं हितकारि च भवति तथैव स्वाध्याय-अभ्यासयुक्तं भवति तत् वाक्यं स्वाध्यायः अभ्यासश्च, वाङ्मयं = वाचः तपः उच्यते।

## शब्दार्थाः

जातस्य = उत्पन्नस्य (જન્મ પામેલાનું)
अपरिहार्ये = अनिषेधे (જેનો પરિહાર ન થઈ શકે તેવા (જન્મ-મરણમાં))
शोचितुम् - शोकाय (શોક કરવા માટે)
दहति = ज्वलयति (સળગાવે છે)
क्लेदयन्ति = आर्द्रयन्ति (ભીંજવે છે)
शोषयति = સુકાવે છે.
कदाचन = कदाचिद् (કદાપિ)
ग्लानिः = दुःखम् (હ્રાસ, અધોગતિ)
सृजामि = સર્જું છું.
मृत्युः = मरणम् (મરણ)
छिन्दन्ति = छेदनं कुर्वन्ति (છેદે છે, ભેદે છે)
पावकः = वह्निः (અગ્નિ)
आपः = जलम् (પાણી)
मारुतः = समीरः (પવન)
कर्मफलहेतुः = કર્મના ફળનું કારણ
अभ्युत्थानम् = उत्कर्षः (ઉત્થાન, ઊર્ધ્વગતિ)
निर्मानमोहाः = માન-મોહથી રહિત
अध्यात्म-नित्याः = નિત્ય અધ્યાત્મમાં સંલગ્ન
अमूढाः = પંડિતો, अमूढाः = ज्ञातारः

जितसङ्गदोषाः = સંગના દોષોને જીતનારા

अव्ययम् = અવિનાશી

स्मृतिविभ्रमः = સ્મૃતિશક્તિનો હ્રાસ

दातव्यम् = આપવું જોઈએ

अनुपकारिणे = उपकारहीने (ઉપકાર ન કર્યો હોય અથવા ઉપકારની આશા ન હોય તેને)

देशे = योग्यस्थाने (યોગ્ય સ્થળે)

पात्रे = યોગ્ય પાત્રમાં

वाङ्मयम् = વાણીથી સંબંધિત, વાચિક

विनिवृत्तकामाः = कामनारहिताः (મુક્ત)

आसक्तिः = सम्मोहः = સંસાર પ્રત્યે વધારે લાગણીશીલ

प्रणश्यति = નાશ પામે છે.

दीयते = અપાય છે, આપવામાં આવે છે.

काले = યોગ્ય સમયે

सात्त्विकम् = સત્ત્વગુણ યુક્ત

स्वाध्यायाभ्यसनम् = સ્વાધ્યાય તથા અભ્યાસ

अनुद्वेगकरम् = ઉદ્વેગ ઉત્પન્ન ન કરે એવું

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) संस्कृतवाङ्मये श्रीमद्भगवद्गीतायाः स्थानं कीदृग् वर्तते?

(क) भगवद्पूर्णम् (ख) सम्पूर्णम् (ग) महत्त्वपूर्णम् (घ) भावपूर्णम्

(2) अर्जुनः कीदृशे अर्थे शोचितुं नार्हति?

(क) अपरिगण्ये (ख) अपरिहार्ये (ग) अपरिमिते (घ) अविदिते

(3) आत्मानं के न क्लेदयन्ति?

(क) वाताः (ख) अग्नयः (ग) कलुषानि (घ) आपः

(4) अस्माकम् अधिकारः कुत्रास्ति?

(क) फले (ख) कर्मणि (ग) सेवायाम् (घ) संसृतौ

(5) जितसङ्गदोषाः इति केषां विशेषणम्?

(क) मूढानाम् (ख) मूकानाम् (ग) अमूढानाम् (घ) अमन्दानाम्

(6) क्रोधात् किं भवति?

(क) मन्युः (ख) सम्मोहः (ग) कोपः (घ) मत्सरः

(7) कीदृग् वाक्यं वक्तव्यम्?

(क) अनुद्वेगकरम् (ख) उद्वेगकरम् (ग) दुःखकरम् (घ) कठोरम्

(8) वाङ्मयं किम् उच्यते?

(क) शमः (ख) दमः (ग) नियमः (घ) तपः

(9) अमूढाः कीदृक् पदं गच्छन्ति?

(क) अव्ययम् (ख) अनित्यम् (ग) अजीर्णम् (घ) अयोग्यम्

(10) श्रीकृष्णः किमर्थम् उपस्थितम् अर्जुनम् उपदिशति?

(क) पठनार्थम् (ख) युद्धार्थम् (ग) यजनार्थम् (घ) यात्रार्थम्

**2. अधोलिखित-प्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(1) कस्य जन्म ध्रुवम् अस्ति ?

(2) कः आत्मानं न दहति ?

(3) कुत्र सङ्गः मास्तु ?

(4) कस्मात् बुद्धिनाशः भवति ?

(5) सात्त्विकं दानं कस्मै दीयते ?

**3. पञ्चवाक्यै उत्तरं लिखत।**

(1) कीदृशाः जनाः अव्ययं पदं गच्छन्ति ?

(2) आत्मनः अविनाशित्वं श्लोकानुसारं लिखत।

(3) सात्त्विकदानस्य लक्षणं लिखत।

**4. सन्धिविच्छेदं कुरुत।**

(1) मृत्युर्ध्रुवम्

(2) अपरिहार्येऽर्थे

(3) क्लेदयन्त्यापः

(4) तदाऽऽत्मानम्

(5) गच्छन्त्यमूढाः

(6) तद्दानम्

**5. अधोलिखितक्रियापदानाम् अर्थं लिखत।**

अर्हसि, दहति, शोषयति, अस्तु, सृजामि, गच्छन्ति, प्रणश्यति, उच्यते।

**6. अधोलिखितशब्दानां विभक्तिं वचनं च लिखत।**

शस्त्राणि, आपः, मारुतः, कर्मणि, आत्मानम्, द्वन्द्वैः, बुद्धिनाशात्, देशे, तपः।

**7. श्लोकपूर्तिं कुरुत।**

(1) नैनं छिन्दन्ति ......... मारुतः।

(2) कर्मण्येवाधिकारस्ते ......... अकर्मणि।

(3) निर्मानमोहा ......... पदमव्ययं तत्।

(4) अनुद्वेगकरं ......... तप उच्यते।

**छात्रप्रवृत्तिः**

जीवनोपयोगिनः अन्यान् अपि गीतायाः श्लोकान् अन्विष्य अर्थावबोधं कुर्युः।

**अध्यापकप्रवृत्तिः**

छात्रैः सह उपविश्य योगकर्मादिविषयाणां सन्दर्भग्रन्थमाध्यमेन विचारविमर्शं कुर्युः।

●

# 6

# बालसुभाषितानि

विशाले संस्कृतसाहित्ये सुभाषितानाम् अतीव महत्त्वपूर्णं स्थानम् अस्ति। संस्कृते सुभाषितरूपेण अमूल्यानि रत्नानि: नरैः प्राप्तानि सन्ति। उच्यते खलु –

**पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।**
**मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते॥**

सुभाषितानि अस्माकं जीवनस्य सर्वावस्थाभिः सह सम्बद्धानि भवन्ति। कस्मिन् काले किं कर्तव्यं, किं च न इति सुभाषितानि साधु अस्मान् उपदिशन्ति। सुष्ठु भाषितानि सुभाषितानि उच्यन्ते। येन वयं प्रेरणां प्राप्नुमः, जीवनयापनस्य उत्तमं मार्गं पश्यामः, मानवजन्म किमर्थमिति ज्ञानं च लभेमहि तत् सुभाषितम् एव वर्तते। अत्र कानिचन सुभाषितानि छात्राणाम् उपकाराय महते लाभाय च प्रदत्तानि सन्ति।

1. **पुस्तकस्था तु या विद्या परहस्तगतं धनम्।**
**कार्यकाले समुत्पन्ने न सा विद्या न तद् धनम्॥ 1॥**

**अन्वयः** – या विद्या पुस्तकस्था (यत्) धनं परहस्तगतम् (भवति) कार्यकाले समुत्पन्ने (सति) न सा विद्या, न तद् धनम्।

**भावार्थः** – पुस्तके स्थिता विद्या अन्यस्य हस्ते स्थितं धनं च यदा आवश्यकता भवति तदा उपयोगि न भवति। अतः विद्या धनम् च अस्माकं सन्निधौ एव स्यात्।

2. **विद्या ददाति विनयं विनयाद्याति पात्रताम्।**
**पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्॥ 2॥**

**अन्वयः** – विद्या विनयं ददाति, विनयात् पात्रतां याति, पात्रत्वात् धनम् आप्नोति, धनात् धर्मं (प्राप्नोति) ततः सुखम् (प्राप्नोति)।

**भावार्थः** – विद्या मनुष्येभ्यः विनयं ददाति, विनयेन मानवः पात्रतां याति, सुपात्रं भवति। पात्रतां प्राप्य मानवः धनं लभते, धनेन धर्माचरणं करोति, तेन धर्माचरणेन सुखं प्राप्नोति। सर्वेषां मूलरूपा विद्या अस्ति इति भावः।

3. **अलसस्य कुतो विद्या अविद्यस्य कुतो धनम्।**
**अधनस्य कुतो मित्रममित्रस्य कुतः सुखम्॥ 3॥**

**अन्वयः** – अलसस्य विद्या कुतः? अविद्यस्य धनं कुतः? अधनस्य मित्रं कुतः? अमित्रस्य सुखं कुतः?

**भावार्थः** – यः आलस्यं करोति तस्य विद्या न भवति, यस्य विद्या नास्ति सः धनं न प्राप्नोति, यस्य धनं नास्ति सः मित्रविहीनः भवति, यस्य मित्रं न भवति तस्य सुखम् अपि न भवति। अतः मनुष्येण आलस्यं न कर्तव्यम् इति भावः।

4. **सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखम्।**
**सुखार्थी चेत् त्यजेद्विद्यां विद्यार्थी चेत् त्यजेत् सुखम्॥ 4॥**

**अन्वयः** – सुखार्थिनः विद्या कुतः? विद्यार्थिनः सुखं नास्ति। सुखार्थी चेत् विद्यां त्यजेत्, विद्यार्थी चेत् सुखं त्यजेत्॥

**भावार्थः** – यः सुखम् इच्छति सः विद्यां प्राप्तुं न शक्नोति। विद्याम् इच्छति सः सुखं न प्राप्नोति। अतः सुखम् इच्छति चेत् विद्यां त्यजेत्, विद्याम् इच्छति चेत् सुखं त्यजेत्।

**5. हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम्**
**श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम्॥ 5॥**

**अन्वयः** - हस्तस्य भूषणं दानम् (अस्ति), कण्ठस्य भूषणं सत्यम् (अस्ति), श्रोत्रस्य भूषणं शास्त्रम् (अस्ति), भूषणैः किं प्रयोजनम्?

**भावार्थः** - मनुष्यस्य हस्तस्य आभूषणं दानम् अस्ति, कण्ठस्य आभूषणं सत्यवचनम् अस्ति, कर्णस्य भूषणं शास्त्रश्रवणम् अस्ति। एतानि आभूषणानि एव नरं शोभयन्ति, अन्यानि आभूषणानि निष्प्रयोजनानि सन्ति इति भावः।

**6. क्षणशः कणशश्चैव विद्यामर्थं च साधयेत्**
**क्षणे नष्टे कुतो विद्या कणे नष्टे कुतो धनम्॥ 6॥**

**अन्वयः** - क्षणशः विद्यां, कणशः अर्थम् च साधयेत्। क्षणे नष्टे विद्या कुतः? कणे नष्टे धनं कुतः?

**भावार्थः** - मनुष्यः प्रत्येकं क्षणस्य व्ययम् अकृत्वा विद्यां प्राप्नुयात्। कणस्य (प्रत्येकं रूप्यकस्य) व्ययम् अकृत्वा धनं प्राप्नुयात्। विद्या क्षणत्यागे न प्राप्यते, धनं च कणत्यागे न प्राप्यते। एकम् एकं बिन्दुं सङ्गृह्य तडागः भवति अतः विद्याप्राप्तौ अर्थप्राप्तौ च धैर्यं धरणीयम्।

**7. अजात-मृत-मूर्खाणां वरमाद्यौ न चान्तिमः।**
**सकृत्दुःखकरावाद्यावन्तिमस्तु पदे पदे॥ 7॥**

**अन्वयः** - अजात-मृत-मूर्खाणाम् आद्यौ वरम्, अन्तिमः च न। आद्यौ सकृत् दुःखकरौ, अन्तिमः तु पदे पदे (दुःखकरः)।

**भावार्थः** - अजातः = यस्य जन्म न जातम्, मृतः = यस्य मरणम् अभवत्, मूर्खः = मूढमतिः च, एतेषु त्रिषु आद्यौ द्वौ अजातः मृतः च श्रेष्ठौ स्तः, अन्तिमः मूर्खः न श्रेष्ठः। यतो हि आद्यौ द्वौ एकवारम् एव दुःखं दत्तः, मूर्खः तु पदे पदे दुःखं ददाति इति भावः।

**8. आशा नाम मनुष्याणां काचिदाश्चर्यशृङ्खला।**
**यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति पङ्गुवत्॥ 8॥**

**अन्वयः** - मनुष्याणाम् आशा नाम काचित् आश्चर्यशृङ्खला (अस्ति) यया बद्धाः प्रधावन्ति, मुक्ताः पङ्गुवत् तिष्ठन्ति।

**भावार्थः** - आशायाः शृङ्खला मनुष्याणाम् आश्चर्यकारिणी अस्ति। शृङ्खलया बद्धाः तिष्ठन्ति, शृङ्खलया मुक्ताः गन्तुं शक्नुवन्ति किन्तु आशारूपशृङ्खलया ये बद्धाः ते धावन्ति, ये मुक्ताः = आशारहिताः ते पङ्गुवत् तथैव तिष्ठन्ति। आशायुक्ताः एव सफलाः भवन्ति, आशारहिताः न इति भावः।

**9. शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।**
**साधवो न हि सर्वत्र चन्दनं न वने वने॥ 9॥**

**अन्वयः** - माणिक्यं शैले शैले न (भवति), मौक्तिकं गजे गजे न (भवति), साधवः सर्वत्र न (भवन्ति), चन्दनं वने वने न (भवति)।

**भावार्थः** - प्रत्येकं पर्वते माणिक्य-रत्नं न भवति, कुत्रचित् एव भवति। तथैव प्रत्येकं गजे मौक्तिकं न भवति। सर्वत्र सज्जनाः न भवन्ति। प्रत्येकं वने चन्दनं न भवति। श्रेष्ठ-वस्तूनि दुर्लभानि भवन्ति इति भावः।

**10. अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः**
**स्वकार्यमुद्धरेत् प्राज्ञः स्वार्थभ्रंशो हि मूर्खता॥ 10॥**

**अन्वयः** - प्राज्ञः अपमानं पुरस्कृत्य मानं तु पृष्ठतः कृत्वा स्वकार्यम् उद्धरेत्, हि स्वार्थभ्रंशः मूर्खता।

**भावार्थः** - बुद्धिमान् जनः स्वस्य अपमानं न गणयित्वा, मानं च पृष्ठतः निधाय स्वकार्यं यथाकथमपि साधयेत्। स्वकार्यस्य हानिः मूर्खता एव, अतः यावत् कार्यं न सिद्ध्यति तावत् मानम् अपमानं च न गणयेत् इति भावः।

## शब्दार्था:

| | | |
|---|---|---|
| पात्रतां = योग्यतां | अलसस्य = प्रमादयुक्त्य | शैले = पर्वते |
| प्राज्ञः = विद्वान् | प्रयोजनं = हेतुः | मूढैः = मूर्खैः |
| पाषाणः = शिला | | |

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) कीदृशी विद्या कार्यकाले उपयोगिनी न भवति?

(क) मस्तकस्था (ख) पुस्तकस्था (ग) हृदयस्था (घ) हस्तस्था

(2) धनात् किं प्राप्यते?

(क) विवेकः (ख) वस्त्रम् (ग) धर्मः (घ) पात्रत्वम्

(3) कस्य पुरुषस्य विद्या नास्ति?

(क) अलसस्य (ख) चतुरस्य (ग) प्रसिद्धस्य (घ) विवेकिनः

(4) विद्याम् इच्छति चेत् किं त्यजेत्?

(क) धर्मम् (ख) गृहम् (ग) धनम् (घ) सुखम्

(5) श्रोत्रस्य भूषणम् ............. अस्ति।

(क) गानम् (ख) ध्यानम् (ग) कुण्डलम् (घ) शास्त्रम्

(6) आश्चर्यशृङ्खला का?

(क) आशा (ख) निराशता (ग) वाणी (घ) पृथ्वी

**2. एकैकवाक्येन उत्तरत।**

(1) कीदृशं धनं कार्यकाले उपयोगि न भवति? (2) विद्या किं ददाति?

(3) सुखार्थी किं त्यजेत्? (4) कण्ठस्य भूषणं किम्?

(5) पदे पदे दुःखस्य कारणं कः? (मूर्खः)

**3. द्वि-त्रवाक्यैः उत्तरत।**

(1) प्राज्ञः किं किं कृत्वा स्वकार्यं साधयेत्? (2) नराणां वास्तविकानि भूषणानि कानि सन्ति?

(3) आशा किमर्थम् आश्चर्यं जनयति?

**4. विस्तरेण उत्तरं लिखत।**

(1) सुभाषितानुसारं विद्यायाः महत्त्वम्।

(2) श्रेष्ठ-वस्तूनि दुर्लभानि सन्ति इति सुभाषितानुसारं लिखत।

**5. श्लोकपूर्तिं कुरुत।**

(1) अलसस्य कुतो विद्या...। (2) हस्तस्य भूषणं दानम्...।

(3) अजात-मृत-मूर्खाणाम्...। (4) आशा नाम मनुष्याणाम्...।

(5) अपमानं पुरस्कृत्य...।

**छात्रप्रवृत्तिः**

छात्राः प्रेरणादायकानि अन्यानि अपि सुभाषितानि अवगच्छेयुः।

**अध्यापकप्रवृत्तिः**

अध्यापकाः सुभाषितानुसारं व्यावहारिकं बोधं कारयेयुः।

# 7

# प्रहेलिका

**प्रस्तावना**

संस्कृतसाहित्यं प्राचीनतमं वैविध्यपूर्णं सहृदयानां च रसास्वादकरं वर्तते। तस्मिन् साहित्ये काव्यम्, खण्डकाव्यम्, महाकाव्यम्, चम्पूकाव्यम्, गद्यकाव्यम्, नाटकम्, शतकम्, कुलकम्, इत्यादयः रचनाधितभेदाः सन्ति।

तत्रापि अन्योक्तयः प्रहेलिकाश्च इति द्वौ भेदौ काञ्चन विशिष्टतां भजतः। अन्योक्तयः व्यङ्ग्यप्रधानाः पशुपक्षि उद्दिष्टाश्च भवन्ति। प्रहेलिकाः गुप्ताः (कर्तृ-कर्म-क्रियाधारेण) बुद्धि-परीक्षकाराः तार्किकक्षमता विवर्धिकाः च भवन्ति। प्रहेलिकानां अध्ययनेन ''ज्ञानेन सह मनोरञ्जनम्'' इति हेतोरपि पूर्तिः भवति। एतादृशीनां दशप्रहेलिकानाम् अभ्यासं अस्मिन् पाठे वयं करिष्यामः।

1. **अपदो दूरगामी च साक्षरो न च पण्डितः।**
   **अमुख स्फुटवक्ता च यो जानाति स पण्डितः॥**

   **अन्वयः** अपदः दूरगामी च साक्षरः च न पण्डितः अमुखः स्फुटवक्ता च यः जानाति सः पण्डितः।

   **भावार्थः** - चरणहीनः अपि सः दूरं गच्छति अक्षरयुक्तः अपि पण्डितः नास्ति, मुखरहितः अपि स्पष्टं भाषते (स्पष्टा अभिव्यक्तिं करोति) एतं यः जानाति सः विद्वान् अस्ति।

   उत्तरम् लिखितपत्रम्।

2. **एकचक्षुर्न काकोऽयं बिलेच्छुर्न च पन्नगः।**
   **क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः॥**

   **अन्वयः** - अयं एकचक्षुः काकः न बिलेच्छुः न पन्नगः क्षीयते च वर्धते एव (तथापि) न समुद्रः न चन्द्रमाः।

   **भावार्थः** - एकनेत्रः सन् अयं काकः नास्ति, बिलमिच्छुः परन्तु सर्पः नास्ति, क्षयवृद्धि भवतः तथापि सः न च चन्द्रमाः अस्ति। समुद्रोऽपि नास्ति।

3. **नरनारीसमुत्पन्ना सा स्त्री देहविवर्जिता।**
   **अमुखी कुरुते शब्दं जातमात्रा विनश्यति॥**

   **अन्वयः** - नरनारी समुत्पन्ना स्त्री सा देहविवर्जिता, अमुखी शब्दं कुरुते जातमात्रा विनश्यति।

   **भावार्थः** - पुरुषेण स्त्रिया च समुत्पन्नापि सा नारी देहरहिता वर्तते। मुखरहितापि रवं करोति समुत्पन्ना अनुक्षणमेव विनष्टा भवति।

   उत्तरम् - छोटिका (ગુજ. ચપટી)

4. **अनेकसुषिरं वाद्यं कान्तं च ऋषिसंज्ञितम्।**
   **चक्रिणा च सदाराध्यं यो जानाति स पण्डितः॥**

   **अन्वयः** - अनेकसुषिरं वाद्यं कान्तं च ऋषिसंज्ञितं, च चक्रिणा सदाराध्यं (तं) यः जानाति सः पण्डितः।

   **भावार्थः** - अनेकच्छिद्रयुक्तमपि रमणीयं किञ्चनवाद्यमस्ति। कस्यचित् ऋषेः नाम्ना प्रसिद्धम् (वाल्मीकिः) विष्णुना सदा समाराधनीयमस्ति, तत्किम् यः जानाति सः विपश्चित् अस्ति।

   उत्तरम् - वल्मीकः (ગુજ. રાફડો)

5. **कृष्णमुखी न मार्जारी द्विजिह्वा न च सर्पिणी।**
**पञ्चभर्त्री न पाञ्चाली यो जानाति स पण्डितः॥**

**अन्वयः** – कृष्णमुखी मार्जारी न, द्विजिह्वा सर्पिणी च न पञ्चभर्त्री पाञ्चाली (अपि) न यः जानाति सः पण्डितः।

**भावार्थः** – तस्याः मुखं कृष्णं तथापि मार्जारी नास्ति, द्विरसना युक्ता सा सर्पिणी नास्ति। पञ्चपतिवती अस्ति, परं पाञ्चाली नास्ति, इमां यः जानाति सः चतुरः भवति।

उत्तरम् – लेखनी

6. **वृक्षाग्रवासी न च पक्षिराजः त्रिनेत्रधारी न च शूलपाणिः।**
**त्वग्वस्त्रधारी न च सिद्धयोगी जलं च बिभ्रन्न घटो न मेघः॥**

**अन्वयः** – वृक्षाग्रवासी न च पक्षिराजः, त्रिनेत्रधारी न च शूलपाणि। त्वग्वस्त्रधारी च न सिद्धयोगी जलं बिभ्रत् न घटः न च मेघः।

**भावार्थः** – सः वृक्षस्य उपरि निवसति किन्तु पक्षी (गरुड) नास्ति। तस्य त्रीणि नेत्राणि सन्ति किन्तु शंकरः नास्ति। वृक्षस्य त्वचं धरति तथापि सिद्धः वा नास्ति। सः जलं धारयति परं न तु सः कुम्भः न च मेघः अस्ति।

उत्तरम् – नारिकेलम्

7. **वृक्षाग्रवासी न च पक्षिजातिः तृणं च शय्या न च राजयोगे।**
**सुवर्णकायो न च हेमधातुः पुंसश्च नाम्ना न च राजपुत्रः॥**

**अन्वयः** – वृक्षाग्रवासी पक्षिजाति न च तृणं शय्या न राजयोगी सुवर्णकायः च न हेमधातुः च पुंसः नाम्ना न च राजपुत्रः।

**भावार्थः** – तरोः अग्रे वसति परं खगाधिपः नास्ति, पुन्नाम्ना सन्नपि नृपसुतः नास्ति।

उत्तरम् – आम्रफलम्।

8. **श्यामं च वर्तुळाकारं पुन्नामचतुरक्षरम्।**
**शकारादि मकारान्तं यो जानाति स पण्डितः॥**

**अन्वयः** – श्यामं च वर्तुलाकारं पुम् नाम चतुरक्षरम्। शकारादि मकारान्तम् (अस्ति) यः (तं) जानाति सः पण्डितः।

**भावार्थः** – कृष्णः गोलाकारश्च अस्ति तस्य नाम पुंल्लिंगे चतुरक्षरमितमयस्य आद्यः वर्णः ''श'' अन्तिमश्च वर्णः ''म'' इति अस्ति। एतादृशं (पदार्थम्) यः जानाति सः पण्डितः भवति।

उत्तरम् – शालिग्रामः।

9. **अपूर्वोऽयं मया दृष्टः कान्तः कमललोचनः।**
**शोऽन्तरं यो विजानाति स विद्वान् नात्र संशयः॥**

**अन्वयः** – मया अपूर्वः अयं कान्तः कमल लोचनः दृष्टः (यस्य) अन्तरं ''शो'' (वर्णअस्ति) यः विजानाति सः विद्वान् अत्र संशयः न।

**भावार्थः** – मया दर्शकेन (केनचित् जनेन वा) अयं अकारपूर्वः प्रियः पद्मनेत्रः निरीक्षितः यस्य मध्ये ''शो'' इति (वर्णः) अस्ति इदं यः जानाति सः विद्वान् अत्र संशय नास्ति।

उत्तरम् – अशोकः।

**10. अस्ति ग्रीवा शिरो नास्ति द्वौ भुजौ करवर्जितौ।**
**सीताहरण सामर्थ्यो न रामो न च रावणः॥**

**अन्वयः** - ग्रीवा अस्ति शिरः नास्ति, द्वौ भुजौ करवर्जितौ (स्तः) सीताहरण सामर्थ्यो न रामः, न च रावणः।

**भावार्थः** - कण्ठः वर्तते परं मस्तकं नास्ति द्वौ भुजौ तु स्तः परं हस्तरहितौ वर्तते। सीतायाः हरणसमर्थोऽपि रामः न रावणः अपि नास्ति।

उत्तरम् - निचोलकम्। (ગુજ. ઝભ્ભો)

## शब्दार्थाः

स्फुटवक्ता = स्पष्टवक्ता
चकी = विष्णुः
सुषिरम् = विवरं-रन्ध्रः
ग्रीवा = कण्ठः
पन्नगः = सर्पः
पञ्चभर्त्री = पञ्चपतियुता
बिलेच्छुः = बिलं इच्छति, सः
आराध्यः = पूज्यः
शूलपाणिः = यस्य हस्ते त्रिशूलमस्ति (शिवः)
कान्तः = प्रियः
अपदः = पादरहितः
त्वग्वस्त्रम् = वल्कलम्

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) दूरगामी कः वर्तते?
(क) सपदः (ख) अपदः (ग) द्विपदः (घ) चतुष्पदः

(2) पन्नगः किम् इच्छुकः?
(क) फलम् (ख) मूलम् (ग) बिलम् (घ) गृहाम्

(3) क्षयवर्धनशीलः कः अस्ति?
(क) समुद्रः (ख) सरोवरः (ग) सूर्यः (घ) अग्निः

(4) स्त्री कीदृशी वर्तते?
(क) साक्षरा (ख) अपूर्णा (ग) देहविवर्जिता (घ) निरक्षरा

(5) का जातमात्रा एव विनश्यति?
(क) जलतरङ्गः (ख) चपेटिका (ग) छोटिका (घ) बुदपुदाः

(6) वाद्यं कीदृशं नास्ति?
(क) कान्तम् (ख) बहुछिद्रयुक्तम् (ग) ऋषिसंज्ञितम् (घ) विद्वान

(7) श्यामः वर्तुलाकारश्च कः पदार्थः अस्ति?
(क) प्रस्तरः (ख) कृष्णघटः (ग) शालिग्रामः (घ) मृदङ्गः

(8) लेखनी कीदृशी सती पाञ्चाली नास्ति?
(क) कृष्णमुखी (ख) द्विजिह्वा (ग) पञ्चभर्त्री (घ) बहुभर्त्री

(9) त्वग् वस्त्रधारी सन् अपि किन्नास्ति?
(क) सिद्धयोगी (ख) मेघः (ग) शूलपाणिः (घ) किरातः

(10) तृणमय्यां शय्यायां शेते तथापि किन्नास्ति?
(क) वनवासी (ख) राजयोगी (ग) राजपुत्रः (घ) भिक्षुकः

(11) कीदृशः कान्तः मया दृष्टः ?

(क) अपूर्वः (ख) अपूर्णः (ग) उत्तमः (घ) अधमः

(12) कण्ठे विद्यमाने सति कस्य अभावो वर्तते ?

(क) नेत्रयोः (ख) मस्तकस्य (ग) भुजयोः (घ) उदरस्य

(13) पुंसः नाम्ना प्रसिद्धं फलं किम् ?

(क) कदलीफलम् (ख) आम्रफलम् (ग) दाडिमफलम् (घ) कलिङ्गफलम्

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) सुवर्णकायः सन् आम्रः किन्नास्ति ?

(2) शकारादिमकारान्तं किमस्ति ?

(3) सर्पिणी कीदृशी भवति ?

(4) द्वौ भुजौ केन वर्जितौ स्तः ?

(5) जलं बिभ्रत् किं किन्नास्ति ?

(6) पक्षिराजः कः भवति ?

(7) का अमुखी सत्यपि शब्दं करोति ?

(8) साक्षरः सन् किन्नास्ति ?

(9) चक्रिणा आराधनीयं किमस्ति ?

**3. निम्नलिखितानां प्रश्नानां विस्तृतोत्तराणि लिखत।**

(1) कृष्णमुखी ............. श्लोकस्य भावार्थं लिखत।

(2) वृक्षाग्रवासी न च पक्षिराजः ............. श्लोकार्थं लिखत।

(3) नरनारी समुत्पन्ना ............. श्लोकस्य भावार्थं लिखत।

(4) अपदो दूरगामी ............. श्लोकस्य अर्थं लिखत।

(5) एक चक्षुर्न ............. श्लोकस्य अर्थं लिखत।

**4. सन्धिविच्छेदं कुरुत।**

(1) साक्षरो न (2) सदाराध्यम् (3) एकचक्षुर्न (4) वृक्षाग्रवासी

(5) बिभ्रन्न (6) पुंसश्च (7) अपूर्वोऽयम् (8) बिलेच्छुः

**5. श्लोकपूर्तिं कुरुत।**

(1) अपदो दूर ............ पण्डितः॥ (2) कृष्णमुखी ............ पण्डितः॥

(3) वृक्षाग्रवासी ............ न मेघः॥ (4) अपूर्वोऽयं ............ संशयः॥

**छात्राणांप्रवृत्तिः**

छात्राः परस्परं प्रहेलिकाः पृच्छेयुः।

**अध्यापकप्रवृत्तिः**

प्रहेलिकानां गूढार्थं च बोधयेयुः।

●

# 8

# वृत्तपरिचयः

**प्रस्तावना**

वेदपुरुषस्य कल्पना अस्माकं संस्कृतसाहित्ये कृता वर्तते। तस्य वेदपुरुषस्य षडङ्गानि अर्थात् षट् शास्त्राणि शिक्षादीनि। छन्दः पादौ तु वेदस्य इति शिक्षायां प्रतिपादितम् अस्ति। वेदपुरुषस्य चलनात्मकं कार्यं छन्दःशास्त्रेण नियन्त्रितं भवति। छन्दसोऽपि द्वौ भेदौ स्तः वैदिकं लौकिकं च। छन्दसां प्रतिपादकं शास्त्रं छन्दःशास्त्रम्। तस्य रचयिता अथवा प्रवर्तकः आचार्यपिङ्गलः अस्ति। अत्र छन्दसः सामान्यपरिचयः कतिचन प्रचलितानि छन्दांसि च प्रस्तूयन्ते। तेषां ज्ञानं बालकानां कृते उपकारकं भविष्यति।

**छन्दसां परिचयः**

सामान्यतया छन्दसां द्वौ भेदौ भवतः (1) मात्राछन्दः (2) वर्णछन्दः। येषां छन्दसां संविधानं मात्राभिः विरच्यते तानि मात्राछन्दांसि कथ्यन्ते। यथा - आर्या, पथ्या, विपुला, गीतिः इत्यादीनि। येषां छन्दसां नियमाः वर्णैः अर्थात् गणनियमेन भवन्ति तानि वर्णछन्दांसि कथ्यन्ते। यथा - वसन्ततिलका, उपजातिः, शिखरिणी इत्यादीनि।

**लघुगुरुज्ञानम् -**

उपरि उक्तानां छन्दसां ज्ञानार्थं पूर्वं तु लघुगुरुज्ञानम् आवश्यकम् अस्ति। लघुगुर्वोः लक्षणं यथा -

सानुस्वारो विसर्गान्तो दीर्घः युक्तपरश्च यः।
वा पादान्ते त्वसौ वक्रो ज्ञेयोऽन्यो मात्रिको लृजुः॥

अर्थात् यः वर्णः अनुस्वारयुक्तः भवति, विसर्गयुक्तः भवति, दीर्घस्वरयुक्तः भवति संयुक्तः च भवति सः गुरुः कथ्यते। गुरोः मात्राद्वयं गण्यते। ह्रस्वः वर्णः लघुः उच्यते, तस्य एकमात्रा गण्यते। तथा "रामः", अत्र पूर्ववर्णः दीर्घः अत द्विमात्रिकः, अन्तिमवर्णः विसर्गयुक्तः अतः सः अपि द्विमात्रिकः कथ्यते। पादस्य अन्तिमः वर्णः विकल्पेन लघुः गुरुर्वा मन्यते।

गुरुलघ्वोः चिह्नं देशकालानुसारेण पृथक् पृथक् मन्यते, परन्तु प्रचलितपरम्परामनुसृत्य छन्दःशास्त्रीयग्रन्थानां निर्देशानुसारं निम्नाङ्कितं चिह्नं व्यवहारे दृश्यते–

लघुः - ऋजुमात्रा (।)    गुरुः - वक्रः (ऽ)

**गणपरिचयः**

छन्दसां ज्ञानार्थं गणपरिचयः आवश्यकः। त्रयाणाम् अक्षराणां समूहः एकः गणः भवति। आहत्य अष्टौ गणाः सन्ति। तेषां ज्ञानार्थं प्रसिद्धं सूत्रम् अस्ति - "यमाताराजभानसलगम्" इति। एतत् सूत्रं दशाक्षराणाम् अस्ति। प्रारम्भतः अष्टाक्षराणि गणान् सूचयन्ति। नवमः लकारः लघुः दशमो गकारः गुरुः च इति सूचितं वर्तते। एतेषां यथार्थस्वरूपम् अधोलिखितकोष्टके निर्दिष्टम् अस्ति। सूत्रे निर्दिष्टक्रमेणैव अत्र प्रस्तूयते।

| क्रमः | गणनाम | चिह्नम् | लक्षणम् | मात्रा |
|---|---|---|---|---|
| 1 | यगणः | ।ऽऽ | आदिलघुः | 5 |
| 2 | मगणः | ।ऽऽ | सर्वगुरुः | 6 |
| 3 | तगणः | ।ऽऽ | अन्तलघुः | 5 |

| | | | | |
|---|---|---|---|---|
| 4 | रगणः | ऽ। ऽ | मध्यलघुः | 5 |
| 5 | जगणः | ।ऽ। | मध्यगुरुः | 4 |
| 6 | भगणः | ऽ।। | आदिगुरुः | 4 |
| 7 | नगणः | ।।। | सर्वलघुः | 3 |
| 8 | सगणः | ।।ऽ | अन्तगुरुः | 4 |
| | ल = लघुः | । | | 1 |
| | गम् = गुरुः | ऽ | | 2 |

इत्थम् उपरि निर्दिष्टेषु अष्टसु गणेषु त्रयः ज-भ-स-गणाः चतुर्मात्रिकाः सन्ति। त्रयः य-र-तगणाः पञ्चमात्रिकाः सन्ति। मगणः षाण्मात्रिकः तथा न गणः त्रिमात्रिकः अस्ति। गणपरिचयार्थं कश्चित् प्रसिद्धः श्लोकः अत्र प्रस्तूयते-

मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः॥

अर्थात् त्रिगुरुः मगणः, त्रिलघुः नगणः, आदिगुरुः भगणः, आदिलघुः यगणः, गुरुमध्यगतः जगणः, लमध्यः रगणः, अन्तगुरुः सगणः, अन्तलघुः तगणः इति।

**(1) अनुष्टुप्।**

**लक्षणम्।** **श्लोके षष्ठं गुरु ज्ञेयं, सर्वत्र लघु पञ्चमम्।**
**द्विचतुष्पादयोः ह्रस्वं, सप्तमं दीर्घमन्ययोः॥**

**अर्थः** अनुष्टुप् छन्दसि प्रत्येकं चरणे अष्टौ वर्णाः भवन्ति। तेषु प्रत्येकं चरणे षष्ठः वर्णः गुरुः पञ्चमः वर्णः लघुः च भवति। द्वितीयचतुर्थयोः चरणयोः सप्तमः वर्णः लघुः भवति प्रथमतृतीययोः चरणयोः सप्तमः वर्णः गुरुः च भवति।

उदाहरणम् - **वागर्थाविव सम्पृक्तौ, वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे, पार्वतीपरमेश्वरौ॥**

**(2) तोटकम्।**

**लक्षणम्।** **इह तोटकमम्बुधिसैः प्रथितम्।**

**अथवा**

**वद तोटकमब्धिसकारयुतम्।**

**अर्थः** अम्बुधिः अब्धिः च 4 इति संख्यां सूचयति। यस्मिन् श्लोके प्रत्येकं चरणेषु चत्वारः सगणाः भवन्ति तत् तोटकम् उच्यते।

उदाहरणम् -

**लक्षणम् :** **अधरं मधुरं वदनं मधुरं, नयनं मधुरं हसितं मधुरम्।**
**हृदयं मधुरं गमनं मधुरं, मधुराधिपतेरखिलं मधुरम्॥**

**(3) इन्द्रवज्रा**

**लक्षणम्। स्यादिन्द्रवज्रा यदि तौ जगौ गः।**

**अर्थः** इन्द्रवज्रायाः प्रत्येकं चरणे एकादश वर्णाः भवन्ति। प्रत्येकं चरणे तगणद्वयम्, एकः जगणः, अन्तिमौ द्वौ वर्णौ च गुरू भवतः।

उदाहरणम् - **गोष्ठे गिरिं सव्यकरेण धृत्वा**

**रुष्टेन्द्रवज्राहतिमुक्तवृष्टौ**

**यो गोकुलं गोपकुलञ्च सुस्थं**

**चक्रे स नो रक्षतु चक्रपाणिः॥**

**(4) उपेन्द्रवज्रा**

**लक्षणम्।** **उपेन्द्रवज्रा जतजास्ततो गौ।**

**अर्थः** अस्य छन्दसः पद्येऽपि प्रत्येकं चरणे एकादश वर्णाः भवन्ति। प्रत्येकं चरणे जगणः तगणः जगणः तथा अन्तिमौ द्वौ वर्णौ च गुरू भवतः सा उपेन्द्रवज्रा।

उदाहरणम् - **त्वमेव माता च पिता त्वमेव**

**त्वमेव बन्धुश्च सखा त्वमेव।**

**त्वमेव विद्या द्रविणं त्वमेव**

**त्वमेव सर्वं मम देवदेव॥**

**(5) उपजाति।**

एतच्छन्दः मिश्रम् अस्ति। उपेन्द्रवज्रेन्द्रवज्रयोः मिश्रणेन इदं छन्दः विरच्यते। अत्रापि प्रत्येकं चरणे एकादश वर्णाः भवन्ति।

उदाहरणम् - **अथ प्रजानामधिपः प्रभाते**

**जायाप्रतिग्राहितगन्धमाल्याम्।**

**वनाय प्रीतप्रतिबद्धवत्सां**

**यशोधनो धेनुमृषेर्मुमोच॥**

**स्वाध्यायः**

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) गणाः कति सन्ति?

(क) 04 (ख) 06 (ग) 08 (घ) 10

(2) गुरुवर्णे कति मात्राः भवन्ति?

(क) 01 (ख) 02 (ग) 03 (घ) 04

(3) लघुचिह्नम् कीदृशं भवति?

(क) 0 (ख) ऽ (ग) ँ (घ) ।

(4) अनुष्टुप् छन्दसि प्रत्येकं चरणे कति वर्णाः भवन्ति?

(क) 08 (ख) 10 (ग) 12 (घ) 14

(5) ज-त-जा गुरुद्वयं च कुत्र भवति?

(क) इन्द्रवज्रायाम् (ख) तोटके (ग) उपेन्द्रवज्रायाम् (घ) अनुष्टुपि

(6) मिश्रछन्दः किम्?

(क) तोटकम् (ख) उपजातिः (ग) अनुष्टुप् (घ) इन्द्रवज्रा

**2. एकैकवाक्येन उत्तरत।**

(1) गणसूत्रम् किम्?

(2) सर्वगुरुः कः गणः?

(3) जगणस्य चिह्नसहितं स्वरूपं लिखत।

(4) कस्मिन् गणे सर्ववर्णाः लघवः भवन्ति?

(5) "त्वमेव माता" इति कस्य छन्दसः उदाहरणम्?

**3. अधोलिखितच्छन्दसां लक्षणम् उदाहरणं च लिखत।**

(1) अनुष्टुप्

(2) तोटकम्

(3) इन्द्रवज्रा

**छात्राणांप्रवृत्तिः**

छात्राः अन्येषां छन्दसामपि लक्षणोदाहरणानि गवेषयन्तु।

**अध्यापकप्रवृत्तिः**

अध्यापकाः छात्रमाध्यमेन छन्दसां गानपद्धतिं वर्धयेयुः।

●

गद्यम्

# 9

# एकलव्यस्य गुरुभक्तिः

**प्रस्तावना**

भारतीय संस्कृतेः समृद्धिरूपेण महाभारतादिग्रन्थेषु मानवजीवनस्य उत्कृष्ट-उदाहरणत्वेन महामानवानां, ऋषीणां, तपोधनानाम् उदारचरितानां च जीवनं सदाचरणीयम् उपयुक्तञ्च भवति।

अस्माकं जीवने गुरुभक्तिरपि कल्याणप्रदा भवति। गुरोर्महत्त्वम् ईश्वरापेक्षयाप्यधिकं वर्तते, गुरोः कृते शिष्यस्य सर्वं समर्पणीयं भवति, तस्य उदाहरणरूपेण महाभारते एकलव्यस्य जीवनं सर्वथा स्मरणीयम् अस्ति।

प्रायः अन्तेवासिनः जीवने गुरोरुपकारः आवश्यकः यतो हि गुरुकृपया एव शिष्यस्य लौकिकं श्रेयः सम्पद्येत तेन कारणेन शिष्यस्य यद् समर्पणं स्यात् तद् न्यूनमेव भवति, शिष्यः कदापि अनृणः न भवति, परन्तु एकलव्यस्य गुरुभक्तिरलौकिकी दृश्यते। एकलव्यः गुरोः द्रोणाचार्यस्य पार्श्वे धनुर्विद्याशिक्षणाय गतवान् तदा गुरुणा तिरस्कृतो भूत्वा वनं समागत्य गुरोः मृण्मयीं मूर्तिं संस्थाप्य तत् प्रेरणया उत्तमो धनुर्धरः जातः। तस्यैव एकलव्यस्य अत्र कथा प्रस्तुता वर्तते। अयं प्रसङ्गः विद्यार्थिनां कृते निश्चयेन प्रेरणादायको भविष्यतीति।

भारतदेशे अनेके गुरवः गुरुभक्ताः शिष्याश्च अभवन् तेषाम् सन्निष्ठगुरुभक्तानां प्रसङ्गः यदा आगच्छति तदा ''एकलव्यस्य'' नाम प्रथमं गृह्यते।

---

एकदा सर्वे कौरवपाण्डवाः द्रोणाचार्यात् अस्त्रविद्यां पठन्तः आसन्। तदानीम् अर्जुनस्य नैसर्गिकं कौशलं दृष्ट्वा द्रोणः विचारयति स्म। यथाहं जिष्णुः तथैव एनम् अर्जुनम् अपि जिष्णुं द्रष्टुं कामये। तत्समः अन्यः कश्चन धनुर्धरः न स्यात् इति।



एकदा निषादराजस्य हिरण्यधनुषः पुत्रः एकलव्यः अस्त्रविद्यां पठितुं द्रोणसमीपम् आगतवान्। किन्तु अयं निषादवंशीयः अस्ति इति विचार्य द्रोणः तं शिष्यत्वेन न प्रतिगृह्णाति, वदति च त्वं क्षत्रियो नासि। अतः अत्र राजकुमाराणां मध्ये-अस्त्रविद्यां पठितुं त्वं योग्यः न इति। गुरोः द्रोणस्य वचनमिदं श्रुत्वा एकलव्यः वनं प्रत्यागच्छति स्म। तथापि सः हतोत्साहः न जातः। तत्र द्रोणस्य मृण्मयीं मूर्तिं स्थापयित्वा तस्यामेव मूर्तौ गुरुभावं हृदि अस्थापयत्; परमया श्रद्धया युक्तः सः धनुर्विद्यायाः अभ्यासं कुर्वन् महत् अस्त्रकौशलं प्राप्नोत्।

अथ एकदा कौरवाः पाण्डवाः च द्रोणेन सह मृगयार्थं वनम् अगच्छन्। तस्मिन्नेव वने एकलव्यः धनुर्विद्यायाः अभ्यासं कुर्वन्नासीत्। तदा एकः श्वा भषन् तस्य समीपे अतिष्ठत्। कुक्कुरस्य भषणेन तस्य एकाग्रतायां विघ्नः आगच्छत्। एकलव्यः तस्य भषतः कुक्कुरस्य मुखे बहून् बाणान् युगपद् अपूरयत्। शरपूर्णमुखः कुक्कुरः पाण्डवानां पार्श्वे अगच्छत्। कुक्कुरं दृष्ट्वा पाण्डवाः परं विस्मयं प्राप्ताः। केन धनुर्धरेण एतादृशं शस्त्रलाघवं प्रदर्शितम् इति।

कौतुहलेन सर्वे एकलव्यसमीपम् अगच्छन्। तेन एकलव्येनैव कुक्कुरस्य मुखं शरैः पूरितम् इति ज्ञात्वा सर्वे तम् अपृच्छन् – ''को भवान्? कस्य शिष्यः? इति। तदा सः प्रत्यवदत् ''अहं निषादाधिपतेः हिरण्यधनुषः पुत्रो द्रोणाचार्यस्य च शिष्योऽस्मि'' इति।

एतत् श्रुत्वा पाण्डवाः द्रोणम् अवदन् ''कथम् अर्जुनादपि विशिष्टोऽन्यः शिष्यः वर्तते इति। तदा क्षणं विचिन्त्य द्रोणः सव्यसाचिनमादाय एकलव्यसमीपं गतः। एकलव्यः स्वगुरुं द्रोणाचार्यमवलोक्य प्रणम्य च नमस्कारमुद्रया अतिष्ठत्। ततो द्रोणोऽब्रवीत् – ''यदि त्वं मम शिष्यः असि तर्हि मह्यं गुरुदक्षिणां देहि। तच्छुत्वा प्रसन्नचेताः सः एकलव्यः किं प्रयच्छानि इत्यपृच्छत्। तदा द्रोणः अयाचत-तव दक्षिणहस्ताङ्गुष्ठः दीयताम्। इदं कठोरं वाक्यं श्रुत्वापि सः प्रसन्नेन मुखेन प्रेम्णा स्वीयम् अङ्गुष्ठम् आचार्याय प्रादात्। एतदवलोक्य सर्वे महदाश्चर्यम् आपन्नाः। तस्माद्दिनात् यद्यपि वयं श्रेष्ठधनुर्धररूपेण अर्जुनं स्मरामः तथापि उत्तमगुरुभक्तरूपेण तु एकलव्यम् एव सादरं स्मरामः। धन्या गुरुभक्तिः एकलव्यस्य।''

## शब्दार्थाः

| | |
|---|---|
| अत्यन्तसन्निष्ठः = निष्ठाभावयुक्तः | श्रेयस्करी = कल्याणप्रदा |
| जिष्णुः = विजयशीलः | मृण्मयीम् = मृत्तिकानिर्मिताम् |
| अभ्राम्यन् = विचरितवन्तः | श्वा = कुक्कुरः |
| निषादः = किरातः | युगपत् = सहसा |
| शस्त्रलाघवम् = शस्त्रकौशलम् | शराः = बाणाः |
| सव्यसाचिनम् = अर्जुनम् | प्रयच्छानि = ददानि |
| अर्पयत् = अयच्छत् | शुनः = कुक्कुरस्य |
| आकर्ण्य = श्रुत्वा | |

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) गुरुभक्तेषु कस्य नाम सर्वप्रथमं गृह्यते?

(क) अर्जुनस्य (ख) भरतस्य (ग) एकलव्यस्य (घ) प्रह्लादस्य

(2) पाण्डवकौरवाः द्रोणाचार्यात् किम् पठन्तः आसन्?

(क) वेदविद्याम् (ख) धनुर्विद्याम् (ग) अस्त्रविद्याम् (घ) काव्यविद्याम्

(3) गुरुद्रोणानुसारं केन समः अन्यः धनुर्धरः न?

(क) दुर्योधनेन (ख) अर्जुनेन (ग) युधिष्ठिरेण (घ) सहदेवेन

(4) एकलव्यः कस्य सुतः आसीत्?

(क) हिरण्यधनुषः (ख) हिरण्यगर्भस्य (ग) कपिध्वजस्य (घ) धर्मराजस्य

(5) एकलव्यः द्रोणाचार्यस्य कीदृशीं मूर्तिं रचितवान्?

(क) मृण्मयीम् (ख) लोहमयीम् (ग) सुवर्णमयीम् (घ) काष्ठमयीम्

(6) कौरवपाण्डवाः द्रोणेन सह वनं किमर्थम् अगच्छन्?

(क) धर्मकार्यार्थम् (ख) मृगयार्थम् (ग) भ्रमणार्थम् (घ) सेवार्थम्

(7) कुक्कुरस्य भषणेन किम् अभवत्?

(क) एकलव्यः प्रसन्नो जातः (ख) एकलव्यः ध्यानभग्नः अभवत्।

(ग) पाण्डवेभ्यः भयं सञ्जातम् (घ) गुरुद्रोणः ध्यानभग्नः सञ्जातः।

(8) कुक्कुरस्य मुखम् एकलव्यः कैः अपूरयत्?

(क) मन्त्रैः (ख) शरैः (ग) मोदकैः (घ) वन्यफलैः

(9) कौतुहलेन कौरवपाण्डवाः कस्य समीपम् गतवन्तः?

(क) गुरोः (ख) भीमस्य (ग) कृष्णस्य (घ) एकलव्यस्य

(10) द्रोणाचार्यः गुरुदक्षिणायां किम् अयाचत?

(क) दक्षिणहस्तम् (ख) दक्षिणपादम् (ग) दक्षिणहस्ताङ्गुष्ठम् (घ) दक्षिणपादाङ्गुष्ठम्

**2. अधोलिखित-प्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(1) एकलव्यः कस्मिन् वंशे जातः?

(2) एकलव्यः वने द्रोणसमीपं किमर्थमागतवान्?

(3) गुरुणा द्रोणेन किं विचार्य एकलव्यः शिष्यत्वेन अस्वीकृतः?

(4) वने किं कुर्वन् एकलव्यः अस्त्रकौशलं प्राप्नोत्?

(5) एकलव्येन कैः कस्य मुखं पूरितम्?

(6) पाण्डवाः किं दृष्ट्वा विस्मयं प्राप्तवन्तः?

(7) एकलव्यः स्वगुरुं दृष्ट्वा कस्यां स्थितौ अतिष्ठत्?

(8) गुरुकृपया शिष्यस्य किं भवति?

(9) गुरोर्महत्त्वं कस्यापेक्षया अधिकं भवति?

(10) जगति श्रेष्ठधनुर्धररूपेण कः प्रसिद्धिं प्राप्तवान्?

**3. पञ्चवाक्यैः प्रश्नानामुत्तराणि लिखत।**

(1) एकलव्यः अरण्ये केन प्रकारेण धनुर्विद्यायाः अभ्यासं करोति स्म?

(2) कौरवपाण्डवानां वनप्रसङ्गं वर्णयत।

**4. निम्नलिखितानि वाक्यानि कः वदति कं च वदति इति निर्दिश्यताम्।**

(1) ''यथाहं जिष्णुः तथैव एनमपि दृष्टुं कामये।''

(2) त्वं क्षत्रियो नासि अतः राजकुमारैः सह पठितुं न योग्यः।

(3) अहं निषादाधिपतेः हिरण्यधनुषः पुत्रः।

(4) मह्यं गुरुदक्षिणां देहि।

(5) किं प्रयच्छानि?

(6) तव दक्षिणहस्ताङ्गुष्ठः दीयताम्।

(7) कथम् अर्जुनादपि विशिष्टोऽन्यः शिष्यो वर्तते?

**7. अधोनिर्दिष्टानां पदानां सन्धिच्छेदं कुरुत।**

| | |
|---|---|
| (1) तथैव | (2) कश्चन |
| (3) प्रत्यागच्छति | (4) हतोत्साहः |
| (5) तस्मिन्नेव | (6) कुर्वन्नासीत् |
| (7) युगपदपूरयत | (8) को भवान् |
| (9) शिष्योऽस्मि | (10) द्रोणोऽब्रवीत् |

**छात्रप्रवृत्तिः**

एकलव्यचरित्रमाश्रित्य गुरुषु
श्रद्धाविनयसमर्पणादिगुणान् धारयित्वा
अन्यमहापुरुषाणां चरित्राणि छात्राः पठेयुः।

**अध्यापकप्रवृत्तिः**

द्रोणः श्रेष्ठः उत एकलव्यः? एनं प्रश्नमधिकृत्य-चर्चासभा योजनीया।

# 10

# मृच्छकटिकम्

**प्रस्तावना**

संस्कृतसाहित्ये भासकालिदासभवभूतिप्रभृतीनां नामानि अग्रगण्यानि वर्तन्ते। तथैव शूद्रकस्य नाम वर्तते। अन्येषां कवीनां जन्मकालस्थानादीनां निर्णयो नास्ति तथैव शूद्रकसम्बद्धं नास्ति किमपि विशिष्टं ज्ञानम्। किन्तु शूद्रकस्य परिचय: ग्रन्थादौ प्राप्यते तदनुसारं स: शैव: आसीत्।

ऋग्वेदं सामवेदं गणितमथकलां वैशिकीं हस्तिशिक्षां
ज्ञात्वा शर्वप्रसादात् व्यपगततिमिरे चक्षुषी चोपलभ्य।
राजानं वीक्ष्य पुत्रं परमसमुदयेनाश्वमेधेन चेष्ट्वा
लब्ध्वा चायु: शताब्दं दशादिनसहितं शूद्रकोऽग्निं प्रविष्ट:॥

शूद्रकस्य प्राप्त: ग्रन्थ: वर्तते 'मृच्छकटिकम्'। रूपकमिदम् रूपकस्य दशभेदेषु 'प्रकरणम्' नामक: प्रकार: वर्तते। संस्कृतनाट्यसाहित्ये सुविख्याता: प्रकरणग्रन्था: न्यूनतमा: तेषु इदं रूपकं वर्तते।

अत्र 'मृच्छकटिकम्' इत्यस्य वस्तुविन्यास: कृत:। चारुदत्त: नामक: नायक: एकदा धनिक: आसीत्। किन्तु दानाधिक्याद् दरिद्रतां प्राप्तवान्। दरिद्रात् प्राय: सर्वे सम्बन्धिन: अत्यजन्। पत्नी धुता, पुत्र: रोहसेन: दासी रदनिका, मित्रं मैत्रेय: एतावन्त: एव कुटुम्बिन: अवशिष्टा: आसन्। किन्तु सुप्रसिद्धा गणिका वसन्तसेना चारुदत्तस्य प्रेमतन्तुना बद्धा वर्तते। राज्ञ: श्यालको शकारोऽपि वसन्तसेनां कांक्षति। अत्र स्नेहत्रिकोणे परिवर्तमाना राजस्थिति: तथा तत्कालीना सामाजिकी व्यवस्था सुचारूतया निरुपिता वर्तते।

---

'अलङ्कार न्यासो' नाम अयमङ्क:। अत्र वसन्तसेनां शकारो नाम राजश्यालक: वशीकर्तुं काङ्क्षति। रात्रौ घोरतमसि विटचेटाभ्यां सह शकार: वसन्तसेना समीपस्थ चारुदत्तगृहे प्रविश्य आत्मानं रक्षति। मैत्रेय: शकारेण सह विवादं कृत्वा तं गृहाद् निष्काशयति। वसन्तसेना स्वकीयात् सुवर्णालङ्कारान् चारुदत्तगृहे संस्थाप्य गच्छति।

द्यूतकसंवाहके अङ्के चारुदत्तस्य संवाहकनाम्न: पूर्वसेवकस्य कथा वर्तते। स: संवाहको द्यूतक्रीडासक्त: भवति। द्यूतक्रीडायां विपुलं धनं नश्यति। चारुदत्त: संवाहकम् अनृणं करोति। स: संवाहक: बौद्धभिक्षु: भवति।

संधिच्छेद: नामक: तृतीयोऽङ्क: वर्तते। अत्र वसन्तसेनाया: दासीं मदनिकां कश्चन शर्विलक नाम ब्राह्मण: प्रेमवशात् दासीकर्मण: मुक्तिम् इच्छति। अत: स: चारुदत्तस्य गृहात् वसन्तसेनाया: सुवर्णालङ्कारान् मुष्णाति।

मदनिकाशर्विलक नाम्नि चतुर्थे अङ्के अलंकारचोर: शर्विलक: वसन्तसेनां सुवर्णालिङ्कारान् दत्त्वा प्रियतमां मदनिकां दास्यकर्मण: मोचयति। न्यासस्य रक्षणं कर्तुमसमर्थ: चारुदत्त: धुतां रत्नावलीं दत्वा मैत्रेयं प्रेषयति। स: मैत्रेयो वसन्तसेनान्तिकं गत्वा 'चारुदत्त:' द्यूतक्रीडायां भवत्या: अलङ्कारान् पराजितवान् अत: एतां रत्नावलीं प्रेषितवान्। वसन्तसेना सायङ्काले चारुदत्तस्य गृहे आगमिष्यामि इति वचनं ददाति।

'दुर्दिनम्' नाम्नि पञ्चमे अङ्के वर्षाऋतो: सविस्तरं वर्णनमस्ति। वसन्तसेना चारुदत्तस्य गृहे रात्रिवासं करोति। अस्य रुपकस्य प्रमुख: प्रसङ्ग: अस्मिन् अङ्के वर्तते। चारुदत्तस्य पुत्र: रोहसेन: बालै: सह क्रीडन् आसीत् अन्येषां क्रीडकानि सुवर्णै: निर्मितानि सन्ति। अत: रोहसेन: रोदिति किन्तु वसन्तसेना निजभूषणै: तस्य मृत्तिकाया: शकटं

भूषयति। तथा च पुष्पकरण्डकोपवने चारुदत्तं मेलनाय याति। किन्तु अत्र वसन्तसेना समीपस्थायां शकारस्य शकटिकायाम् उपविशति। अतः अस्य अङ्कस्य नाम 'प्रवहरणविपर्ययः' वर्तते।

सप्तमाङ्कस्य कथायां नृपः पालकः भविष्यवाणीं श्रुत्वा गोपालस्य पुत्रम् आर्यकं बन्दीकरोति। परन्तु आर्यकः पलायनं कृत्वा चारुदत्तस्य याने उपविशति। मार्गे सैनिकः वीरकः राजद्रोहिणं आर्यकं ज्ञात्वा अभयवचनं ददाति। एवं सः चारुदत्तं मिलति।

वसन्तसेनामोचनी नाम अष्टमः अङ्कः। अत्र वसन्तसेना पुष्पकरण्डकोपवने चारुदत्तम् अप्राप्य विपर्ययात् शकारं प्राप्नोति। शकारस्य प्रेमप्रस्तावं अस्वीकुर्वन्ती वसन्तसेना शकारस्य प्रहारैः मृता भवति। संवाहको नाम बौद्धभिक्षुः वसन्तसेनां विहारे नीत्वा उपचारं करोति।

व्यवहारनाम नवमः अङ्कः। अत्र शकारः वसन्तसेनावधस्य आरोपं चारुदत्तस्योपरि करोति। न्यायालये न्यायः जायमानः अस्ति। तत्र बालः रोहसेनः सुवर्णभूषितशकटेन सह प्रविशति। आभूषणाय वसन्तसेनायाः वधं कृतवान् चारुदत्तः इति सिद्धं भवति। न्यायाधिकारी चारुदत्तं मृत्युदण्डेन दण्डयति।

संहारनामके दशमे अङ्के राज्यपरिवर्तनं भवति। पालकं हत्वा आर्यको राजा भवति। सः चारुदत्तं न दण्डयति। अन्ते चारुदत्तस्य वसन्तसेनया सह विवाहो भवति।

## शब्दार्थाः

अजहन् = त्यागं कृतवन्तः

काक्षति = इच्छति

दासीकर्मण = दासकार्यतः

क्रीडकानि = क्रीडायै प्रत्युक्तानि साधनानि

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) 'मृच्छकटिकम्' कीदृशं रुपकमस्ति?

(क) नाटकम् (ख) प्रकरणम् (ग) व्यायोगम् (घ) एकाङ्की

(2) शूद्रकस्य कति ग्रन्थाः सन्ति?

(क) 2 (ख) 1 (ग) 3 (घ) 4

(3) शूद्रकस्य मृत्युः केन भवति?

(क) जलेन (ख) अग्निना (ग) युद्धेन (घ) व्याधिना

(4) मृच्छकटिके कति अङ्काः सन्ति?

(क) 11 (ख) 12 (ग) 10 (घ) 9

(5) अत्र रुपके विदूषकस्य नाम किम्?

(क) वसन्तकः (ख) मैत्रेयः (ग) चारुदत्तः (घ) हिरण्यकः

(6) अत्र बौद्धभिक्षुः कः अस्ति?

(क) शर्विलकः (ख) संवाहकः (ग) मैत्रेयः (घ) आर्यकः

(7) उपवनस्य नाम किं वर्तते?

(क) पुष्पकारण्यः (ख) पुष्पकरण्डकः (ग) पुष्पोद्यानम् (घ) पुष्पोपवनम्

(8) मृच्छकटिकम् इति शीर्षकस्य प्रसङ्गः कस्मिन् अङ्के वर्तते?

(क) 5 (ख) 6 (ग) 7 (घ) 4

(9) शूद्रकः कस्य सम्प्रदायस्य मन्यते?

(क) वैष्णवः (ख) शैवः (ग) बौद्धः (घ) शाक्तः

(10) आर्यकात् अभयवचनं कः प्राप्नोति?

(क) वीरकः (ख) शर्विलकः (ग) मैत्रेयः (घ) गोपालः

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) वसन्तसेना का अस्ति?

(2) चारुदत्तस्य पत्न्याः नाम किम्?

(3) वसन्तसेनायाः दासी का अस्ति?

(4) चारुदत्तः न्यासस्य स्थाने वसन्तसेनां किं प्रेषितवान्?

(5) यानपरिवर्तनं कस्मिन् अङ्के भवति?

(6) आर्यकः कस्य पुत्रः आसीत्?

(7) शकारस्य सहायकौ कौ स्तः?

**3. पञ्चवाक्यैः प्रश्नानामुत्तराणि लिखत।**

(1) 'मृच्छकटिकम् इति शीर्षकं उचितम्' इति सविस्तरं लिखन्तु।

(2) शूद्रकस्य वैदुष्यं निरुप्यताम्।

(3) 'मृच्छकटिकम्' इत्यस्य कथासारं लिखन्तु।

**4. सन्धिविच्छेदं कुरुत।**

(1) दानाधिक्याद्

(2) शकारोऽपि

(3) द्यूतक्रीडासक्तः

(4) पुष्पकरण्डकोपवने

(5) चारुदत्तस्योपरि

**छात्रप्रवृत्तिः**

चारुदत्तविषये भासकविविचरितचारूदत्तं ग्रन्थस्य कथावस्तु अवधेयम्।

**अध्यापकप्रवृत्तिः**

'मृच्छकटिकम्' इति ग्रन्थे निरुपिता सामाजिकी स्थितिं छात्रान् सविस्तारं पाठयन्तु।

●

# 11

# भारतं पञ्चमो वेदः

**प्रस्तावना**

भारतीयसंस्कृतिसंवर्धनहेतवे वेदानन्तरं महाभारतस्य महत्त्वपूर्णं योगदानं वर्तते। इतिहासग्रन्थयोः रामायणमहाभारतयोः समावेशः वर्तते। अतः एतौ अस्माभिः पञ्चमवेदत्वेन गृह्येते इति नास्ति अत्र अतिशयोक्तिः।

अतः महाभारतस्य ग्रन्थस्य परिचयो भवेत् इति धिया महाभारतस्य परिचयं विधाय पञ्चमः वेदः इति साधितम्।



''यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्'' एषा पङ्क्तिः महाभारतस्य महिमामण्डनाय अलम्। महाभारतस्य प्रभावः सामान्यजनमानसे अपि दरीदृश्यते। एतस्य सुमहत्तमस्य ग्रन्थस्य रचयिता भगवान् वेदव्यासः वर्तते। वेदानां विस्तारकरणात् वेदव्यासः, द्विपे जातः अतः द्वैपायनः, कृष्णत्वात् कृष्णद्वैपायनः, बद्रिकाश्रमे वासः तस्मात् बादरायणः, इति विविधनाम्ना प्रसिद्धः। मुनिः कृष्णद्वैपायनः महाभारतस्य रचनां चकार।

**त्रिभिर्वर्षैः सदोत्थायी कृष्णद्वैपायनो मुनिः।**
**महाभारतमाख्यानं कृतवानिदमुत्तमम्॥**

(आदिपर्व - 56/52)

त्रिभिः वर्षैः कृष्णद्वैपायनः मुनिः महाभारतं रचयामास। अस्मिन् ग्रंथे एकलक्षसंख्यकाः श्लोकाः सन्ति। अतः शतसाहस्रीसंहिता इति नाम्ना अपि प्रसिद्धः ग्रन्थः वर्तते।

महाभारतस्य विकासक्रमः त्रिभिः सोपानैः जातः इति विदुषां मतम्। (1) जयकाव्यम् (2) भारतम् (3) महाभारतम् ग्रन्थे अस्मिन् संवादोऽपि त्रिभिः सोपानैः दृश्यते।

(1) महर्षिः व्यासः शिष्यान् पपाठ। तत्र वैशम्पायनः पठति स्म।

(2) वैशम्पायनः सर्पयज्ञसत्रे जनमेजयम् उवाच। तत्र सूतपुत्रः उग्रश्रवा शृणोति स्म।

(3) सौतिः (सूतपुत्रः उग्रश्रवा) नैमिषारण्ये शौनकादीन् मुनीन् श्रावयति स्म।

जय : महाभारतस्य मङ्गलं जयस्य सूचनं करोति। यतो हि

**नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।**
**देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥**

अत्र कौरवपाण्डवयोः युद्धस्य अन्ते पाण्डवानां जयः इति हेतुना 'जयः' इति प्रतिभाति। 'जयो नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा' इति आदिपर्वणः पद्यमपि जयकाव्यमिति साधयति। महर्षिणा व्यासेन स्वशिष्याय उपदिष्टम् इदम् काव्यम् 8800 पद्ययुक्तं स्यादिति।

**अष्टौ श्लोकसहस्राणि अष्टौ श्लोकशतानि च।**
**अहं वेद्मि शुको वेत्ति सञ्जयो वेत्ति वा न वा॥**

(2) महर्षिव्यासाद् गृहीतः पाठः सर्पयज्ञसत्रे वैशम्पायनः जनमेजयाय ददाति। इदं काव्यं 'भारतम्' इति नाम्ना प्रसिद्धम् जातम्। अत्र श्लोकानां संख्या चतुर्विंशतिसहस्रम् (24,000) स्यात्।

**चतुर्विंशतिसाहस्त्रीं चक्रेभारतसंहिताम्।**

**उपाख्यानै विना तावत् भारतं प्रोच्यते बुधैः॥**

(3) सर्पयज्ञे श्रुतं पाठं शौनकादीन् मुनीन् सौतिमुनिः श्रावयति स्म। सा संहिता महत्तमा जाता। अतः उक्तं यत् - भारतानां महज्जन्म महाभारतमुच्यते। अत्र युद्धस्य कथायाः विस्तारो वर्तते। किन्तु कुत्रचित् प्रमुखधारां परित्यज्य इतरकथानां न्यासः अपि दृश्यते। यथा सरस्वत्युपाख्यानम्, रामोपाख्यानम्, जम्बुखंडभूखण्डयोः विस्तृतं वर्णनम्, उपदेशानामतिरेकः इत्यादयः विषयाः ग्रन्थस्य स्थूलतावर्धनाय कारणभूताः सन्ति। महाभारतं नाम शतसाहस्त्रीसंहिता अतः अस्मिन् ग्रन्थे एकलक्षाः श्लोकाः सन्ति।

महाभारतम् अष्टादशपर्वणि विभक्तं वर्तते।

(1) आदिपर्व - चन्द्रवंशस्य सविस्तारं वर्णनं कौरवपाण्डवयोरुत्पत्तेः कथा वर्तते।

(2) सभापर्व - अस्मिन् सभायाः निर्माणस्य कथा वर्तते तथा द्यूतप्रसङ्गः प्रमुखोऽस्ति।

(3) वनपर्व - पाण्डवानां वनवासस्य वर्णनमस्ति।

(4) विराटपर्व - पाण्डवानामज्ञातवासस्य वर्णनमस्ति।

(5) उद्योगपर्व - कृष्णस्य दूतरुपेण सन्धिप्रस्तावाय निवेदनम्।

(6) भीष्मपर्व - अत्र प्रमुखतमः प्रसङ्गः गीताकथनं वर्तते। अत्र युद्धारम्भः भवति।

(7) द्रोणपर्व - अभिमन्युवधः, द्रोणाचार्येण सह युद्धम्, वधश्च।

(8) कर्णपर्व - कर्णेन सह युद्धम्, वधश्च।

(9) शल्यपर्व - शल्येन सह युद्धम्, वधश्च।

(10) सौप्तिकपर्व - अस्मिन् पर्वणि पाण्डवानां सुप्तानां पञ्चपुत्राणाम्, अश्वत्थाम्ना वधः।

(11) स्त्रीपर्व - स्त्रीणां विलापः

(12) शान्तिपर्व - अस्मिन् पर्वणि पितामहस्य युधिष्ठिराय धर्मस्योपदेशः।

(13) अनुशासनपर्व - अत्र धर्मनीत्यादिविषयसम्बद्धाः कथाः।

(14) अश्वमेघपर्व - युधिष्ठिरस्य अश्वमेधयागः।

(15) आश्रमवासीपर्व - अत्र गान्धारीधृतराष्ट्रयोः वानप्रस्थाश्रमे प्रवेशः।

(16) मौसलपर्व - यादवानां मूसलेन नाशः।

(17) महाप्रस्थानिकपर्व - पाण्डवानां हिमालयगमनम्।

(18) स्वर्गारोहणपर्व - पाण्डवैः कृतं स्वर्गगमनस्य वर्णनम्।

अनया रीत्या महाभारतस्य सुदीर्घतमा रमणीया कथा प्राप्यते। वैदिकसाहित्यस्य अर्थगाम्भीर्यम्, ग्रन्थानां विपुलता पूर्वपरज्ञानापेक्षा इति बहुभिः कारणैः वैदानां सन्देशः साधारणं जनानां कृते दुर्लभवत् भासते। अतः आदिपर्वणि महाभारते उद्घोषयति यत्।

**इतिहास पुराणाभ्यां वेदः समुपबृंहयेत्।**

**बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति॥**

अत्र वेदानाम् उपबृंहणम् इतिहासपुराणाभ्यां कृता वर्तते। अनेन 'महाभारतः पञ्चमो वेदः' इति साधयति भगवान् बादरायणः। वेदस्य गर्भितोपदेशानां सरलकथया प्रकटीकरणाद् महाभारतस्य वेदे पञ्चमता स्वतः सिद्धां भवति। वेदानाम् अन्तभूतं साहित्यं नामोपनिषद् साहित्यम्। तस्याः उपनिषदः अपि सारः महाभारते गीतोपदेशे वर्तते।

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।**
**पार्थोवत्सः सुधीर्भोक्ता दुग्धं गीतामृतंमहत्॥**
**अनेन महाभारतस्य वेदे पञ्चमता सिद्धं भवति।**
**वेदानां सारः आचारो वर्तते। अतः कथितम्**
**आचारहीनं न पुनन्ति वेदाः यैश्चाधीतं सह षड्भिरङ्गैः।**
**वेदाश्चैनं मृत्युकाले त्यजन्ति विहायनीडानिव जातपक्षाः॥**

अर्थात् वेदानां षडङ्गैः सह अध्ययनं कृत्वापि यदि आचारशुद्धिः न भवेत् तर्हि वेदाध्ययनं निरर्थकम्। अतः अत्र आचारस्य प्राधान्यं वर्तते। तथैव महाभारतमपि आचारस्य महात्म्यं दर्शयति। यथा ''आचारः परमो धर्मः धर्मस्य प्रभुरच्युतः'' अत्र आचारस्य प्रधान्यं दृश्यते। वेदेषु आचाराग्रहो वर्तते तथैव महाभारतेऽपि दृश्यते। अनेन महाभारतस्य वेदे पञ्चमता सिद्धां भवति। महाभारते विष्णुसहस्रादयः अनेकाः स्तुतयः सन्ति। यया भक्तिमार्गे प्रशस्यते। यथा वेदे विविधानां देवतानां सूक्तानि सन्ति तथैव अत्रापि सूक्तयः। अतः भक्तिमार्गस्य वैशिष्ट्यमुभयत्र समानमेव अतः महाभारतस्य वेदे पञ्चमता सिद्धां भवति।

इति बहुभिः तर्कैः, बहुभिः प्रमाणैः वक्तुं शक्नुमः यत् महाभारतं न केवलं लौकिको ग्रन्थः अपि ''पञ्चमो वेदः'' इति उक्ते सति नातिशयोक्तिः।

## शब्दार्थाः

दरीदृश्यते = पुनः पुनः दृश्यते
विजिगीषुणा = विजयं प्राप्तुम् इच्छता जनेन
न्यासः = नियोजनम्
पपाठ = पाठनं चकार
वेद्मि = जानामि
उपबृंहणम् = संवर्धनम्

## सन्धिः

यदिहास्ति = यत् + इह + अस्ति
त्रिभिर्वर्षैः = त्रिभिः + वर्षैः
प्रोच्यते = प्र + उच्यते
रामोपाख्यानम् = राम + उपाख्यानम्
वधश्च = वधः + च
धर्मनीत्यादि = धर्मनीति + आदि
सुधीर्भोक्ता = सुधीः + भोक्ता
षड्भिरङ्गैः = षड्भिः + अङ्गैः।
यन्नेहास्ति = यत् + न + इह + अस्ति
नामेतिहासोऽयम् = नाम + इतिहासः + अयम्
सरस्वत्युपाख्यानम् = सरस्वती + उपाख्यानम्
इत्यादयः = इति + आदयः
धर्मस्योपदेशः = धर्मस्य + उपदेशः
गर्भितोपदेशानाम् = गर्भितः + उपदेशानाम्
यैश्चाधीतम् = यैः + च + अधीतम्

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) महाभारते कति पर्वाणि सन्ति?
(क) 16  (ख) 17  (ग) 18  (घ) 28

(2) महाभारतस्य विकासक्रमः कतिधा विभक्तः वर्तते?
(क) द्विधा  (ख) त्रिधा  (ग) पञ्चधा  (घ) चतुर्धा

(3) इतिहासग्रन्थे कस्य समावेशो भवति?
(क) पुराणानाम्  (ख) वेदानाम्  (ग) महाभारतस्य  (घ) तन्त्राणाम्

(4) जयकाव्ये कति श्लोकसंख्याः प्राप्यते?
(क) 8400  (ख) 8800  (ग) 4800  (घ) 8880

(5) जयकाव्यस्य वक्ता कः वर्तते?

(क) वैशम्पायनः (ख) सौतिः (ग) बादरायणः (घ) शुकदेवः

(6) ''इतिहासपुराणाभ्यां पञ्चमोवेदोबृहयेत्'' इति सन्दर्भः कुत्र वर्तते?

(क) सभापर्वणि (ख) आदिपर्वणि (ग) भीष्मपर्वणि (घ) स्त्रीपर्वणि

(7) भारते कति श्लोकाः सन्ति?

(क) 24,400 (ख) 28,800 (ग) 24,000 (घ) 28,400

(8) यादवानां नाशः कुत्र वर्णितः?

(क) सौप्तिकपर्वणि (ख) स्वर्गारोहणपर्वणि (ग) मौसलपर्वणि (घ) महाप्रस्थानपर्वणि

(9) महाभारते श्लोकसंख्याः कति सन्ति?

(क) 1,00,000 (ख) 10,000 (ग) 1,10,000 (घ) 1,11,000

(10) महाभारतस्य वेदे पञ्चमता सिद्ध्यर्थं भक्तिमार्गस्य कः तर्कः वर्तते?

(क) आचारः (ख) स्तुतिः (ग) गीताज्ञानम् (घ) विपुलसाहित्यम्

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) महाभारतस्य कर्ता कः?

(2) सर्पयज्ञे कः कं भारतं श्रावयति स्म?

(3) कृष्णद्वैपायनः कति वर्षेषु ग्रन्थं रचयामास?

(4) सौतिः कं महाभारतं कथयति स्म?

(5) महाभारतस्य मङ्गलश्लोकः किं सूचयति?

(6) उग्रश्रवा कः आसीत्?

(7) आचारहीनं पुरुषं वेदाः कया रीत्या त्यजन्ति?

**3. पञ्चवाक्यैः प्रश्नानामुत्तराणि लिखत।**

(1) महाभारतस्य विकासः सविस्तरं लिखत।

(2) ''महाभारतं पञ्चमो वेदः'' इति सिद्धं कुरुत।

(3) अष्टादशपर्वणां कथां लिखत।

**4. सन्धिविच्छेदं कुरुत।**

(1) यदिहास्ति

(2) नामेतिहासोऽयम्

(3) सरस्वत्युपाख्यानम्

(4) गर्भितोपदेशानाम्

(5) यैश्चाधितम्

**छात्रप्रवृत्तिः**

छात्राः महाभारतस्य भीष्मपर्वणः सम्पूर्णं गीतोपदेशं जानीयुः।

**अध्यापकप्रवृत्तिः**

अध्यापकाः छात्रमाध्यमेन महाभारतस्य मुख्यपात्राणां परिचयसङ्कलनं कुर्वन्तु।

# 12

# दिलीप-सिंहसंवादः

**प्रस्तावना**

कविकुलगुरुः कालिदासः संस्कृतसाहित्य-आकाशे चन्द्र इव भाति। अयं महाकविः रघुवंशमहाकाव्यस्य रचनाम् अकरोत्। अस्मिन् महाकाव्ये एकोनविंशतिः सर्गाः सन्ति। तत्र संततेः अभावात् दिलीपस्य वसिष्ठमुनेः आश्रमगमनं, तस्य विवाहः विलापश्च, रामजन्मकथा, सीताविवाहवर्णनं, रावणवधः, सीतात्यागः, रामस्य स्वर्गारोहणं, कुमुद्वतीविवाहः, अतिथिवर्णनं, वंशानुक्रमः, अग्निवर्णश्रृंगारः इत्यादयः विषयाः प्रतिपादिताः सन्ति।

प्रस्तुतोऽयं गद्यांशः अस्य महाकाव्यस्य द्वितीयसर्गात् संगृहीतः यस्मिन् नंदिनी हिमालयस्य गुहां प्रविशति। दिलीपः हिमालयस्य शोभां विलोकयति। तदानीम् एव एकः सिंहः नंदिन्याः उपरि प्रहारम् करोति। यदा नंदिन्याः रक्षायै दिलीपः प्रयत्नं करोति तदा दिलीप-सिंहयोः संवादः भवति। तदत्र प्रस्तूयते।

अनेन पाठेन छात्रेषु गोभक्तिः गुरुभक्तिश्च सुदृढा भवेत् इत्येव आशयः॥



राजा दिलीपः संततिं प्राप्तुं नन्दिन्याः (गोः) सेवात्मकं व्रतं धारयन् एकविंशतिदिनानि यापितवान्। द्वाविंशे दिने नन्दिनी स्वसेवकस्य दिलीपस्य मनोगतं ज्ञातुम् इष्टवती लीलाम् अरचयत् तस्मिन् दिने सा हिमालयस्य घोरवनं प्रविष्टवती। तत्रस्थं वातावरणं रमणीयम् आसीत्। अतः दिलीपः क्षणं यावत् नन्दिनीम् अदृष्ट्वा प्रकृतिं पश्यन् आसीत्। तस्मिन्नेव समये कश्चन सिंहः नन्दिन्याः उपरि आक्रमणम् अकरोत्। यतो हि दिलीपः प्रकृतिदर्शने रतः आसीत् तस्मात् सिंहस्य आक्रमणं सः न दृष्टवान् किन्तु तदवगतं यद् सः सिंहः नन्दिन्याः उपरि आक्रमणं कृतवान्। रक्तवर्णायाः नन्दिन्याः शरीरोऽपरि आरूढवन्तं तं केसरसिंहं मारयितुं दिलीपः तूणीराद् बाणम् उद्धर्तुम् इष्टवान् परन्तु सायकस्य मूलप्रदेशे गृहीते सति सः दिलीपः चित्रलिखितः (like image) स्यात्; तथा स्थिरः अभवत्। तदा सः सिंहः उक्तवान् हे राजन्। तव श्रमेण किमपि न भविष्यति, वृक्षान् उच्छेदयितुं समर्थः वायुः पर्वतस्य किमपि कर्तुं न प्रभवति। अनन्तरं स्वपरिचयं प्रयच्छति यथा-

**अवेहि मां किङ्करमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम्।**

महादेवः यदा श्वेतवर्णीये वृषभे आरोढुम् इच्छति तदा निकुम्भनायकस्य सेवकस्य पृष्ठोपरि चरणं निधाय आरोहति। तस्य निकुम्भस्य मित्रम् अहं कुम्भोदरः शिवकिङ्करः अस्मि। भवान् तत्रस्थं देवदारुवृक्षं पश्यति? तं वृक्षं भवगान् शिवः पुत्र इव मन्यते। केनचित् गंडस्थलं कण्डूयमानेन हस्तिना अस्य वृक्षस्य त्वक् उन्मथिता तेन पार्वती दुःखिता अभवत्। तदा प्रभृति अहं अस्य वृक्षस्य रक्षायै भगवता शिवेन नियुक्तः। इदानीं मम भोजनकाले

उपस्थिता इयं गौः क्षुधितस्य मे कृते पर्याप्तम् अस्ति। त्वया गुरोः भक्तिः दर्शिता। अधुना त्वं लज्जां विहाय इतः प्रतिगच्छ। कारणम् –

**'शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति।'**

अर्थात् यद् रक्ष्यं शस्त्रेण रक्षितुम् अशक्यं तद् शस्त्रभृतां यशः न क्षिणोति।

बाणसञ्चालने निष्कलः राजा दिलीपः उक्तवान् यत् स्थावर जंगमपदार्थानाम् उत्पत्यादिहेतुः भगवान् शिवः मम मान्यः। किन्तु मम समक्षम् इदं मे आहिताग्नेः गुरोः गोरुपं धनम् अपि अनुपेक्षणीयम् अतः त्वं मम देहं स्वीकृत्य तव शरीरवृत्तिं निवर्तयितुं कृपां कुरु। तथा इमां पुत्रमिलनोत्सुकां वसिष्ठधेनुं मोचय। दिलीपस्य वचनं श्रुत्वा अट्टहास्यं कुर्वन् सिंहः उक्तवान् यत् राजन्! भवान् अल्पवस्तुनः कृते बहूनि वस्तूनि परित्यक्तुम् इच्छति इति विचारविषये मूर्ख इव प्रतिभाति। यदि त्वयि भूतानुकम्पा स्यात् चेत् तव नाशेन इयं एका गौः कल्याणं प्राप्स्यति किन्तु त्वयि जीविते सर्वाः प्रजाः कल्याणं प्राप्स्यन्ति। एवञ्च एकस्याः धेनोः अपराधात् तव गुरुः क्रुध्यति चेत् भवान् अन्याः कोटिशः गाः दत्त्वा प्रसन्नं कर्तुम् अर्हति। अतः स्वकलेवरस्य रक्षां कुरु। यद् राज्यसुखं विपश्चितः स्वर्गसुखं कथयन्ति तस्य उपभोक्ता भव। इत्युक्ते सिंहे तस्य प्रतिध्वनिना पर्वतोऽपि तदेव उच्चैः कथयति।

तदा शिवानुचरस्य सिंहस्य आघातेन दुःखितां भयभीतनेत्रयुक्तां नन्दिनीं दृष्ट्वा दयालुः सः दिलीपः उक्तवान् यद् नाशात्त्रायते इति क्षत्रवर्णस्य उन्नतः क्षत्रशब्दः लोकेषु प्रसिद्धिं गतः, तस्मात् क्षात्रधर्मात् विरुद्धस्य व्यवहारस्य पुनः शासनं कृत्वा किं करिष्यामि? यतो हि उक्तः भागवते राजधर्मः–

**'एष राज्ञां परो धर्मो ह्यार्तानामार्तिनिग्रहः'** तथा च अन्यासां पयस्विनीनां दानेन महर्षीणाम् अनुनयः कथं शक्यः? इमां नन्दिनीं कामधेनोः तुल्यां जानीहि, तादृश्याः एतस्याः नन्दिन्याः रक्षणं स्वदेहार्पणेन त्वत्तः मोचनम् एव न्यायः भविष्यति। इत्थं कृते तव पारणा विहता न स्यात्। एवं मुनेः यज्ञादिक्रियायाः साधनस्य नाशोऽपि न स्यात्। देवदारोः कृते त्वयि बहु स्नेहः अस्ति अतः त्वम् इदं जानासि यद् रक्ष्यवस्तु विनाश्य स्वयम् अक्षतेन स्वामिनः अग्रे स्थातुम् अशक्यं। एवञ्च अनित्येऽस्मिन् कलेवरे मद्विधानां ममता न भवति। मानवानां सम्बन्धः परस्परं वार्तालापेन भवति। आवयोः सः सम्बन्धः अस्मिन् वने अभवत्। अतः हे स्वजन! त्वं मम याचनां विहन्तुं नार्हसि।

इत्थं दिलीपस्य वचनं श्रुत्वा यदा सिंहः तथास्तु इत्यवदत् तदा वियुक्तबाहुः न्यस्तशस्त्रश्च सः दिलीपः स्वदेह आमिषस्य पिण्डम् इव अर्पितवान्। तस्मिन्नेव समये विद्याधरैः दिलीपस्योपरि पुष्पवर्षाः कृताः। हे पुत्र उत्तिष्ठ। इत्यमृतरसपूर्णं वचो निशम्य राजा दिलीपः यदोत्थितः सन् पश्यति, तदा तस्य सम्मुखे स्वां मातरमिव नन्दिनी दृष्टा, सिंहस्तु लुप्तः आसीत्। यतो हि दिलीपस्य परीक्षायै नन्दिन्याः इयं माया आसीत्।

अन्ते नन्दिनी गौः दिलीपं वरयाचनाय कथयति यथा–

**भक्त्या गुरौ मय्यनुकम्पया च**
**प्रीतास्मि ते पुत्र वरं वृणीष्व।**

गोः वचनं श्रुत्वा दिलीपः वंशस्य कर्तारम् अनन्तकीर्तिं पुत्रं ययाचे। गौः तथास्तु इति वरं दत्त्वा वदति यद् मम पयःपानेन ते भार्या सगर्भा भविष्यति पुत्ररत्नं च भवान् प्राप्स्यति। अनन्तरं दिलीपः नन्दिन्याः पयः नीत्वा आश्रमम् आयाति। तत्र यज्ञान्ते अवशिष्टं दुग्धं पिबति पुत्रं च प्राप्नोति।

इत्थं गुरोः भक्त्या गोः भक्त्या च दिलीपेन निजवंशधरः पुत्रः प्राप्तः॥

## शब्दार्थाः

| | |
|---|---|
| सायकम् = शरम् | हस्तिना = गजेन |
| क्षतात् = नाशात् | आहिताग्नेः = अग्निहोत्रिणः |

भूतानुकम्पा = जीवदया

अनुनयः = स्नेहः

विहता = नष्टा

मद्‌विधानां = मत्सदृशानाम्

विहन्तुम् = नाशं कर्तुम्

आमिषस्य = मांसस्य

कलेवरस्य = देहस्य

पयस्वीनीनाम् = दुग्धदात्रीणाम्

क्रियार्थस्य = क्रियायाः साधनस्य

विपिने = वने

न्यस्तशस्त्रः = त्यक्तशस्त्रः

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) नन्दिनी कस्मिन् दिने हिमालयस्य गुहां प्रविशति?

(क) पञ्चदश (ख) अष्टादश (ग) एकविंशतिः (घ) द्वाविंशतिः

(2) सिंहस्य नाम किम् अस्ति?

(क) वृकोदरः (ख) स्थूलोदरः (ग) कुम्भोदरः (घ) कृष्णोदरः

(3) सिंहः कस्य वृक्षस्य रक्षां करोति?

(क) आम्रवृक्षस्य (ख) अश्वत्थवृक्षस्य (ग) देवदारुवृक्षस्य (घ) मन्दारवृक्षस्य

(4) वृक्षस्य सेवायै सिंहः केन नियुक्तः?

(क) शिवेन (ख) विष्णुना (ग) ब्रह्मणा (घ) इन्द्रेण

(5) गुरोः किम् अनुपेक्षणीयम्?

(क) ज्ञानम् (ख) बलम् (ग) धनम् (घ) पुण्यम्

(6) वायुः कुत्र किमपि कर्तुं समर्थो न भवति?

(क) शिलोपरि (ख) मानवोपरि (ग) दानवोपरि (घ) पर्वतोपरि

(7) सिंहः कस्य सेवकः अस्ति?

(क) ब्रह्मणः (ख) परशुरामस्य (ग) शिवस्य (घ) विष्णोः

(8) विपश्चितः राज्यसुखं कीदृशं कथयन्ति?

(क) अपवर्गसुखम् (ख) गृहसुखम् (ग) युद्धसुखम् (घ) स्वर्गसुखम्

(9) दिलीपः कस्य अर्पणेन गां मोचयितुम् इच्छति?

(क) धनस्य (ख) गृहस्य (ग) राज्यस्य (घ) देहस्य

(10) देवदारोः कृते कस्य स्नेहः अस्ति?

(क) सिंहस्य (ख) दिलीपस्य (ग) नन्दिन्याः (घ) गुरोः

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) दिलीपः कीदृशं व्रतं धारयन् आश्रमे वसति स्म?

(2) कुम्भोदरनामा सिंहः कस्य मित्रम् अस्ति?

(3) शस्त्रेण यद् रक्ष्यम् अशक्यं भवति तद् केषां यशः न क्षिणोति?

(4) कः शब्दः जगति प्रसिद्धः?

(5) सिंहस्य पारणा कथं विहता न स्यात्?

(6) दिलीपः कथम् आत्मानं समर्पितवान्?

(7) दिलीपः कस्य याचनाम् अकरोत्?

**3. पञ्चवाक्यैः प्रश्नानामुत्तराणि लिखत।**

(1) सिंहः वृक्षस्य रक्षायै किमर्थ नियुक्तः?

(2) दिलीपः गोः रक्षायै किं किं कथयति?

(3) राजधर्मविषये निजविचारान् यच्छत।

(4) गद्यांशस्य मातृभाषायां सारः लेख्यः।

**4. सन्धिविच्छेदं कुरुत।**

(1) उत्पत्यादिः (2) अनित्येऽस्मिन्

(3) मय्यनुकम्पया (4) नार्हसि

(5) न्यस्तशस्त्रश्च (6) तथास्तु

**5. क्रियापदानां परिचयं लिखत।**

(1) यापितवान् (2) ददाति

(3) अभवत् (4) कुरु

(5) अवेहि (6) अर्हसि

**6. पदपरिचयं लिखत।**

(1) सायके (2) हस्तिना

(3) आहिताग्नेः (4) पयस्विनीनाम्

(5) कलेवरस्य (6) विद्याधरैः

**छात्रप्रवृत्तिः**

रघुवंशस्य श्लोकान् कण्ठस्थान् कुरुत।

**अध्यापकप्रवृत्तिः**

रघुवंशस्य परिचयं यच्छत।

●

# 13

# समवायो हि दुर्जयः

**प्रस्तावना**

संस्कृतसाहित्ये अनुपमाकृतिः विश्वख्यातः प्राणिकथासंग्रहः ''पञ्चतन्त्रम्'' नामा ग्रन्थविशेषः। विश्वस्मिन् बाइबल इत्यस्मात् धर्मग्रन्थात् परं सर्वाधिकभाषासु-अनुदितः ग्रन्थोऽयं विष्णुशर्मा नाम्ना विदुषा विरचितः। महिलारोप्यनगरस्थः अमरशक्तिः नामा नृपः स्वीयमूर्खपुत्रत्रयेण चिन्तातुरः ग्रन्थस्यास्य कर्तारं विष्णुशर्माणम् न्यवेदयत् ''ममैतान् मूर्खपुत्रान् कथमपि राजनीतिज्ञान् कुरुत येन मम चित्ततोषः स्यात्। अतः विष्णुशर्मा तान् त्रीन् पुत्रान् पशुपक्षिनीतिपराभिः कथाभिः षण्मासान्तरमेव विदुषः कर्तुं प्रायतत। एतासां कथानां सङ्कलनमेव ''पञ्चतन्त्रम् नाम्ना ग्रन्थः।''

पञ्चतन्त्रात्-मित्रभेदम् नामाख्य-प्रथमतन्त्रात्-समुद्धृतः पाठोऽयं विद्यते। अस्यां कथायां दुर्बलजीवानामपि ऐक्यं महतीनाम् आपदाम् प्रतिकारं कर्तुं कथं प्रभवति इति सुचारुतया वर्णितमस्ति।

---

अथ कस्मिंश्चित् वने तमालवृक्षे चटकदम्पती नीडं कृत्वा प्रतिवसतः स्म। कालान्तरे तयोः सन्ततिः अभवत्। एकदा कश्चित् प्रमत्तः गजः तं तमालवृक्षं छायायै उपागतः। तस्मिन् काले चटकस्तु भोजनाय कणान्वेष्टुं कुत्रचित् गतः। तदा तेन उन्मत्तेन गजेन चटकाश्रिता शाखा त्रोटिता। तत् शाखाभङ्गेन सर्वाणि चटकाण्डानि विशीर्णानि। भाग्यवशात् सा चटका कथमपि जीविता।

अथ चटका स्वीय-अण्डानि नष्टानि दृष्ट्वा उच्चैः विलापं कृतवती। तस्याः एवं विलापं श्रुत्वा परमसुहृद् ''काष्ठकुट्टः'' नामा दुःखितः भूत्वा तामकथयत् - भद्रे किं वृथा प्रलापेन?

उक्तमेव -

**नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डितः।**<br>**पण्डितानां च मूर्खाणां विशेषोऽयं यतः स्मृतः॥ 1॥**

**अन्वयः** पण्डिताः नष्टं, मृतम् अतिक्रान्तं (जनं) न अनुशोचन्ति।<br>यतः पण्डितानां मूर्खाणां च अयं विशेषः स्मृतः॥

**भावार्थः** विद्वांसः नष्टस्य मृतस्य अतीतस्य च वृथा विलापं न कुर्वन्ति। मूर्खजनानां विदुषां च मध्ये अयमेव भेदः भवति।

अन्यच्च-मृतजनस्य बान्धवैः मुक्तं प्रत्येकमश्रु श्लेष्म-युक्तं भवति। प्रेतः (मृतजनः) अवशो भूत्वा तत्- पिबति। अतः मरणान्ते न रोदितव्यम् अपि तु श्राद्धादिक्रियाः कर्तव्याः। (याज्ञवल्क्य स्मृतिः) एतच्छ्रुत्वा चटका आश्वस्ता अभवत् अवदच्च - 'एतेन दुष्टगजेन मम संततिः नाशिता।' अतस्तस्य गजस्य वधोपायः चिन्तनीयः येन मम सन्ततिनाशदुःखम् अपसरेत्।

तदा काष्ठकुट्टः अवदत् हे भगिनि। सत्यमुक्तं त्वया। अहं भवत्याः परमसखास्मि। यदि आपद् गतां भवती साहाय्यं न करिष्ये चेत् कीदृशं मित्रमहम्।

उक्तं हि -

**स सुहृद् व्यसने यः स्यात्स पुत्रो यस्तु भक्तिमान्।**<br>**स भृत्यो यो विधेयज्ञः सा भार्या यत्र निर्वृतिः॥**

**अन्वयः** यः व्यसने (तिष्ठति) सः सुहृदः स्यात्, यः तु भक्तिमान सः

पुत्रः (स्यात्)। यः विधेयज्ञः सः भृत्यः यत्र निर्वृतिः सा भार्या।

**भावार्थः** तदेव मित्रं यत् आपत्तौ साहाय्यं करोति। तदेव पुत्रः यः भक्तिमान् श्रद्धालु च भवति। स एव भृत्यः यः आज्ञाकारी भवति। सा एव भार्या यस्याः समीपं गत्वा शान्तिः प्राप्यते।

अधुना त्वं पश्य मे बुद्धिप्रभावम्। ममापि मित्रं वीणारवा नाम्नी मक्षिका अस्ति। तत् समीपं गच्छावः अथ सः काष्ठकुट्टः नामा पक्षी चटकया सह वीणारवां मक्षिकाम् उपेत्य अकथयत् ''मम मित्रम् इयं चटका सन्ततिनाश-दुःखितास्ति। तस्या अण्डानि केनचिद् दुष्टगजेन स्फोटितानि। अतस्तादृशः कञ्चन उपायः चिन्त्यताम् येन गजस्य वधः स्यात् अस्याः चित्तशान्तिः अपि भवेत्।''

एतद् वचः श्रुत्वा वीणारवा सदुःखम् अवदत् ''भद्रे पुनर्मित्राणि प्रत्युपकारं करिष्यन्ति - इत्थं विचार्य मित्रैः तेषां प्रियकार्यं तु कर्तव्यं भवत्येव। ममापि-मित्रं मेघनादः मण्डूकः तिष्ठति। शीघ्रं तमुपगत्य-यथोचितं कुर्मः।''

**उक्तञ्च-**

**हितैः साधुसमाचारैः शास्त्रज्ञैर्मतिशालिभिः।**
**कथञ्चिन्न विकल्पन्ते विद्वद्भिश्चिन्तिता नयाः॥**

**अन्वयः** हितैः साधुसमाचारैः शास्त्रज्ञैः मतिशालिभिः, विद्वद्भिः।

चिन्तिताः नयाः कथञ्चित् (अपि) न विकल्पन्ते॥

**भावार्थः** हितेच्छुभिः, सदाचारविद्भिः, शास्त्रविद्वद्भिः, बुद्धिमद्भिः विद्वद्भिः च जनैः ये उपायाः विचारिताः भवन्ति, ते कथमपि निष्फला न भवन्ति॥

अथ ते त्रयोऽपि मेघनादस्याग्रे गत्वा समस्तवृत्तान्तं निवेदितवन्तः। अथ सः मेघनादः उवाच - ''कुपितानाम् अस्मादृशानां पुरतः तस्य वराकस्य गजस्य का गतिः? तस्मात् यथाहं वच्मि तथैव भवद्भिः-कर्तव्यम्। मक्षिके! त्वं श्वः मध्याह्नसमये तस्य मदोद्धतस्य गजस्य कर्णे वीणासदृशं मधुरशब्दं करिष्यसि येन श्रवणसुखलोलुपः सन् सः गजः नेत्रे निमील्य स्थास्यति ततः काष्ठकुट्टः स्वचञ्च्वा शीघ्रं तस्य नयने स्फोटयिष्यति। अहं च सपरिवारः महद् गर्तस्य समीपं स्थित्वा सततं रवं करिष्यामि, येन तृषार्तः स अन्धगजः तं गर्तं जलाशयं मत्वा उपसरिष्यति, तस्मिन् गर्ते पतित्वा मरिष्यति च।''

अथ तथानुष्ठिते सः मत्तगजः मक्षिकायाः संगीतसुखात् निमीलितनयनः काष्ठकुट्टेन हृतचक्षुः मध्याह्नतृषार्तः मार्गं भ्राम्यन् माण्डूकानां शब्दानुसारी जलाशयम् अन्विष्यन् गर्ते पतितः मृतश्च।

अत एवोच्यते,

**बहूनामप्यसाराणां समवायो हि दुर्जयः।**
**तृणैर्गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः॥ 4॥**

**अन्वयः** हि बहूनाम् असाराणाम् अपि समवायः दूर्जयः (भवति)

गुणत्वम् आपन्नैः तृणैः मत्तदन्तिनः बध्यन्ते।

**भावार्थः** अल्पानां वस्तूनां तुच्छजन्तूनां वा ऐक्यं दुर्जयं भवति। यथा तृणैः गुणीभूतया रज्ज्वा मदोन्मत्ताः गजाः अपि बध्यन्ते॥

**शब्दार्थाः**

विशीर्णानि = नष्टानि (નાશ પામ્યા - ફૂટી ગયા)

असाराणाम् = सारहीनानाम्, क्षुद्राणाम् (દુર્બળોનો)

लोलुपः = लोभी (લાલચુ)

वराकः = तुच्छः सामान्यः (બાપડો - બિચારો)

रवः = शब्दः (અવાજ)

गर्तः = विवर्तः (ખાડો)

समवायः = ऐक्यम् (સમૂહ)
काष्ठकुट्टः = काष्ठत्रोटकः पक्षी
(લક્કડખોદ નામક પક્ષી)
तृषार्तः = पिपासुः (તરસ્યો)
गुणत्वम् = एकत्रीकरणम्, सङ्घटनम् (સંગઠિત)
नयः = उपायः, नीति (ઉપાય)
अतिक्रान्तः = विगतः, अतीत (વીતી ગયેલ)
तथानुष्ठिते = तथा आचरिते (આ પ્રમાણે કરવાથી)

**स्वाध्यायः**

**1. प्रदत्तेषु विकल्पेषु योग्य विकल्पं चित्वा लिखत।**

(1) चटक दम्पती नीडं कुत्र अकुरुताम्?

(क) शमीवृक्षे (ख) आम्रवृक्षे (ग) तमालवृक्षे (घ) नीमवृक्षे

(2) प्रमत्तगजः किमर्थं तमालवृक्षम् उपागतः?

(क) फलभोजनार्थं (ख) शाखात्रोटनाय (ग) चटकांद्रष्टुम् (घ) छायार्थम्

(3) चटकायाः विलपनं श्रुत्वा सर्वादौ कः समायातः?

(क) चटकः (ख) काष्ठकुट्टः (ग) वीणारवा (घ) मेघनादः

(4) कः नष्टं मृतं प्रति शोकं न करोति?

(क) अल्पज्ञः (ख) मूर्खः (ग) विद्वान् (घ) मनुष्यः

(5) कः यथार्थेन भृत्यः उच्यते?

(क) भक्तिमान् (ख) आज्ञाकारी (ग) आपत्तौ सहायकृत् (घ) प्रियभाषी

(6) का गजस्य कर्णे मधुरं शब्दम् अकरोत्?

(क) चटका (ख) काष्ठकुट्टः (ग) वीणारवा (घ) मेघनादः

(7) काष्ठकुट्टः केन गजस्य नयने अस्फोटयत्?

(क) चञ्च्वा (ख) नखैः (ग) तीक्ष्णदन्तैः (घ) पादप्रहारेण

(8) तडागसमीपं स्थित्वा कः रवम् अकरोत्?

(क) गजः (ख) मेघनादः (ग) वीणारवा (घ) चटका

(9) एतेषु केषां चिन्तितोपायः विफलः न भवेत्?

(क) हितेच्छूनाम् (ख) विदुषाम् (ग) असाराणाम् (घ) बुद्धिमताम्

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) गजेन तमालवृक्षम् उपेत्य किं कृतम्?

(2) काष्ठकुट्टस्य वचनानुसारं कः सुहृद् भवति?

(3) मित्रैः किं विचार्य मित्राणां प्रियकार्यं कर्तव्यं भवति?

(4) मक्षिकायाः मधुरशब्दैः गजः कीदृशः सञ्जातः?

(5) मत्तदन्तिनः कैः बध्यन्ते?

(6) स्वजनानां मरणान्ते किं न करणीयं भवति?

**3. द्वित्रिवाक्यैः प्रश्नान् उत्तरत।**

(1) चटकायाः अण्डानि कथं विशीर्णानि अभवन्?

(2) याज्ञवल्क्यस्मृत्यनुसारं किमर्थं मरणान्ते न रोदितव्यम्?

(3) गजस्य वधः सङ्क्षेपेण लिखत।

**4. विस्तृतम् उत्तरं लिखत।**

(1) नष्टं मृतं .......... श्लोकं प्रपूर्य भावार्थं लिखत।

(2) केषां विचिन्तिताः उपायाः विफलाः न स्युः?

(3) बहूनामप्य .......... श्लोकं प्रपूर्य भावार्थं लिखत।

(4) पञ्चतन्त्रस्य विषये सप्तवाक्यानि लिखत।

**5. 'अ' विभागेन सह 'ब' विभागं योजयत।**

| अ | ब |
|---|---|
| (1) ''अस्य वधेनैव मम दुःखम् अपसरेत्।'' | (1) काष्ठकुट्टः |
| (2) ''ममापि मित्रं वीणारवा अस्ति।'' | (2) वीणारवा |
| (3) ''अस्मादृशानां पुरतः वराकस्य गजस्य का गतिः'' | (3) चटका |
| (4) ''मित्राणां प्रियकार्यं तु कर्तव्यम् एव भवति॥'' | (4) मेघनादः |

**6. अधः प्रदत्तपदानां सन्धिच्छेदं कुरुत।**

(1) कस्मिंश्चित्
(2) त्रयोऽपि
(3) यथोचितम्
(4) अतस्तादृशः
(5) प्रत्युपकारम्
(6) कथञ्चिन्न
(7) विद्वद्भिश्चिन्तिताः
(8) तृणैर्गुणत्वम्

**छात्रप्रवृत्तिः**

लघ्वीनां कथानां सरलसंस्कृते अभिनयीकरणम्।

**अध्यापकप्रवृत्तिः**

कथापात्राणां नाम्नाम् अर्थगाम्भीर्यं सूचयेत्।

●

# 14

# पुराणपरिचयः

**प्रस्तावना**

**आग्नेये हि पुराणेऽस्मिन् सर्वविद्याः प्रदर्शिताः।**

भगवान्वेदव्यासः मानवसमाजाय पुराणानां भगवदवतारलीलया, सत्पुरुषचरित्राणां धर्माचरणेन वैराग्ययुक्त-जीवनशिक्षां प्रदत्तवान्। पुराणस्य-उपदेशमयं कथामार्गं श्रुत्वा सामान्यजनोऽपि धर्मपथं गन्तुं शक्नोति। अत्र भगवान् वेदव्यासः सश्रुत्-सम्मितोपदेशं वर्णयति। एभिः उपदेशैः अधुनाऽपि अस्माकं मानसे पुराणसंस्कृतिः अङ्किता अस्ति। पुराणानां वाङ्मयं विशालं सामान्यजनपोषकं परम्परासंरक्षकं हितकारकं चास्ति।

**पुराणपरिचयः**

पुरा नवं भवतीति पुराणम्। पुरातनस्य कालस्य पुराणानि विदुर्बुधाः। पुराणमार्गः सरलः सुखदः वरिष्ठश्चास्ति। पुराणसाहित्यं संस्कृत- वाङ्गमयस्याद्भुतम् रत्नं वर्तते। यत्र वर्णधर्माणाम् धर्माः, भारतीया संस्कृतिः, मानव-सामान्यस्य धर्मः, भारतीयमैतिह्यम्, विश्वस्यभूगोलम्, ब्रह्माण्डकोशः सांख्यदर्शनम्, योगदर्शनम्, जपतपोनियमोपवासव्रततीर्थाटनादिकानाम् माहात्म्यम् अत्र कल्याणकामिभिरनुष्ठेयाः निःश्रेयसावाप्तिसाधकतमाः कर्मयोग-ज्ञानयोग-भक्तियोगादिकाः महतां राजवंश्यानां चरित्राणि, भुवोभारावताराय भगवता नारायणेन कृताः ते ते अवताराः यन्त्रमन्त्रतन्त्रविद्याः ज्योतिश्शास्त्रम् प्रभृतयो नैकविद्याः विषयाः प्रकाशन्ते।



भगवान् वेदव्यासः

**पुराणलक्षणम् - सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥**

पुराणेषु पञ्चतत्त्वानां समावेशोऽपेक्ष्यते।

(1) सर्गः - सृष्ट्युत्पत्तिवर्णनम्।

(2) प्रतिसर्गः - प्रलयस्य, सृष्टेः पुनरुद्भवस्य च वर्णनम्।

(3) वंशः - देवानाम् ऋषीणां च वंशावल्या वर्णनम्।

(4) मन्वन्तराणि - प्रत्येकं मनोःकालःतत्काल-घटितानां वृत्तानां च वर्णनम्।

(5) वंशानुचरितम् - सूर्य-चन्द्रादि-वंशजानां नृपाणाम्, इतिवृत्तात्मकं वर्णनम्। पञ्चलक्षणमिति सामान्यो निर्देशः।

**अष्टादश-पुराणानि, पुराणानां श्लोकसंख्या :**

**मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।**
**अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते।**

पुराणानां नामानि सरलतया कण्ठस्थानि स्युः तदर्थमयं श्लोकः

| | | | |
|---|---|---|---|
| (1) मत्स्यपुराणम् | - 14000 | (10) वायुपुराणम् | - 24000 |
| (2) मार्कण्डेयपुराणम् | - 9000 | (11) वामनपुराणम् | - 10000 |
| (3) भविष्यपुराणम् | - 24500 | (12) अग्निपुराणम् | - 16000 |
| (4) भागवतपुराणम् | - 18000 | (13) नारदपुराणम् | - 25000 |
| (5) ब्रह्मवैवर्तपुराणम् | - 18000 | (14) पद्मपुराणम् | - 55000 |
| (6) ब्रह्माण्डपुराणम् | - 12200 | (15) लिङ्गपुराणम् | - 11000 |
| (7) ब्रह्मपुराणम् | - 13000 | (16) गरुडपुराणम् | - 18000 |
| (8) वराहपुराणम् | - 24000 | (17) कूर्मपुराणम् | - 18000 |
| (9) विष्णुपुराणम् | - 23000 | (18) स्कन्दपुराणम् | - 81100 |

**पुराणानां महत्त्वम् :** भारतीयायाः संस्कृतेः सभ्यतायाश्च यथायथम्- अवगमाय पुराणानां नितरां महत्त्वमस्ति। पुराणानि विहाय न क्वचिदन्यत्र विपुलेऽपि वाङ्मये प्राचीनसंस्कृतेः सविस्तरं वर्णनम् उपलभ्यते। सर्वजनहिताय सर्वबोधाय च प्रसादगुणोपेतायाः पद्धत्याः समाश्रयेण पुराणानां महत्त्वं प्रतिपदम् आलक्ष्यते। आबालवृद्धं पुराणानां प्रियत्वं न कस्यचिद् विपश्चितो विप्रतिपत्तेर्विषयः। कथाख्यानाश्रवणे-निगूढतत्त्वनिरूपणं सरलतया तदभिव्यक्तिश्च पुराणानां महत्त्वम् एधयति। पुराणानां तादृशी मनोहरा शैलीभावाभिव्यक्तिप्रक्रिया च यथा ज्ञानलवदुर्विदग्धोऽपि मानवो विविधविषयावगाहिज्ञानां सरलतया अवाप्नोति। पुराणेषु क्वचित् काव्यच्छटा, क्वचित् प्रकृतिवर्णनम्, क्वचिद् भावोत्कर्षः, क्वचिद् ज्ञानस्योदयः, क्वचित् तत्त्वार्थचिन्ता, क्वचित् कर्तव्योद्बोधनम्, क्वचित् ज्ञानमीमांसा च ऐन्द्रधनुषीम् आभां विस्तारयति। पुराणानां तादृशं महत्त्वं यथा भिन्नरुचिर्हि लोकः स्वरुचिम् अनुसृत्य प्रवृत्तोऽपि स्वेष्टं प्रतिगृह्णाति। विदुषे तत्त्वज्ञानविषयाः, बालिशाय शृङ्गाररसरुचिराणि आख्यानानि, नीतिज्ञाय नीतितत्त्वानि, राज्ञे राजकर्माणि, व्यवहारिणे अर्थागम-साधनानि, अध्यात्मदृशे ब्रह्मतत्त्वमीमांसा, वनिताभ्यो भक्तिमार्गः जिज्ञासवे भूगोल-ऐतिह्यादि-सम्बद्धा विषयाः यथायथं तच्चित्तावर्जकत्वेन प्रवर्तन्ते।

विशेषतया पुराणानां योगदानं समाजे महत्त्वपरिपूर्णमस्ति। पापपुण्ययोः व्याख्या सरलतया निरूपिता वर्तते। एकेनैव श्लोकेन अष्टादशपुराणानां सारः व्यासवचनात् दृश्यते-

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।**
**परोपकारः पुण्याय पापाय परपीडनम्॥**

**शब्दार्थाः**

बुधाः = पण्डिताः

निःश्रेयसम् = कल्याणम्, मङ्गलम्

काव्यच्छटा = काव्यशोभा

प्रतिगृह्णाति = स्वीकरोति

विहाय = त्यक्त्वा

ऐतिह्यम् = इतिहासः

एधयति = वर्धयति

बालिशः = मूर्खः

वनिता = स्त्री

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) कस्मिन् पुराणे सर्वाः विद्याः प्रदर्शिताः ?

(क) ब्रह्मपुराणे (ख) वामनपुराणे (ग) वराहपुराणे (घ) अग्निपुराणे

(2) पुराणानां का सङ्ख्या ?

(क) सप्तदश (ख) अष्टादश (ग) षोडश (घ) त्रयोदश

(3) कस्मिन् पुराणे सर्वाधिका श्लोकसंख्या ?

(क) कूर्मपुराणे (ख) स्कन्दपुराणे (ग) ब्रह्मपुराणे (घ) श्रीमद्‌भागवतमहापुराणे

(4) विष्णुपुराणे का श्लोकसंख्या ?

(क) 23000 (ख) 22000 (ग) 18000 (घ) 2000

(5) कस्मिन् पुराणे श्लोकसंख्या न्यूनतमा ?

(क) मार्कण्डेयपुराणे (ख) ब्रह्मपुराणे (ग) ब्रह्मवैवर्तपुराणे (घ) वराहपुराणे

(6) गरुडपुराणे श्लोकसंख्या का ?

(क) 19000 (ख) 18000 (ग) 17000 (घ) 9000

(7) स्कन्दपुराणे का श्लोकसंख्या ?

(क) 18000 (ख) 19000 (ग) 81100 (घ) 16000

(8) 10000 श्लोकसंख्या कस्मिन् पुराणे ?

(क) अग्निपुराणे (ख) वराहपुराणे (ग) ब्रह्मपुराणे (घ) वामनपुराणे

(9) 'ब्र' अक्षरात् कति पुराणानि ?

(क) त्रिणि (ख) द्वे (ग) चत्वारि (घ) पञ्च

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) पुराणशब्दस्य का व्युत्पत्ति ?

(2) पुराणस्य कति लक्षणानि ?

(3) सर्गः अर्थात् किम् ?

(4) ''वंशानुचरितम्'' अर्थात् किम् ?

(5) प्रतिसर्गस्य कोऽर्थः ?

(6) ''वचतुष्टयम्'' इत्यनेन केषां पुराणानां गणना भवति ?

(7) व्यासस्य वचनद्वयं किम् ?

**3. पञ्चवाक्यैः प्रश्नाम् उत्तराणि लिखत।**

(1) पुराणानां नामानि विलिख्य केषाञ्चित् चतुर्ण्णां श्लोक संख्या लेखा।

(2) पुराणपञ्चलक्षणं प्रतिपादयत।

(3) पुराणानां महत्त्वम्।

**4. अ विभागेन सह ब विभागं योजयत।**

| अ-पुराणनाम | ब-श्लोकसंख्या |
|---|---|
| (1) श्रीमद्भागवतम् | (1) 24000 |
| (2) वायुपुराणम् | (2) 14000 |
| (3) मत्स्यपुराणम् | (3) 9000 |
| (4) ब्रह्माण्डपुराणम् | (4) 25000 |
| (5) मार्कण्डेयपुराणम् | (5) 12200 |
| | (6) 18000 |

**छात्रप्रवृत्तिः**

छात्रैः अष्टादशपुराणानां साररूपेण कथा अवधेया।

**अध्यापकप्रवृत्तिः**

अध्यापकःपुराणस्य सत्यकथां छात्रेभ्यः वदेयुः।

पुराणस्य माहात्म्यं किमस्ति तदपि छात्रेभ्यः विस्तरेण कथयेयुः

●

# 15

# रामायणम्

**प्रस्तावना**

पुराणं नाम इतिहासः। अष्टादशपुराणानां **छन्दः** स्वरूपेण वर्णनं प्रथमं रामायणे जातम्। तद्रचनात्मकं कर्म वाल्मीकिना कृतम् अस्ति। तेन सः आदिकविः इति सर्वैः स्वीक्रियते। रामायणमहाकाव्यस्य कविः वाल्मीकिः अस्ति। संस्कृतसाहित्ये रामायणं महत्त्वपूर्णा श्रेष्ठा च कृतिः वर्तते। अपारे संसारे रामायणं-यथा समाजस्य प्रियं जातं न तथा अन्यत् काव्यम्। भास-कालिदास-अश्वघोष-जयदेव-मुरारि-प्रभृति महाकविभिः रामायणस्य आधारेण स्वप्रतिभा प्रकटिता। अधुनापि रामायणमधिकृत्य बहूनि नाटकानि-विविधभाषासु लिखितानि वर्तन्ते।

**रामायणपरिचयः**



रामायणम् आदि महाकाव्यमस्ति। तस्य रचयिता महाकविश्रीः वाल्मीकिः आदिकविरिति जनश्रुतिरतीव सुप्रसिद्धा। रामायणे करुणः रसः। कारणम् अस्य काव्यस्य उत्पत्तिरेव करुणेन वातावरणेन वाल्मीकिकवेः मनसि जाता। अत्र इयं कथा अस्ति। अथैकदा ऋषिः स्नानार्थं तमसानदीं गतः। तत्र व्याधविहितं क्रौञ्चवधं दृष्ट्वा-

**मा निषाद प्रतिष्ठां त्वम् अगमः शाश्वतीसमाः।**
**यत्क्रौञ्चमिथुनादेकं अवधीः काममोहितम्॥**

इति अनुष्टुप्छन्दोयुतां वाचं अवदत्। अयमेव श्लोकः आदिकाव्यत्वेन गण्यते।

**कथानकम्** - अयोध्यानृपतेर्दशरथस्य सुतः राम एव कविवर्णनविषयभूतः। रामस्य उत्पत्तितः स्वर्गारोहणं यावत् वृत्तमत्र गुम्फितम्। सहैव तत्कालस्य सूक्ष्ममैतिहासिकं भौगोलिकं साहित्यिकं सामाजिकं तथ्यमत्र अवलोक्यते। रामः परब्रह्म, कारुण्याद्धरायामवतीर्णः। कालक्रमेण अस्य पिता दशरथः माता कौशल्या, पत्नी सीता, अयोध्या जन्मभूमिः च। सः आदर्शः-पुत्रः, पतिः, पिता, भ्राता, राजा, गुरुश्च।

**रामायणस्य स्वरूपम्** - रामायणे चतुर्विंशतिसहस्रश्लोकानामिति तत् चतुर्विंशतिसाहस्रीसंहितापदेनाभिधीयते। रामायणग्रन्थे सप्तकाण्डानि सन्ति।

(1) प्रथमे बालकाण्डे रामस्य यौवनसुखं, विश्वामित्रेण मुनिवरेण सह तदाश्रमपदं प्रति प्रस्थानं, तत्र यागविघातिनां राक्षसानां हननं सीतायाः विवाहसंस्कारः च इति। अस्मिन् काण्डे सप्तसप्ततिः (77) अध्यायाः सन्ति।

(2) द्वितीये अयोध्याकाण्डे - रामस्य यौवराज्यपदाभिषेकसमारोहोपक्रमः तत्र कैकेयीकृतः प्रत्यूहः रामस्य निर्वासनम्, रामविरहे दशरथस्य प्राणत्यजनम्। अस्मिन् काण्डे एकोनविंशत्यधिकशतम् (119) अध्यायाः सन्ति।

(3) तृतीये अरण्यकाण्डे रामस्य दण्डकगहनऽऽवगाहनं विराधाऽऽदिचतुर्दशसहस्रराक्षसानाम् उज्जासनं च रावणकृतं जानकीहरणम्। अस्मिन् काण्डे पञ्चसप्ततिः (75) अध्यायाः सन्ति।

(4) चतुर्थे किष्किन्धाकाण्डे रामस्य सुग्रीवेण सह मित्रता, बालिनो निषूदनं सीतायाः च अन्वेषणम्। अस्मिन् काण्डे सप्तषष्टिः (67) अध्यायाः सन्ति।

(5) पञ्चमे सुन्दरकाण्डे समुद्रलङ्घनं लङ्कादहनं हनुमतः सीतायाः अन्वेषणम्। अस्मिन् काण्डे अष्टषष्टिः (68) अध्यायाः सन्ति।

(6) युद्धकाण्डनाम्नि षष्ठे काण्डे राम-रावणयोर्मध्ये युद्धं, रामस्य रावणमारणं लङ्काजयश्च। अस्मिन् काण्डे अष्टाविंशत्युत्तरैकशतं (128) अध्यायाः सन्ति।

(7) उत्तरकाण्डेतिसंज्ञिते सप्तमे काण्डे रामराजादिष्टं, सीताप्रव्राजनं सीताशोकः वाल्मीकेराश्रमे शरणम्। अस्मिन् काण्डे एकादशोत्तरैकशतं (111) अध्यायाः सन्ति।

**समीक्षा** - रामायणाध्ययनादित्थं ज्ञायते यत् वाल्मीकिः न केवलं-कविः अपितु राष्ट्रहितचिन्तकः। न केवलं साहित्यसर्जकः अपितु संस्कृतिसंस्कारोपासकः। कवेः काव्यकलाकामिनी रामायणमहाकाव्यं रङ्गमञ्चे सोत्साहेननृत्यति। भारतवर्षस्य भव्या, दिव्या, निर्मलातिपूता संस्कृतिः रामायणस्य नायकोपनायकमाध्यमेन-अलङ्कृता प्रदीपिता च भवति।

**कूजन्तं राम रामेति मधुरं मधुराक्षरम्।**
**आरुह्य कविता शाखां वन्दे वाल्मीकिकोकिलम्॥**

## शब्दार्थाः

निषादः = व्याधः
गुम्फितम् = सूत्रितम्
निषूदनं = हननं
पूता = पवित्रा
उज्जासनं = मारणम्
जनश्रुतिः = किंवरन्ती
प्रत्यूहः = विघ्नः
अन्वेषणम् = गवेषणा
अलङ्कृता = सुशोभिता

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) रामायणे मुख्यरसः कः?
(क) वीरः (ख) शृङ्गारः (ग) करुणः (घ) शान्तः

(2) मा निषाद प्रतिष्ठां त्वं...... इति श्लोकः कस्य मुखात् निर्गतः?
(क) वशिष्ठमुखात् (ख) शुक्राचार्यमुखात् (ग) विश्वामित्रमुखात् (घ) वाल्मीकिमुखात्

(3) रामायणं कतिकाण्डात्मकं वर्तते?
(क) पञ्च (ख) सप्त (ग) षट् (घ) नव

(4) बालकाण्डे कति अध्यायाः सन्ति?
(क) सप्तसप्ततिः(77) (ख) नवनवतिः(99) (ग) पञ्चाशीतिः (85) (घ) नवतिः (90)

(5) वाल्मीकिः स्नानार्थं कुत्र अगात्?
(क) तमसानदीम् (ख) गङ्गानदीम् (ग) यमुनानदीम् (घ) गोदावरीम्

(6) अयोध्याकाण्डे कति अध्यायाः सन्ति?

(क) 119 (एकोनविंशत्युत्तरशतम्) (ख) 120 (विंशत्युत्तरशतम्)

(ग) 115 (पञ्चदशोत्तरशतम्) (घ) 110 (दशोत्तरशतम्)

(7) जानकीहरणं कस्मिन् काण्डे भवति?

(क) अयोध्याकाण्डे (ख) अरण्यकाण्डे (ग) किष्किन्धाकाण्डे (घ) उत्तरकाण्डे

(8) समुद्रोल्लङ्घनं कस्मिन् काण्डे आयाति?

(क) सुन्दरकाण्डे (ख) लङ्काकाण्डे (ग) अरण्यकाण्डे (घ) किष्किन्धाकाण्डे

(9) सम्पूर्णरामायणे कति श्लोकाः सन्ति?

(क) 23000 (ख) 24000 (ग) 21000 (घ) 25000

(10) उत्तरकाण्डे कति अध्यायाः सन्ति?

(क) 111 (ख) 119 (ग) 115 (घ) 114

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) वाल्मीकिमुखात् प्रथमः कः श्लोकः निर्गतः?

(2) सर्वाधिका अध्यायसंख्या कस्मिन् काण्डे?

(3) सुग्रीवरामयोर्मेलनं कस्मिन् काण्डे भवति?

(4) लङ्कादहनं कस्मिन् काण्डे भवति?

(5) वालीवधः कस्मिन् काण्डे भवति?

(6) बालकाण्डे अध्यायसंख्या का?

(7) वाल्मीकिः कः कविरुच्यते?

**3. पञ्चवाक्यैः प्रश्नानाम् उत्तराणि लिखत।**

(1) बालकाण्डस्य सारांशः लेख्यः।

(2) अयोध्याकाण्डे किं किम् आयाति?

(3) अरण्यकाण्डे का कथा?

(4) किष्किन्धाकाण्डे किं किं भवति?

**4. टिप्पणी लेख्या।**

(1) रामायणपरिचयः

(2) सुन्दरकाण्डवृत्तान्तम्

(3) रामायणसमीक्षा

**छात्रप्रवृत्तिः**

छात्रैः पुस्तकालयं गत्वा रामायणविषयाः सन्दर्भग्रन्थाः पठनीयाः।

**अध्यापकप्रवृत्तिः**

(1) अध्यापकाः छात्रबोधाय अन्यरामायणग्रन्थस्य उपयोगं कृत्वा वर्गे बोधं दद्युः।

(2) रामायणस्य अन्याः कथाः श्रावयेयुः।

●

# 16

# कर्णस्य औदार्यम्

**प्रस्तावना**

संस्कृतनाट्यसाहित्ये महाकविभासः प्रसिद्धः वर्तते। कालिदासः अपि भासस्य नामोल्लेखम् अत्यादरेण कृतवान्। महाकविभासः ख्रीष्टाब्दपूर्वं 400 वर्षेभ्यः प्राक् अभवत् इति विदुषां मतम् अस्ति। सर्वशास्त्रनिपुणः भासः अनेकानि रूपकाणि व्यरचयत्। तस्य रूपकेषु ''कर्णभारम्'' इति अतिप्रसिद्धम्। इदम् एकाङ्कि प्रकारकं रूपकम् अस्ति। एतस्य विषयवस्तु महाभारतात् उद्धृतम् अस्ति। प्रस्तुते पाठे कर्णभारस्य कश्चन अंशः प्रस्तुतः वर्तते।

भासस्य विशिष्टः रचनाशैलीगुणः अस्ति यत् कर्णः असामञ्जस्ये वर्तते। एकदा सः मात्रे कुन्त्यै वचनं ददाति यत् अर्जुनं विहाय कस्यापि पाण्डवस्य वधं न करिष्यति। अपरत्र सः परशुरामेण शप्तः अस्ति, यत् प्राप्ते काले कर्णस्य विद्याविस्मरणं भविष्यति। एतादृश्यामवस्थायां कर्णः दृढनिश्चयेन योद्धुं प्रस्थितः।

पुत्रप्रेमान्धः इन्द्रः विप्ररूपेण कर्णात् कवचकुण्डले याचितुं समायाति। शल्येन वारितः सन्नपि कर्णः सहर्षं कवचकुण्डलदानं करोति। यद्यपि तद्दानं नाम तस्य जीवनदानं तथापि सः आत्मनः औदार्येण इन्द्राय कवचकुण्डले समर्पयति इति भासेन अत्र सम्यग् उपनिबद्धम् अस्ति।

---

**शक्रः** – भोः कर्ण! महत्तरां भिक्षां याचे।

**कर्णः** – दृढं प्रीतोऽस्मि भगवन्। नमस्करोमि।

**शक्रः** – (आत्मगतम्) किं नु खलु मया वक्तव्यम्, यदि दीर्घायुर्भवेति वक्ष्ये दीर्घायुर्भविष्यति। यदि न वक्ष्ये, मूढ इति मां परिभवति। तस्मादुभयं परिहृत्य किं नु खलु वक्ष्यामि। भवतु दृष्टम्। (प्रकाशम्) भो कर्ण! सूर्य इव, चन्द्र इव, सागर इव तिष्ठतु ते यशः।

**कर्णः** – भगवन्! किं न वक्तव्यं दीर्घायुर्भवेति। अथवा एतदेव शोभनम्। कुतः-

**धर्मो हि यत्नैः पुरुषेण साध्यो**
**भुजङ्गजिह्वा चपला नृपश्रियः।**
**तस्मात् प्रजापालनमात्रबुद्ध्या**
**हतेषु देहेषु गुणा धरन्ते॥**

भगवन्! किमिच्छसि? किमहं ददामि?

**शक्रः** – महत्तरां भिक्षां याचे।

**कर्णः** – महत्तरां भिक्षां भवते दास्ये। श्रूयन्तां मद्विभवाः।

**गुणवदमृतकल्पक्षीरधाराभिवर्षि**
**द्विजवर! रुचितं ते तृप्तवत्सानुयन्त्रम्।**
**तरुणमधिकमर्थिप्रार्थनीयं पवित्रं**
**विहितकनकशृङ्गं गोसहस्रं ददामि।**

**शक्रः** – गोसहस्रमिति। मुहूर्तकं क्षीरं पिबामि। नेच्छामि

**कर्णः** – किं नेच्छति भवान्? इदमपि श्रूयताम्-

**रवितुरगसमानं साधनं राजलक्ष्म्याः**

**सकलनृपतिमान्यं मान्यकाम्बोजजातम्।**

**सुगुणमनिलवेगं युद्धदृष्टापदानं**

**सपदि बहुसहस्रं वाजिनां ते ददामि॥**

**शक्रः** - अश्व इति। मुहूर्तकम् आरोहामि। नेच्छामि।

**कर्णः** - किं नेच्छति भवान्? अन्यदपि श्रूयताम्-

**मदसरितकपोलं षट्पदैः सेव्यमानं**

**गिरिवरनिचयाभं मेघगम्भीरघोषम्।**

**सितनखदशनानां वारणानामनेकं**

**रिपुसमरविमर्दं वृन्दमेतद्ददामि॥**

**शक्रः** - गज इति? मुहूर्तकम् आरोहामि। नेच्छामि कर्ण नेच्छामि।

**कर्णः** - तर्हि अपर्याप्तं कनकं ददामि।

**शक्रः** - गृहीत्वा गच्छामि (किञ्चित् गत्वा) नेच्छामि कर्ण! नेच्छामि।

**कर्णः** - तेन हि जित्वा पृथिवीं ददामि।

**शक्रः** - पृथिव्या किं करिष्यामि?

**कर्णः** - तेन हि अग्निष्टोमफलं ददामि।

**शक्रः** - अग्निष्टोमफलेन किं कार्यम्?

**कर्णः** - तेन हि मच्छिरो ददामि।

**शक्रः** - अविहा! अविहा!

**कर्णः** - न भेतव्यं न भेतव्यम्। प्रसीदतु भवान्।

अन्यदपि श्रूयताम्-

**अङ्गैः सहैव जनितं मम देहरक्षा**

**देवासुरैरपि न भेद्यमिदं सहस्रैः।**

**देयं तथापि कवचं सह कुण्डलाभ्यां**

**प्रीत्या मया भगवते रुचितं यदि स्यात्॥**

**शक्रः** - (सहर्षम्) ददातु ददातु।

**कर्णः** - (आत्मगतम्) एष एवास्य कामः। किं नु खलु अनेककपटबुद्धेः कृष्णस्योपायः। सोऽपि भवतु। धिगयुक्तमनुशोचितुम्। नास्ति संशयः। (प्रकाशम्) गृह्यताम्।

**शल्यः** - अङ्गराज! न दातव्यं न दातव्यम्।

**कर्णः** - शल्यराज! अलमलं वारयितुम्। पश्य-

**शिक्षा क्षयं गच्छति कालपर्ययात्**

**सुबद्धमूला निपतन्ति पादपाः।**

**जलं जलस्थानगतं च शुष्यति**

**हुतं च दत्तं च तथैव तिष्ठति॥**

तस्मात् गृह्यताम्। (निकृत्य ददाति)

**शब्दार्थाः**

| | | |
|---|---|---|
| औदार्यम् = उदारता | दृढं = अतिशयः, प्रगाढः | विभवाः = समृद्धयः |
| वाजिनां = अश्वानां | वारणानां = हस्तिनां | सपदि = तत्क्षणम्, सहसा |
| वृन्दः = समूहः | | |

**स्वाध्यायः**

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) इन्द्रः केन वेषेण कर्णपार्श्वे समागतवान्?
(क) विप्रवेषेण (ख) राक्षसवेषेण (ग) दुर्योधनवेषेण (घ) किमपि न

(2) इन्द्रः कर्णाय किं आशीर्वादं ददाति?
(क) दीर्घायुर्भव (ख) धनवान् भव (ग) तिष्ठतु ते यशः (घ) पुत्रवान् भव

(3) पुरुषेण यत्नैः ............... साध्यः।
(क) धर्मः (ख) अर्थः (ग) कामः (घ) मोक्षः

(4) भुजङ्गजिह्वा इव चपला का?
(क) नारी (ख) युद्धश्रीः (ग) नृपश्रीः (घ) बुद्धिः

(5) 'विहितकनकशृङ्गं' इति पदं कस्य विशेषणम्?
(क) सुवर्णम् (ख) रजतम् (ग) भवनम् (घ) गोसहस्रम्

(6) राजलक्ष्म्याः साधनरूपाः के?
(क) गजाः (ख) वाजिनः (ग) सैनिकाः (घ) पदातयः

(7) कर्णः इन्द्राय किं जित्वा दातुम् इच्छति?
(क) धनम् (ख) राज्यम् (ग) स्वर्गम् (घ) पृथिवीम्

(8) कर्णः इन्द्राय कस्य यज्ञस्य फलं दातुं पृच्छति?
(क) अग्निष्टोमस्य (ख) अश्वमेधस्य (ग) सोमयज्ञस्य (घ) पितृयज्ञस्य

(9) कर्णस्य मतानुसारं कपटबुद्धिः कः?
(क) शल्यः (ख) इन्द्रः (ग) दुर्योधनः (घ) कृष्णः

(10) कालपर्ययात् का क्षयं गच्छति?
(क) मतिः (ख) लक्ष्मीः (ग) शिक्षा (घ) सम्पत्

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) प्रस्तुतः पाठः कस्मात् रूपकात् स्वीकृतः? (2) कर्णस्य सारथिः कः?
(3) कीदृशीं भिक्षाम् इन्द्रः याचते? (4) कर्णः किम् अपर्याप्तं दातुं पृच्छति?
(5) किं किं तथैव तिष्ठति?

**3. पञ्चवाक्यैः प्रश्नाम् उत्तराणि लिखत।**

(1) कर्णः कीदृशं गोसहस्रं दातुम् उद्यतः अभवत्?
(2) इन्द्रः कवचकुण्डले याचते तदा कर्णः किं किं विचारयति?
(3) कर्णः स्ववैभवे किं किं वर्णयति?

**4. टिप्पणीं लिखत।**

(1) कर्णस्य औदार्यम् (2) दानमहिमा

●

# 17

# भारतभरतशाकुन्तलः

**प्रस्तावना**

''भारतम्'' प्राचीनकालात् संस्कारसमृद्धिशिक्षणशिष्टाचारादिषु क्षेत्रेषु सदैव अग्रिमतां भजते। संस्कृतोऽयं देशः स्वसमृद्ध्या संस्कारसौरभेण च ''सोने की चीडियाँ'' इति नाम्ना प्रथितोऽस्ति। अस्माकं संस्कृतसंस्कृत्योः संवर्धनरूपः शिक्षणमूल्यमार्गप्रदर्शकः प्राचीनतमश्च ग्रन्थः ऋग्वेदः सदैव समादरणीयः वर्तते। सुराष्ट्रस्य भारतदेशस्य सभ्यतया एव नदी मातृत्वेन, वटवृक्षः पितामहत्वेन (वड-दादा) सूर्योऽपि पितामहत्वेन (सूरजदादा), धेनुर्माता परमशिवा इति रूपेण अभिधीयते। एतादृशे समृद्धे, संस्कृते, शिक्षिते राष्ट्रेऽस्मिन् वयं समुत्पन्नाः इति अस्मदीयः गौरवास्पदो विषयः।

''भारतम्'' इति शब्देनैव मनसि उत्साह, अक्ष्णोः तेजः, हृदि आह्लादकत्वं भृशं व्याप्यते। एतादृशस्य सुन्दरदेशस्य भव्यतापूर्णं ''भारतम्'' इति नाम भरतराजस्य नाम्ना समलङ्कृतमस्ति। तस्योल्लेखः श्रीवेदव्यासविरचितमहाभारतस्य आदिपर्वणि संभवपर्वणि चतुःसप्ततितमे अध्याये एवञ्च कविवरकालिदासग्रथित ''अभिज्ञानशाकुन्तलम्'' नामके नाटके च कृतः अस्ति।

---

शाकुन्तलः ''भरतः'' प्राचीनभारतस्य चक्रवर्ती सम्राड् आसीत्। सः हस्तिनापुरनरेशदुष्यन्तस्य मेनकाप्सरसः पुत्र्याः शकुन्तलायाः च पुत्ररत्नमासीत्। पुरुवंशस्यास्य नृपस्य गणना महाभारते श्रेष्ठत्वमापन्नेषु षोडशसु राजसु क्रियते। महाभारते सुस्पष्टं लिखितं वर्तते-

- **भरताद् भारती कीर्तिर्येनेदं भारतं कुलम्।**
  **अपरे ये च पूर्वे वै भारता इति विश्रुताः॥**
  **(75/127)**

अनुभरतं ये अस्मिन् कुले उत्पन्नाः ते राजानोऽपि 'भारत' नाम्नैव विश्रुताः। भरतस्य शैशवंनाम 'सर्वदमन' इति आसीत्। यतः षड्वर्षीयोऽयं बालः बाल्यावस्थायामेव आश्रमे सिंह-व्याघ्र-वराह-हस्तिसदृशान् भयङ्करान्, हिंसकान् पशून् वशमानीय वृक्षे बध्नाति स्म।



- **सिंहव्याघ्रान् वराहांश्च महिषांश्च गजांस्तथा।**
  **बबन्ध वृक्षे बलवानाश्रमस्य समीपतः॥**
  **(74/6)**

'बलश्च बलिनां वरः' बलिष्ठोऽयं भरतः बाल्यावस्थायामेव दानवैः सह मल्लयुद्धं कृत्वा तानजयत्।

- **अस्त्वयं सर्वदमनः सर्वं हि दमयत्यसौ।**
  **सः सर्वदमनो नाम कुमारः समपद्यत॥**
  **(74/8)**

तेन सर्वदमनेन द्वादशवर्षैः एव संपूर्णशास्त्राणि वेदाश्चाधीताः। अस्य माता शकुन्तला विश्वामित्रमेनकयोः पुत्री आसीत्। तस्याः पालनपोषणं ऋषिणा कण्वेन स्वाश्रमे विहितम्। मृगयार्थं विचरता राज्ञा दुष्यन्तेन सह गान्धर्वविधिना

तस्याः विवाहः अभवत्। स्वराज्यमागतो नृपः दुर्वाससः ऋषेः शापात् शकुन्तलां व्यस्मरत् तिरश्चक्रे च। ततः वनम् आगत्य शकुन्तला वर्षत्रयं यावत् गर्भमधारयत्।

- **त्रिषु वर्षेषु पूर्णेषु दीप्तानलसमुद्युतिम्।**
  **रूपौदार्यगुणोपेतं दौष्यन्तिं जनमेजय॥ (74/2)**

वर्षत्रयस्यान्ते सा शकुन्तला रूपौदार्यगुणोपेतं शिशुं अजनयत्। शिशोः जन्मावसरे अन्तरिक्षात् पुष्पवृष्टिः अभवत्। अत्रावसरे देवाः दुन्दुभीन् नेदुः, अप्सरसः नृत्यं चक्रुः। देवाः गीतं जगुः। देवेन्द्रः इन्द्रोऽपि तत्रागत्य निजगाद–

- **गायन्त्यो मधुरं तत्र देवैः शक्रोऽभ्युवाच ह।**
  **शकुन्तले तव सुतश्चक्रवर्ती भविष्यति।**
  **बलं तेजश्च रूपञ्च न समं भुवि केनचित्। (74/3)**

इतोऽप्यधिकम् इन्द्रः भरतस्य धर्मौदार्यमपि वर्णयति यथा–

- **आहर्ता वाजिमेधस्य शतसंख्यस्य पौरवः।**
  **अनेकानि सहस्राणि राजसूयादिभिर्मखैः।**
  **स्वार्थं ब्राह्मणसात् कृत्वा दक्षिणाममितामदात्॥ (74/3)**

तेनावगम्यते यत् राजा भरतः जन्मना एव दिव्यः, तेजस्वी समृद्धिमान्, गुणवान् दान्तः स्यात्। गते काले दुष्यन्तः देवासुरसंग्रामे इन्द्रस्य सहायं कृत्वा पुनरागच्छति तदा पत्नीपुत्रयोः सह मिलापः भवति। दुर्वाससः शापस्य कथा कालिदास्य कृतौ प्राप्यते।

किन्तु वेदव्यासेन रचितमहाभारते निर्दिष्टं यत् राजा दुष्यन्तः राज्ये समागतायाः शकुन्तलायाः तिरस्कारं करोति तदैव अशरीरिणी वाणी उवाच–

- **अथान्तरिक्षाद् दुष्यन्तं वागुवाचाशरीरिणी।**
  **भरस्व पुत्रं दुश्यन्त मावमंस्थाः शकुन्तलाम्॥ (75/101)**

''भोः दुष्यन्त त्वं तस्याः अवमानं मा कुरु, पुत्रं भरस्वे'' ति। तेन सह इयम् आकाशवाणी पुत्रस्य नाम भरतः भवतु इत्यपि आज्ञां करोति।

- **शाकुन्तल महात्मानं दौष्यन्तिं भर पौरव।**
  **भर्तव्योऽयं त्वया यस्मादस्माकं वचनादपि**
  **तस्माद् भवत्वयं नाम्ना भरतो नाम ते सुतः॥ (75/114)**

तेन राजा दुष्यतः तां आकाशवाणी स्वीकृत्य सर्वदमनस्य द्वितीयं नाम भरतेति प्रस्थापयति।

- **भरतं नामतः कृत्वा यौवराज्येऽभ्यषेचयेत्। (74/126)**

दुष्यन्तः कुमारभरतं युवराज्यपदे अभिषिञ्चति। ततः राजाभरतः शास्ति भारतम्। राज्ञः भरतस्य धर्मचक्रं सर्वत्र प्रावर्तत। भरतस्य पार्श्वे सुदर्शनचक्रमिव चक्रम् आसीत्।

- **तस्य तत् प्रथितं चकं प्रावर्तत महात्मनः।**
  **भास्वरं दिव्यमजितं लोकसंनादनं महत्॥ (74/127)**

तेन स्वजीवनकाले यमुनासरस्वतीगङ्गानदीनां तटेषु क्रमेण शतं, त्रिशतं, चतुश्शतं अश्वमेधयज्ञाः कृताः आसन्। अयं अतिदानवीरः शूरवीरश्चासीत्। लब्धशासनेन तेन स्वराज्यं विस्तीर्य हस्तिनापुरं राजधानीरुपेण निर्मितम्। श्रीमद्भागवते निर्दिष्टं यत् योग्यपुत्रप्राप्त्यै तेन मरुत्सोमेति यज्ञः कृतः। येन मरुद्गणैः 'भरद्वाजः' इति नामा पुत्रः दत्तः। भारतदेशस्य आभूषणमिव भरतराजा सर्वेषां भारतीयानां हृदये सगौरवं स्थितोऽस्ति। येन अस्माकं राष्ट्रं तेजोमयं दिव्यञ्चाभवत् राष्ट्रमिदं भारतम् सदैव दिव्यम् आसीत्, दिव्यम् अस्ति, दिव्यम् च भविष्यति।

## शब्दार्थाः

नेदुः = शब्दमकरोत्

ननृतुः = अनृत्यन्

उवाच = अवदत्

शक्रः = इन्द्रः

सुतः = पुत्रः

दान्तः = जितेन्द्रियः

मावमंस्थाः = मा तिरस्कुरु

अन्तरिक्षात् = आकाशात्

भास्वरं = तेजोमयं

शास्ति = शासनं करोति

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) ''भारत'' आदिकालात् समृद्धि-संस्कार-शिक्षण-सभ्यतादिषु सदैव किम् भजते?

(क) निम्नतां (ख) हीनताम् (ग) अग्रेसरतां (घ) नम्रताम्

(2) कविवरकालिदासस्य कस्मिन् नाटके भरतविषये वर्णितमस्ति?

(क) अभिज्ञानशाकुन्तले (ख) मृच्छकटिके (ग) स्वप्नवासवदत्ते (घ) उत्तररामचरिते

(3) प्राचीनभारतस्य चक्रवर्तीसम्राट् कः आसीत्?

(क) रामः (ख) कृष्णः (ग) भरतः (घ) बलरामः

(4) भरतस्य बाल्यकालीननाम किम् आसीत्?

(क) नागदमनः (ख) सर्वदमनः (ग) अर्जुनः (घ) युधिष्ठिरः

(5) भरतस्य मातुः नाम किमासीत्?

(क) मेनका (ख) शकुन्तला (ग) सीता (घ) द्रौपदी

(6) सर्वदमनेन कति वर्षेष्वेव संपूर्णशास्त्राणि वेदाश्चाधीताः?

(क) दश (ख) पञ्चदश (ग) विंशति (घ) द्वादश

(7) पुत्रस्य नाम भरतः भवतु इति आज्ञां का करोति?

(क) ऋषिवाणी (ख) जनभाषा (ग) आकाशवाणी (घ) सत्यवाणी

(8) दुष्यन्तेन स्वराज्यं विस्तीर्य राजधानी कुत्र निर्मिता?

(क) मथुरा (ख) गोकुल (ग) हस्तिनापुर (घ) अयोध्या

(9) पुत्रप्राप्त्यै तेन कः यज्ञः कृतः?

(क) अश्वमेधः (ख) वाजपेयः (ग) लघुरूद्रः (घ) मरुत्सोमः

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) ''भारतम्'' इति नाम कस्य राज्ञः नाम्ना समलङ्कृतमस्ति?

(2) महाभारतम् केन रचितम्?

(3) भरतः कैः सह मल्लयुद्धमकरोत्?

(4) सः केषां दमनमकरोत्?

(5) शकुन्तला कस्य सुता आसीत्?

(6) भरतस्य जन्मसमये कस्य वृष्टिः भवति?

(7) भरतस्य धर्मौदार्यं कः वर्णयति?

(8) कालिदासः कः आसीत्?

(9) दुष्यन्तः भरतं कस्मिन् पदे अभ्यषिञ्चत्।

(10) भरतस्य समीपे किमासीत्?

(11) भरतेन कस्याः तटे यज्ञाः कृताः?

**3. पञ्चवाक्यैः प्रश्नाम् उत्तराणि लिखत।**

(1) देशोऽयं कीदृशः?

(2) ऋषिभिः सर्वदमनं नाम कथं स्थापितम्?

(3) भरतजन्मसमये किमभवत्?

(4) कालिदासेन अभिज्ञानशाकुन्तले किम् प्रतिपादितमस्ति?

(5) तेन कीदृशाः यज्ञाः कृताः?

**4. विभक्तिपरिचयं लिखत।**

(1) मखैः (2) पुत्रयोः (3) पर्वणि (4) दुर्वाससः (5) ऋषयः

**5. निम्नक्रियापदानां परिचयो देयः।**

(1) अजयत् (2) जगाद (3) दधार (4) प्राप्यते (5) बबन्ध

**छात्रप्रवृत्तिः**

छात्राः अभिज्ञानशाकुन्तलस्य सारांशं पठेयुः।

**अध्यापकप्रवृत्तिः**

अध्यापकाः कालिदासस्य अन्यकृतीनां परिचयं कारयेयुः।

●

# 18

# ग्रन्थस्य मनोदशा

**लेखकपरिचयः**

'ग्रन्थो भाषते' एतस्य ग्रन्थस्य रचयिता डॉ. अमृतलाल गौरीशङ्कर भोगायता इत्याख्यो विद्वानस्ति। तेन पाठशालीय परम्परया विश्वविद्यालयीयपरम्परया च साहित्य व्याकरण पुराणादिविषयेषु स्वीयमध्ययनं समाप्तम्। अनेन साम्प्रतं प्रधानाचार्यरूपेण कार्यं क्रियते। एकलव्य-श्रेष्ठशिक्षक-श्रेष्ठप्रधानाचार्य-श्रेष्ठकवि-श्रेष्ठलेखकादयः राज्यस्तरीयाः राष्ट्रियाः पुरस्काराः अनेन प्राप्ताः। अन्ताराष्ट्रियविद्वत्सम्मेलनेऽपि अनेन 'थाईलेण्ड' इत्थाख्ये देशे भारतस्य प्रतिष्ठित-कविरुपेणोपस्थितिरदीयत 'अभिनवशृङ्गारशतकम्' 'अभिनववैराग्यशतकम्' 'अभिनवनीतिशतकम्' 'अमृतकाव्यामृतम्' 'अन्योक्तिकाव्यसंग्रहः' 'ब्रह्मर्षी शरज्यते' 'भू धातोः उपवैविध्यम्' 'लेखसङ्ग्रहः' 'लघुनिबन्धसङ्ग्रहः' 'लघुनाटकानि' 'आधुनिकगीतानि' 'प्रशस्तिकाव्यानि' 'स्तोत्रकाव्यानि' 'शिशुपालवधस्य वल्लभदेवमल्लिनाथयोः टीकयोः तुलना' इत्येतत्तस्य ग्रन्थलेखनकर्म प्रसिद्धम्।

प्रस्तुतेऽस्मिन् पाठे ग्रन्थो यद्यपि न भाषते तथापि रचयिता तं मुखरीकरोति। स ग्रन्थः स्वीयं जीवनं स्वयमेव प्रस्तौति अनया कल्पनया कवीनां पठन-शीलानां क्रीडाशीलानां विद्यार्थिनां स्वभावो वर्णितः। अत्र नैके उपमांशाः छात्राणां विनोदेन सह पुराणा-दिशास्त्रगतकथाप्रसङ्गज्ञानं स्यादिति विचार्य प्रस्तुताः। एतत् सर्वं वयं ग्रन्थमुखेनैव श्रोष्यामः यतो हि ग्रन्थो भाषते।

---

उत्तमा जना अपि स्वयमेवात्मानं प्रस्तुवन्ति 'महाजनो येन गतः स पन्थाः' नियमानुसारमहमपि स्वात्मकथनेन आत्मानं प्रस्तौमि यदीदं मे धाष्ट्र्यमिति चेदहं क्षन्तव्यः वृक्षोत्तंसवंशागभूतोऽहं रिकर्गजपुञ्च आसम् ततश्च यथा कश्चिद्बालो जन्मना निर्लिप्तो भवति परं ततः स समसामाजिकनियमसूत्रग्रथितो भवति तथैव अहं ग्रथितः अभवम्। बालकस्य रिक्तं मानसं सामाजिकविचारैः परिपूर्णं भवति तथैव मयि अपि विद्वद्भिः नैके विचाराः स्थापिताः। समृद्धविचारसमृद्धि समन्वितोऽहं विक्रयक्रमेण पुस्तकालयमागत।

अत्र (पुस्तकालये) यादृशा नैके विचारवन्तोऽपि मुनय इव मूकीभावं भजन्तो ग्रन्थाः कपाटान्तः पूरिताः तप इव कुर्वन्ति। अत्रापि मानवा इव तामसराजससात्विकाः ग्रन्था इन्द्रधनुरिव स्ववर्णच्छटां प्रसारयन्ति। यद्यपि वयं मूकास्तथापि वाचकानां प्रश्नानां सम्यक् समाधानं कुर्मः, अस्मासु ग्रन्थयः सन्ति परं वाचकानां ग्रन्थिभेदे वयं दक्षाः स्मः। अहमत्र विद्यालयपुस्तकालये रविवासरं प्रतीक्ष्यमाणो बाल इव कुत्रचित् कपाटात् बहिर्गन्तुमिच्छामकरवम्, तत्क्षणमेव कश्चिद् बालो मां ग्रन्थालयात् अभिन्नमित्रमिव ग्रन्थालयादनुज्ञां गृहीत्वानयत्। गृहं नीत्वा देवराजमिन्द्रमिव मामुच्चासने संस्थाप्य गन्धाक्षत-पुष्पैः सरस्वतीमन्त्रैश्चापूजयत्। नूतनानि वस्त्राणीव मां सुन्दरमावरणं परिधापयति स्म। स्नेहिजन इव न मां नयनयोः दूरेऽस्थापयत्। यथा भगवन्तं रामं पवनपुत्रो हनुमान् स्कन्धे संस्थाप्य याति तथैव स मां विद्यालयमनयत्। केनचित् मित्रेण याचितोऽहं चेत् स महता कष्टेन मित्रपुत्रेण कर्णेन प्रदीयमानं कवच कुण्डलदानमिव मामयच्छत्। पुनश्च मां प्राप्य 'जननान्तरसौहृदानि' इव प्रसन्नतामगच्छत्। तस्य सर्वा अपि प्रवृतयो मामाश्रित्यैवाभवन्। रात्रौ शयनावसरेऽपि मां मुखे वक्षसि वा संस्थाप्य शयनमकरोत्। 'न हि कृतमुपकारं साधवो विस्मरन्ति' एवं विचिन्त्य प्रत्युपकारमिव कुर्वन्नयं जागरणं कृत्वा मशकदंशेभ्यः तस्य रक्षणमकरवम्। संयोगा विप्रयोगान्ता इति नियमानुसारं समाप्ते काले स मां पुनः ग्रन्थालयम् अगमयत्। 'नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण' एवं रथचक्रस्य इव मम दशायां पुनः परिवर्तनमागच्छत्।

कश्चिद् विद्यापराङ्गमुखः छात्रो मां गृहीत्वा अनयत्। सोऽतीव खेलप्रियोऽवर्तत। विद्यालयादागत्य कन्दुकमिव मामक्षिपत्। गमनावसरे थेलिकां मेलापकचक्रमिव (चगडोल) मामभ्रामयत्। विविधवर्गं विदूषकमुखमिव मामवर्णयत्। कार्यकाले समुत्पन्ने कुम्भमेलावियुक्तं सहोदरमिव ममान्वेषमकरोत्। केनचित् मित्रेण याचितोऽहं वैराग्ययुतेन मुनिना प्रदत्तं धनमिव निरपेक्षभावेन तत्क्षणमेव मामयच्छत्। परन्तु परीक्षाकाले सुप्तेषु अपि सर्वेषु लङ्कायां विभीषणस्य रामनाम इव मां सततं मोक्षार्थम्, अश्नीतपिबत स्थले, (रेस्टोरां) मित्रगृहे, चलचित्रगृहे, उद्याने, आपणे सर्वत्र श्रवणकुमार इव यात्रां कारयित्वा गृहमानयत्। मया चिन्तितं यत् प्रथमबालकेन श्रेयः द्वितीयेन प्रेयः एवमुभयं फलं मया भुक्तम्। ततश्च विक्रमस्कन्धारूढवेताल इवाहं पुनः ग्रन्थालयं प्राप्तः॥

## शब्दार्थाः

| | |
|---|---|
| क्षन्तव्यः = क्षमायोग्यः | पराङ्मुखः = विमुखः |
| यादृशः = मम सदृशः | वाचकानां = पाठकानां |
| दक्षाः = निपुणा | अनुज्ञां = अनुमतिं |
| वक्षसि = उरसि | |

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) के स्वयमेवात्मानं प्रस्तुवन्ति?
(क) मध्यमाः (ख) उत्तमाः (ग) अधमाः (घ) अधमाधमाः

(2) पुस्तके कैः नैके विचाराः स्थापिताः?
(क) छात्रैः (ख) सज्जनैः (ग) विद्वद्भिः (घ) अध्यापकैः

(3) ग्रन्थः पुस्तकालयं कथम् आगतः?
(क) विक्रयक्रयक्रमेण (ख) यातायातक्रमेण
(ग) गतानुगतिकक्रमेण (घ) आदानप्रदानक्रमेण

(4) ग्रन्थाः (कुत्र) कस्मिन् पूरिताः सन्ति?
(क) प्रकोष्ठे (ख) कपाटे (ग) आसन्दे (घ) याने

(5) ग्रन्थः पुस्तकालये कं वासरं प्रतीक्ष्यमाणः आसीत्?
(क) चन्द्रवासरं (ख) रविवासरं (ग) भौमवासरं (घ) सौम्यवासरं

(6) पुस्तकालयान् ग्रन्थं कः अनयत्?
(क) बालः (ख) वृद्धः (ग) कुमारः (घ) बालिष्णः

(7) सः कथमिव ग्रन्थम् अयच्छत्?
(क) धनदानमिव (ख) पुण्यदानमिव
(ग) कवचकुण्डलदानमिव (घ) अन्नदानमिव

(8) छात्रः शयनावसरे पुस्तकं कुत्र संस्थाप्य शयनम् अकरोत्?
(क) मस्तके (ख) हस्ते (ग) वक्षसि (घ) उदरे

(9) कीदृशः छात्रः ग्रन्थं गृहीत्वा अनयत्?

(क) विद्याभिमुखः (ख) विद्यापराङ्गमुखः (ग) विद्यातुरः (घ) विद्यासम्पन्नः

(10) ग्रन्थः प्रथमबालकमाध्यमेन कीदृक् फलं भुक्तवान्?

(क) श्रेयस्करं (ख) प्रेयः (ग) दुर्ज्ञेयः (घ) प्रमेयः

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) ग्रन्थः कथम् आत्मानं प्रस्तौति?

(2) ग्रन्थः कथं ग्रथितः अभवत्?

(3) ग्रन्थाः कथमिव स्ववर्णच्छटां प्रसारयन्ति?

(4) बालः ग्रन्थस्य कथं पूजां अकरोत्?

(5) साधवः किं न विस्मरन्ति?

(6) साधवः किं न विस्मरन्ति?

(7) बालः परीक्षान्तरं कस्येव यात्रां कारयित्वा गृहमानयत्।

**3. पञ्चवाक्यैः प्रश्नाम् उत्तराणि लिखत।**

(1) बालः ग्रन्थं कथम् अनयत् कथं च अपूजयत् इति वर्णयत।

(2) बालस्य ग्रन्थेन समं मैत्रीं वर्णयत।

(3) ग्रन्थेन विद्या पराङ्गमुखात् छात्रात् प्राप्तानुभवविषये लिखत।

**4. प्रदत्तसूक्त्योः विवेचनं कुरत।**

(1) न हि कृतमुपकारं साधवो विस्मरन्ति।

(2) संयोगा विप्रयोगान्ता।

**5. सन्धिविच्छेदं कुरुत।**

(1) नैके (2) कपाटान्त (3) इन्द्रधनुरिव (4) दूरेऽस्थापयत् (5) पुनश्च

**छात्रप्रवृत्तिः**

छात्राः ग्रन्थालयं गत्वा ग्रन्थाध्ययनमाध्यमेन ग्रन्थान् चरितार्थान् कुर्युः।

**अध्यापकप्रवृत्तिः**

अध्यापकाः अपि नानाविधविषयग्रन्थान् पठेयुः पाठ्येयुः।

# 19

# शरीरमाद्यं खलु धर्मसाधनम्

**प्रस्तावना**

'धर्मं भजस्व सततम्' इति महर्षेः वेदव्यासस्य आज्ञानुसारं मानवानां कल्याणसाधकं धर्मानुसरणम् एव परमं चरमं च कर्तव्यम्। यस्य मानवस्य जीवने कर्मणि वा धर्मो न भवति सः मृत एव कथितः सांख्याचार्येण कपिलेन। मानव- पश्वोः प्रायः सर्वाअपि प्रवृत्तयः समानाः तथापि धर्मतत्त्वं मानवानां विशेषगुणोऽस्ति। येन मानवा मोक्षं साधयितुं शक्नुवन्ति। यथोक्त भागवते धर्मप्रयोजनम् 'धर्मस्य ह्यपवर्गस्य'। यथा साध्यभूतस्य मोक्षस्य प्राप्तिः साधनभूतेन धर्मेणेव भवति तथैव शरीरमाद्यं खलु धर्मसाधनम् इत्यस्मिन् साधनभूतेन शरीरेण साध्यभूतस्य धर्मस्य प्राप्तिर्भवति यतो हि साधनं विना साध्यप्राप्तिर्न भवति। अतः मानवशरीरस्य किं महत्वम्? इत्यनेन पाठेन वयं ज्ञास्यामः॥

---

धर्माचरणे स्वास्थ्यमहत्त्वम् - जगत्यस्मिन् मनुष्यदेहमवाप्य देहभृतां चतुर्णां मानवानां सिद्धिरेव लक्ष्यं भवति। धर्मार्थकाममोक्षाः इति पुरुषार्थचतुष्टयं मन्यते। तत्र धर्माचरणाय कलेवरस्य निरोगिता अनिवार्या यदि शरीरं रोगग्रस्तं स्यात् मानवो रुग्णः स्यात् चेत् सः किमपि कर्तुं समर्थो न भवति। स्वस्थो मानव एव धार्मिककार्याणि सम्पादयितुं सक्षमो भवति। मानवस्य शरीरं यदि रोगरहितं पुष्टं स्यात् चेत् तस्य सर्वाण्यपि मनसा इप्सितानि कार्याणि निश्चित-समयानुसारं भवन्ति। रोगग्रस्तेन शरीरेण नियतसमये कार्यं न भवति। यथा,

पादौ नृणां तौ द्रुमजन्मभाजौ
क्षेत्राणि नानुव्रजतो हरेर्यो॥

अर्थात् यो जनः पादाभ्यां हरिक्षेत्रगमनं न करोति तस्य पादौ पादौ न अपि तु वृक्षौ कथ्येते इति कृष्णद्वैपायनव्यासस्य वचनानुसारं हरिक्षेत्रगमनात्मके धर्मकर्मणि पङ्गुजनेन अथवा यस्य पादे रोगः स्यात् तादृशेण जनेन यत्कार्यं पञ्चदशनिमेषात्मके समये क्रियते तदेव कार्यं स्वस्थेन जनेन पञ्चनिमेषात्मके काले कियते। इत्थं रोगग्रस्तं शरीरं मानवस्य अतिदुर्लभं समयं व्यर्थं यापयति। अन्ते पादपीडायुक्तो जनः पदयात्रात्मकात् धर्मात् विमुखो भवति। अतः षट्सु सुखेषु स्वस्थशरीरम् एकं सुखम् अस्ति-

**अर्थागमो नित्यमरोगिता च,**
**प्रिया च भार्या प्रियावादिनी च।**
**वश्यश्च पुत्रोऽर्थकरी च विद्या,**
**षड् जीवलोकस्य सुखानि राजन्॥**

तथा च यज्ञादिषु धर्मकर्मसु यदि रुग्णता स्यात् चेत् मानवस्य मनः धर्मकर्मणि संलग्नं न भवति तेन श्रद्धायाः अपि ह्रासो भवति यतो हि श्रद्धया एव धर्मकर्माणि सफलानि भवन्ति अश्रद्धया कृते सर्वं निष्फलं भवति असत् वा भवति उक्तं गीतायां -

**अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।**
**असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥**

अत एव निश्चप्रचं शारीरिकस्वास्थ्यस्योपरि ध्यानं देयम्। स्वस्थे चित्ते एव नैरुज्यं स्वास्थ्यं च। पुरुषार्थचतुष्टयावाप्तये श्रमः अपेक्षते, श्रमाय स्वास्थ्यम्, स्वास्थ्याय निरोगिता निरोगितायै चित्तप्रसादनम्, चित्तप्रसादनाय सद्वृत्तम् (सदाचारः) अपेक्षते। इत्थं वृत्तं शीलं वा स्वास्थ्यस्य परमं मूलम्। अत एव व्यासमुनिना उक्तम् -

**वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।**
**अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः॥**
**आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः।**
**आचाराद् धनमक्षय्यमाचारो हन्त्यलक्षणम्॥**

मानवैः धर्माचरणाय स्वास्थ्यरक्षणं कर्तव्यमेव तत्र यजुर्वेदभाष्ये श्रीदयादनन्देन कथितम् - ये प्रतिदिनमग्निहोत्रादिकं यज्ञं युक्ताहारविहारं च कुर्वन्ति तेऽरोगा भूत्वा दीर्घायुषो भवन्ति। इत्यत्र शारीरिक - स्वास्थ्यस्य मार्गो दर्शितः शारीरिकस्वास्थ्येन समं मानसिकं स्वास्थ्यमपि सुयोग्यम् अपेक्षते। यतो हि मानवस्य मनः यदि सांसारिकपदार्थेषु अत्यासक्तं स्यात् चेत् तेनापि मानवः धार्मिककर्मणो विमुखो भवति। अतः मानसिकस्वास्थ्यरक्षणाय उक्तं कपिलाचार्येण यथा–

**प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान्।**
**प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान्गुणान्॥**

एवञ्च आरोग्यसाधनविवेचनात्मकः षट्कार्ययुक्तः श्लोकः प्राप्यते। एतस्मिन् पद्ये रोगनिदानरुपेण षट्कारणानि प्रदत्तानि सन्ति।

**अत्यम्बुपानाद् विषमाशनाच्च, दिवा शयाद् जागरणाच्च रात्रौ।**
**संरोधनाद् मूत्रपुरीषयोश्च, षड्भिः प्रकारैः प्रभवन्ति रोगाः॥**

वस्तुतः आरोग्यमेव स्वास्थ्यमस्ति स्वास्थ्यमेव च सर्वोत्तमं सुखम्। स्वस्थः निर्धनोऽपि परिश्रमेण सुखमयजीवनं जीवितुं-धर्मम् आचरितुं च समर्थोऽपि परं रुग्णः धनवान् अपि दुःखी दरीदृश्यते। धनेन सः स्वस्वास्थ्यं क्रेतुं न शक्नोति। अतः शारीरिकोन्नतिः मानवस्य सर्वप्रथमं कर्तव्यमस्ति। स्वास्थ्यलाभाय बहवो व्यायामाः सन्ति, यथा - क्रीडनम्, भ्रमणम्, धावनम्, तरणम् तथा च पादकन्दुकक्रीडा (फुटबोल), यष्टिक्रीडा (हॉकी), करकन्दुकक्रीडा (वॉलिबोल) इत्यादिन्यः क्रीडाप्रवृत्तयः रुचिकराः स्वास्थ्यवर्धिन्यश्च सन्ति। व्यायामेन शरीरपुष्टिश्चेतः प्रसादनञ्च उक्तं यथा–

स्वस्थे चित्ते बुद्धयः प्रस्फुरन्ति। स्वस्थे चिते ज्ञानोदयः स्फूर्तिसमन्वयो भवति। अतः इदं स्पष्टं यत् शरीरमेव सर्वेषां कार्याणां सिद्धिकरं वर्तते।

## शब्दार्थाः

देहभृतां = शरीरधारिणां

इप्सितकार्याणि = इष्टकार्याणि

असत् = मिथ्या

कलेवरस्य = शरीरस्य

ह्रासो = नाशो

प्रसादः = प्रसन्नता

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्य विकल्पं चित्वा लिखत।**

(1) मनुष्यदेहमवाप्य देहभृतां किं लक्ष्यं भवति?

(क) कल्याणसिद्धिः (ख) सुखसिद्धिः (ग) पुरुषार्थसिद्धिः (घ) ज्ञानसिद्धिः

(2) कीदृशो मानवः धार्मिककार्याणि सम्पादयितुं सक्षमो भवति?

(क) रुग्णः (ख) स्वस्थः (ग) जटिलः (घ) चतुरः

(3) कीदृशं शरीरं मानवस्य समयं व्यर्थं यापयति?

(क) रोगग्रस्तं (ख) कालग्रस्तं (ग) ज्ञानग्रस्तं (घ) योगग्रस्तं

(4) धर्मकर्माणि कया सफलानि भवन्ति?

(क) विद्यया (ख) दयया (ग) श्रद्धया (घ) तृष्णया

(5) स्वास्थ्यं किम् अपेक्षते?

(क) धनम् (ख) नीरोगित्वम् (ग) सुखम् (घ) ज्ञानम्

(6) ये प्रतिदिनमग्निहोत्रादिकं यज्ञं कुर्वन्ति इति कस्य वचनम्?

(क) विवेकानन्दस्य (ख) दयानन्दस्य (ग) ज्ञानानन्दस्य (घ) प्रेमानन्दस्य

(7) रोगनिदानात्मके पद्ये कति कारणानि सन्ति?

(क) अष्ट (ख) षट् (ग) द्वादश (घ) पञ्च

(8) जीवलोकस्य षद्सुखेषु किम् नास्ति?

(क) अर्थागमः (ख) प्रियाभार्या (ग) अर्थकरीविद्या (घ) भवनम्

(9) सर्वोत्तमं सुखं किम् अस्ति?

(क) धनम् (ख) बलम् (ग) स्वास्थ्यम् (घ) ज्ञानम्

(10) पापनिवारणं केन भवति?

(क) प्राणायामैः (ख) धारणाभिः (ग) प्रत्याहारेण (घ) ध्यानेन

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) मानवस्य कार्यं नियतसमये कदा न भवति?

(2) कस्य जनस्य पादौ वृक्षसमानौ कथितौ?

(3) धार्मिककर्मणि श्रद्धायाः ह्रासो कथं भवति?

(4) मानवैः धर्माचरणाय कस्य रक्षणं कर्तव्यम्?

(5) संसर्गात्मकदोषस्य दहनं केन भवति?

(6) मानवस्य मनः कदा धर्मकर्मणि संलग्नं न भवति?

(7) कति प्रकारैः रोगाः प्रभवन्ति?

**3. पञ्चवाक्यैः प्रश्नानाम् उत्तराणि लिखत।**

(1) कार्यकरणे शरीरमहत्वं लिखत।

(2) जीवलोकस्य षट्सुखानि वर्णयत।

(3) धार्मिककर्मणि श्रद्धायाः महत्वं लिखत।

(4) स्वास्थ्यरक्षणाय योगमहत्त्वं लिखत।

**4. श्लोकपूर्तिं कुरुत।**

(1) अर्थागमो ............ सुखानि राजन्॥

(2) अश्रद्धया हुतं ............ प्रेत्य नो इह॥

(3) अत्यम्बुपानाद् ............ प्रभवन्ति रोगाः॥

**5. विभक्तिपरिचयं लिखत।**

(1) धर्मार्थकाममोक्षाः (2) देहभृतां (3) मानवस्य (4) श्रद्धया (5) धारणाभिः (6) चित्ते

**छात्रप्रवृत्तिः**

योगासनानि ज्ञात्वा जीवने आचरत।

**अध्यापकप्रवृत्तिः**

छात्रजीवनं व्यसनरहितं, योगयुक्तं भवेत् तदर्थं प्रयासः करणीयः।

●

# 20

# पर्यावरणम्

**प्रस्तावना**

'पर्यावृतिः पर्यावरणम्।' परितः आवृणोति-आच्छादयति तत् पर्यावरणम्। ये मानवं परितः आच्छादयन्ति, मानव-जीवनं च प्रभावयन्ति ते पर्यावरण शब्देन गृह्यन्ते। जीवमात्रस्य कृते पर्यावरणं तु परमावश्यकमस्ति। तनैव-सर्वविधः क्रियाकलापः सहजतया सफलः भवितुमर्हति किन्तु मानवेन विश्वस्य औद्योगिककरणं कृतमस्ति तेन कारणेन पर्यावरणस्य समतुलायां विक्षेपो जातः। प्रदूषणञ्च समुद्भूतम्। मानवाः अन्यजीवजन्तवः वनस्पतयः भूमिः समस्तभौमिक-रासायणिक-घटकाः पर्यावरणे समायान्ति।



पर्यावरणं सर्वेषां जीवानां पोषकं रक्षकं चास्ति। पर्यावरणतः प्राणिनः वनस्पतिः च स्वकीयास्तित्वरक्षणाय आवश्यकानि तत्त्वानि प्राप्नुवन्ति। प्राणिनः वनस्पतयः जन्तवः मानवाः ईश्वरस्य जैविकसृष्टेरङ्गानि सन्ति। तत्र मानवः पर्यावरणस्य मुख्याङ्गं वर्तते। परन्तु मानवैः स्वकीयस्वार्थवृत्यर्थं पर्यावरणस्य संपत्तीनामुपयोगः अधिकः क्रियते। अस्मिन् विषये मानवेन अन्येषां जीवानां स्थितिविषये कदापि चिन्ता न कृता। विशालनगराणि, यन्त्रालयानि, संहारकशस्त्राणि आकाशग्रहाः इत्यादीनां प्राप्त्यर्थं मानवेन पर्यावरणस्य समतुलना खण्डिता। दैनन्दिने जीवने औद्योगिकवाहन-व्यवहारस्याधिकोपयोगः जायते। तेन वायुप्रदूषणं सञ्जातम्। सजीवानां जीवनोपयोगितत्त्वानि दूषितानि च भवन्ति। सर्वेषां सजीवानां कृते वायुजलभूमितत्त्वानि आवश्यकानि सन्ति। एतानि पर्यावरणस्य तत्त्वानि सन्ति। सजीवसृष्टेरस्तित्वरक्षणाय पर्यावरणं योग्यं भवति।

**पर्यावरण-संघटकतत्त्वानि** - अथर्ववेदे निर्दिश्यते यत् पर्यावरण-संघटक-तत्त्वेषु तत्त्वत्रयं प्रमुखं वर्तते।

(1) आपः (जलम्) (2) वातः (वायुः) (3) औषधयः (वनस्पतयः) एतानि पर्यावरणं निर्माणयन्ति।

**पर्यावरण-प्रदूषणम्** - जनाः औद्योगिक, यान्त्रिकसाधनैः आवश्यकवस्तूनां संसाधनानाञ्च उत्पादनाय यन्त्रालयानां विकासं कुर्वन्ति, परन्तु तेन निकृष्टपदार्थानां प्रदूषितगैसधूम्रादिनिर्गमनेन सम्पूर्णं पर्यावरणं विकृतं हानिकारकं भवति। स्वहिताय अस्माभिः स्वपर्यावरणस्य शुद्धिं प्रति जागरूकैः भवितव्यम्। अस्य पर्यावरणस्य शुद्धिकरणाय केचन उपायाः कर्तव्याः।

**प्रदूषणस्य प्रकाराः तन्निवारणोपायाश्च :**

(1) वायु-प्रदूषणम्

(2) जल-प्रदूषणम्

(3) भूमि-प्रदूषणम्

(4) ध्वनि-प्रदूषणम्

(5) रेडियो-धर्मि-प्रदूषणम्

**(1) वायु-प्रदूषणम् :** वायु-मण्डले विविध-प्रकारकाः वायवः विशेषानुपातपूर्वकं सन्ति। ते प्राणिभ्यः जीवने शक्तिं प्रददति। यदि औद्योगिकीकरणेन अन्यैर्वा साधनैः तत् प्राकृतिकम् अनुपातं प्रदूषयन्ति, तर्हि वायुप्रदूषणं संजायते।

अधिक-धूम-त्याग-पराणां वाहनानां प्रयोगे न्यूनीकरणम्। वृक्षाणां छेदनस्यावैधरूपेण निरोधः स्यात्। वृक्षारोपण-कार्ये च बाहुल्यं स्यात्। सर्वेऽपि यन्त्रालयाः नगराद् दूरे स्थापिता भवेयुः। परमाणुविस्फोटे प्रतिबन्धः स्यात् वायु-प्रदूषणप्रभावं प्रति जनता जागरुका भवेत्।

**(2) जल-प्रदूषणम् :** सर्वेषां जीवानां कृते जलमत्यावश्यकं वर्तते। उक्तञ्च 'जलमेव जीवनम्'। गृहकार्ये, कृषिकार्ये, औद्योगिककार्ये सर्वत्र च जलस्य उपयोगः जायते। मानवप्राणिनां मलमूत्रम् औद्योगिकरासायणिक-पदार्थाः अन्ये च दूषिताः पदार्थाः नदीषु क्षिप्यन्ते मानवपशुपक्षिभिः त्यज्यन्ते च। तेन तज्जलं प्रदूषितम् भवति।

जल-प्रदूषण-निरोधार्थम् एते उपाया आश्रयणीयाः - नगरादीनाम् अवशिष्ट-जलप्रवाहार्थप्रणालीव्यवस्था स्यात्। तद् नगराद दूरम् अवशिष्टं प्रवाहयेत्। औद्योगिकक्षेत्रात् नदीषु जायमानस्य दूषितजलस्य संशोधनं तत्पश्यात्-संचनकार्ये उपयोगः। जलस्रोतांसि सर्वकारेण अधिगृहीतानि संरक्षितानि स्युः। तेषां कृते जनजागरणमपेक्षते।

**(3) भूमि-प्रदूषणम् :** मनुष्याणां विविधदुष्प्रवृत्तिभिः भूमेः उर्वराशक्तिः न्यूना जायते। कृषिकार्ये पाकवृद्ध्यर्थं कीटकविनाशकरासायणिकौषधिपदार्थानां दुष्प्रभावेणापि भूमिप्रदूषणं उत्पद्यते। नगरौद्यौगीकरणे सति कृषिकार्यार्थं भूमेःप्रमाणं न्यूनं जातम्।

भूमिः अस्माकं निवासाय जीवस्य आधारभूता च वर्तते। अस्याः प्रदूषेणन अस्माकं जीवनं सुरक्षितं न स्यात्। कीटनाशक-रसायणानां प्रयोगो नियन्त्रितः स्यात्। वृक्षादीनां छेदने प्रतिबन्धः स्यात्। शोधितजलेनैव कृषौ सेचन-व्यवस्था स्यात्। सर्वेषां प्रदूषणानां निवारणं विशेषतया प्राचीनकालात् - ''माता भूमिः पुत्रोऽहं पृथिव्याः'' इति मूलमातृभावनायाः प्रचारप्रसारकारणात् भावात्मकतायाः प्रचारेण अनुपालनेन च मानवसर्जितप्रदूषणानामवरोधः कर्तुं शक्यते।

**(4) ध्वनिप्रदूषणम् :** अधुना यान्त्रिकयुगेऽस्मिन् भौतिकसाधनैः सह ध्वनिप्रदूषणस्यापि पुरस्कारः अस्माभिः प्राप्तः। यन्त्रयान-आकाशवाणी-बृहद्ध्वनिकर्तृभिः ध्वनि-प्रसारकयन्त्रैः ध्वनिप्रदूषणं जायते।

भौतिकसाधनानां विवेकबुद्धिपूर्वकः उपयोगः प्रदर्शनबुद्ध्या न अपितु सर्वजनहिताय सर्वजनसुखाय ध्वनिरहितम् नूतनं यानम् उपयोगि भवेत्। लाउडस्पीकरध्वनि विस्तारकयत्राणि सार्वजनिकपूजोत्सवेषु मधुरेण ध्वनिनाश्रावकं स्यात्। आत्मिकभावनया परेषां दुःखं न भवेत् तथा बुद्ध्या भवेत्। सर्वकारेण नियमाः स्युरेव शिक्षणसंस्थानां माध्यमेन जनतासु जागरणम् आवश्यकम्।

**(5) रेडियोधर्मिप्रदूषणम् :** रेडियम्-युरेनियम् खनिज-आल्फा-वीटा-गामादिकिरणानां परमाणु विस्फोटकतत्त्वाद्जायते प्रदूषणमिदम्। तेन शरीरे-यकृन्मूत्रपिण्डजठरादिषु शरीरावयवेषु रोगप्रभावः भवति। ततः चर्मरोगः रक्तविकारः (केन्सर्) पाण्डुरोगादयः जायन्ते। जीवनकोषेभ्यः रोगप्रतिकारकशक्तिः क्षीणा च भवति।

परमाणुपरीक्षणे प्रतिबन्धः करणीयः। पदार्थे वा यत्र मानवजनितं प्रदूषणं तत्र परीक्षणार्थं प्रतिक्रियायाः पूर्णतारूपेण अनुमानं कृत्वा ध्यानं दातव्यम्। प्रदूषणपदार्थानां यन्त्रात् स्फुरणं न स्यात् तदवधेयम्।

एवञ्च खाद्यौषधिदुग्धव्यञ्जनफलादिषु, वस्तुषु प्रदूषणं दृश्यते। पर्यावरणे विविधक्षतिकारणप्रदूषणानामवरोधनार्थं मानवजागृतिः कर्तव्येति। पर्यावरणसुरक्षाहेतवे मानवजनसंख्यानियमनं महत्त्वपूर्णमस्ति। मानवानां सुखहर्तृणां रोगाणां जनकं-प्रदूषणप्रसारावरोधनमेवास्माकं धर्मः विद्यते।

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यं विकल्पं चित्वा लिखत।**

(1) प्रदूषणप्रकारेषु किं प्रकारकं प्रदूषणम् अधः स्थितेषु नास्ति ?

(क) वायुप्रदूषणम्　(ख) ध्वनिप्रदूषणम्　(ग) भूमिप्रदूषणम्　(घ) शब्दप्रदूषणम्

(2) आपः अर्थात् किं भवति ?

(क) जलम्　(ख) वायुः　(ग) भूमिः　(घ) ध्वनिः

(3) वाहनैः किं प्रदूषणं जायते ?

(क) भूमिप्रदूषणम्　(ख) वायुप्रदूषणम्

(ग) जलप्रदूषणम्　(घ) रेडियो-धर्मि-प्रदूषणम्

(4) रासायणिकपदार्थैः किं प्रदूषणमुद्भवति ?

(क) ध्वनिप्रदूषणम्　(ख) जलप्रदूषणम्

(ग) भूमिप्रदूषणम्　(घ) रेडियो-धर्मि-प्रदूषणम्

(5) भूमिप्रदूषणस्य कारणं किम् ?

(क) नागरिकीकरणम्　(ख) वाहनानामुपयोगः

(ग) लाउडस्पीकरमाध्यमम्　(घ) एकमपि न

(6) लाउडस्पीकरमाध्यमेन किं प्रदूषणं भवति ?

(क) वायुप्रदूषणम्　(ख) ध्वनिप्रदूषणम्　(ग) जलप्रदूषणम्　(घ) भूमिप्रदूषणम्

(7) माता भूमिः पुत्रोऽहं.....।

(क) वायोः　(ख) ध्वनेः　(ग) पृथिव्याः　(घ) जलस्य

(8) अस्मिन् पाठे कति प्रदूषणानि निर्दिष्टानि ?

(क) पञ्च　(ख) षट्　(ग) चत्वारि　(घ) त्रीणि

(9) परमाणुविस्फोटेन किं प्रदूषणं जायते ?

(क) जलप्रदूषणम्　(ख) वायुप्रदूषणम्　(ग) भूमिप्रदूषणम्　(घ) रेडियो-धर्मिप्रदूषणम्

(10) भूमिप्रदूषणनिवारणस्य कः उपायः ?

(क) वाहनानां न्यूनीकरणम्　(ख) लाउडस्पीकरनियन्त्रणम्

(ग) वृक्षच्छेदननिरोधः　(घ) एकमपि न

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) पर्यावरणम् अर्थात् किम् ?

(2) पर्यावरणसंघटकतत्त्वानि कानि ?

(3) प्रदूषणम् अर्थात् किम् ?

(4) प्रदूषणस्य कति प्रकाराः ?

(5) वायुप्रदूषणस्य किं कारणम् ?

(6) ध्वनिप्रदूषणं केन कारणेन जायते ?

(7) जलप्रदूषणस्य एकं कारणं ददातु।

**3. पञ्चवाक्यैः प्रश्नानाम् उत्तराणि लिखत।**

(1) प्रदूषणस्य प्रकारान् विवर्णयत।

(2) भूमिप्रदूषणं सविस्तरं लिखत।

(3) रेडियो-धर्मि-प्रदूषणं प्रतिपादयत।

**4. टिप्पणी लेख्या।**

(1) जलप्रदूषणम्

(2) वायुप्रदूषणम्

(3) ध्वनिप्रदूषणम्

**छात्रप्रवृत्तिः**

अरण्यसंरक्षणाय वृक्षसंवर्द्धनं कुर्वन्तु।

**अध्यापकप्रवृत्तिः**

वायुप्रदूषणोत्पादकपदार्थानाम् उदाहरणपूर्वकं ज्ञानं छात्रेभ्यः देयम्।

●

# 21

# संहतिः कार्यसाधिका

**प्रस्तावना**

बालेषु नीतिन्यासार्थमपि अस्मद्देशे विदुषां सुमहत्तमः यत्नः दृश्यते। यथा मृत्पिण्डः कामप्याकृतिं धरति तथैव घटो न धरति। अतः संस्कारस्य प्रदानाय बाल्यावस्था समीचीना इति धिया संस्कृतकवयः प्राणिकथाः आश्रित्य बालेभ्यः नीतीः अपाठयन्। तत्र पञ्चतन्त्रं हितोपदेशः इति ग्रन्थद्वयम् प्रसिद्धम्। हितोपदेशस्य कर्ता पण्डितनारायणः वर्तते। अयं ग्रन्थः बालेभ्यः सरसतया नीतिज्ञानं भवेत् इति प्रयोजनाल्लिलेख। यथा-

**यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत्।**
**कथाच्छलेन बालानां नीतिस्तदिह कथ्यते॥**

पण्डितनारायणः एवं ग्रन्थं पञ्चतन्त्रात् अन्यस्मात् ग्रन्थात् च नीतिविषयकानि पद्यानि सम्पाद्य लिलेख। अस्य ग्रन्थस्य विभाजनं चतुर्धा दृष्यते। यथा-

**मित्रलाभः सुहृद्भेदो विग्रहः संधिरेव च।**
**पञ्चतन्त्रात्तथान्यस्माद् ग्रन्थादाकृष्य लिख्यते॥**

1-मित्रलाभः, 2-सुहृद्भेदः, 3-विग्रह, 4-संधिः इति प्रकरणात् मित्रलाभे संघशक्तिज्ञानप्रदायिनी कथा वर्तते। अतिलोभात् कपोताः कष्टापन्नाः भवन्ति तदानीं वृद्धवचन-पालनेन सर्वे सङ्घीभूय उड्डयनं कुर्वन्ति। आत्मरक्षां साधयन्ति च। अत्र हेतुः वर्तते यत् पक्षिणोऽपि संघटिताः भवन्ति चेत् मनुष्याः कथं विच्छिन्नाः स्युः। संहतिरेव कार्यं साधयति।



अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः। तत्र नानादिग्देशादागत्य रात्रौ पक्षिणः निवसन्ति। अथ कदाचिदवसन्नायां भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयमायान्तं व्याधमपश्यत्। तमवलोक्याचिन्तयत् - अद्य प्रातरेवानिष्टदर्शनं जातम्। न जाने किमनभिमतं दर्शयिष्यति। इत्युक्त्वा तदनुसरणमेव व्याकुलः लघुपतनकश्चलितः।

**शोकस्थानसहस्त्राणि भयस्थानशतानि च।**
**दिवसे दिवसे मूढमाविशन्ति न पण्डितम्॥**

**अन्वयः** शोकस्थानं सहस्त्राणि भयस्थानं शतानि च दिवसे दिवसे मूढम् आविशन्ति पण्डितम् न (आविशन्ति)।

**भावार्थः** शोकागमनस्य स्थानानि सहस्त्राणि सन्ति तथा भयजनकानि स्थानानि शतानि सन्ति। एतानि भयशोकादीनि मूर्खं प्रतिदिनं आविशन्ति न तु पण्डितमाविशन्ति। पण्डिताः तेन भयभीताः न भवन्ति इति।

**उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम्।**
**मरणशोकव्याधीनां किमद्य निपतिष्यति॥**

**अन्वयः** उत्थाय-उत्थाय बोद्धव्यं महद् भयम् (अस्माकमुपरि) उपस्थितम् (जातम्)। अद्य मरणशोकव्याधीनां किं निपतिष्यति।

**भावार्थः** प्रतिदिनंम् उत्थाय बोधः करणीयः यत् अद्य अस्माकमुपरि महद्भयमुपस्थितमस्ति। मरणं वा शोकं वा व्याधिः इत्यत्र किम् अस्माकमुपरि निपतिष्यति इति।

अथ तेन व्याधेन तण्डुलकणान्विकीर्य जालं विस्तीर्णम्। स च प्रच्छन्नो भूत्वा स्थितः। तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो विकीर्णान् तान् तण्डुलान् अवलोकयामास। ततः कपोतराजः तण्डुलकणलुब्धान् कपोतान् प्रति वदति - कुतः अत्र निर्जनवने तण्डुलकणानां सम्भवः। तन्निरूप्यतां तावत्। भद्रमिदं न पश्यामि। सर्वथा अविचारितं कर्म न कर्तव्यम्।

**सुजीर्णमन्नं सुविचक्षणः सुतः सुशासिता स्त्री नृपतिः सुसेवितः।**
**सुचिन्त्य चोक्तं सुविचार्य यत्कृतं सुदीर्घकालेऽपि न याति विक्रियाम्॥**

**अन्वयः** सुजीर्णम्, अन्नम् सुविचक्षणः सुतः सुशासिता स्त्री, सुसेवितः नृपतिः सुचिन्त्य चोक्तम्, सुविचार्य यत् कृतम्, सुदीर्घकालेऽपि विक्रियाम् न याति।

**भावार्थः** सुष्ठुतया पक्वम् अन्नम्, प्रवीणः पुत्रः, सुष्ठुतय। अनुशासिता स्त्री, सम्यक्तया सेवितः नृपः, सम्यक्चिन्तनं कृत्व। यदुक्तम्, सम्यक् विचारं कृत्वा यत् कार्यं सम्पादितम्। एतत्सर्वं कालान्तरेऽपि न भवति विकारं न प्राप्नोति इति।

एतद्वचनं श्रुत्वा कश्चित्कपोतः सदर्पमाह - आः किमेवमुच्यते।

**वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते।**
**सर्वत्रैवं विचारेण भोजनेऽप्यप्रवर्तनम्॥**

**अन्वयः** आत्पकाले हि उपस्थिते वृद्धानां वचनं ग्राह्यम्।
सर्वत्र एवं विचारेण भाजनेअपि प्रवर्तनम्। (न भवति)

**भावार्थः** आपत्काले समुपस्थिते एव वृद्धानां वचनं ग्राह्यं भवति। सर्वत्र एवं विचारयामः चेत् भोजने अपि प्रवर्तनम् न भवति। अतः भोजने न ग्राह्यमिति।

इत्थम् आशङ्कमनाः कपोतः कपोतराजस्य प्रस्तावं नाङ्गीचकार। अत्रावसरे सर्वे कपोताः अपि कपोतभाषितं स्वीकृत्य कणलोभात् तत्रोपविष्टाः।

**लोभात्क्रोधः प्रभवति लोभात्कामः प्रजायते।**
**लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम्॥**

**अन्वयः** लोभात् क्रोधः प्रभवति, लोभात् कामः प्रजायते।
लोभात् मोहः च, नाशः च, लोभः पापस्यकारणम्॥

**भावार्थः** लोभात् क्रोधः भवति, लोभात् कामः जायते, लोभात् मोहः, नाशः च भवतः। लोभः पापस्य कारणम् (अस्ति)।

**असम्भवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय।**
**प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिना भवन्ति॥**

**अन्वयः** हेममृगस्य जन्म असम्भवं तथापि रामः मृगायलुलुभे।
प्रायः समापन्नविपत्तिकाले पुंसां अपि धियः मलिना भवन्ति॥

**भावार्थः** सुवर्णमृगस्य जन्म न भवति तथापि रामः मृगाय लोभं कृतवान्। प्रायः समापन्ने विपत्तिसमये धीमतां पुरुषाणां बुद्धयः मलिना भवन्ति। कार्यकाले मतिः सहाय्यं न करोति।

अनन्तरं लोभातिशयेन लोलुपाः सर्वे कपोताः जालेन बद्धा बभूवुः। ततो यस्य वचनात्तत्रावलम्बिताः तं कपोतं सर्वे तिरस्कुर्वन्ति।

**न गणस्याग्रतो गच्छेत्सिद्धे कार्ये समं फलम्।**
**यदि कार्ये विपत्तिः स्यान्मुखरस्तत्र हन्यते॥**

**अन्वयः** गणस्य अग्रतः न गच्छेत् (यदि) कार्ये सिद्धे फलं समं भवति। यदि कार्ये विपत्तिः स्यात् तत्र मुखरः हन्यते।

**भावार्थः** कदापि कस्यापि गणस्य अग्रता न करणीया, यदि कार्ये सिद्धिः भवति तर्हि पूर्णः गणः समानं फलं प्राप्नोति। किन्तु कार्य विपत्तिः भवति तर्हि अग्रेसरः तत्र दोषी भवतीति।

तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच - नायमस्य दोषः। यतः

**आपदामापतन्तीनां हितोऽप्यायाति हेतुताम्।**
**मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने॥**

**अन्वयः** आपदाम् आपतन्तीनां हितः अपि हेतुताम् आयाति।
मातृजङ्घा हि वत्सस्य स्तम्भी भवति बन्धने॥

**भावार्थः** यदा आपत्तिः आपतन्ती तदा हितैषी अपि आपत्तेः हेतुः भवति यथा वत्सस्य बन्धन्या मातृजङ्घा (धेनुजङ्घा) हि यूपायते।

**सबन्धुर्यो विपन्नानामापदुद्धरणक्षमः।**
**न तु भीतपरित्राणवस्तूपालम्भपण्डितः॥**

**अन्वयः** सः बन्धुः यः विपन्नानाम् आपदुद्धरणक्षमः। (यः)
भीतपरित्राणवस्तूपालम्भपण्डितः॥

**भावार्थः** यः विपत्तीषु उद्धरणंकर्तुंक्षमः वर्तते स एव बन्धुः। भीतानां रक्षणस्य पाखण्डे पण्डितः सः न बन्धुः इति भावः।

विपत्काले विस्मय एव कापुरुषलक्षणम्। तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम्।

**विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम्॥**

**अन्वयः** अथ विपदिधैर्यम्, अभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रमः, यशसि अभिरुचिः च, श्रुतौ व्यसनम्, इदं महात्मानां प्रकृति सिद्धम्।

**भावार्थः** आपत्तिसमये धैर्यम्, उन्नतिसमये क्षमा, सभायां वैदुष्यम्, युद्धसमये पराक्रमः, कीर्त्यां रुचिः, ज्ञानस्य व्यसनम् एतत्सर्वं महापुरुषेषु स्वभावसिद्धम् भवति।

**संपदि यस्य न हर्षो विपदि न विषादो रणे न भीरुत्वम्।**
**तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम्॥**

**अन्वयः** यस्य संपदि हर्षो न (वर्तते) विपदि विषादो न (वर्तते) रणे भीरुत्वं न (वर्तते) तं भुवनत्रयतिलकं विरलं सुतं जननी जनयति।

**भावार्थः** उन्नतिसमये यस्य मनः न हर्षम् अनुभवति तथा पतनसमये विषादं न अनुभवति, तादृशं त्रिभुवनतिलक समं सुतं विरलमेव जननी जनयति।

**षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।**
**निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता॥**

**अन्वयः** भूतिम् इच्छता पुरुषेण इह षड् दोषाः हातव्या निद्रा, तन्द्रा, भयम्, क्रोधः, आलस्यम्, दीर्घसूत्रता।

**भावार्थः** आत्मकल्याणं इच्छता पुरुषेण भुवि षट् दोषाः अवश्यमेव मोचनीयाः। निद्रा, तन्द्रा, भयम्, क्रोधः आलस्यम्, दीर्घसूत्रता (अद्यतनकार्यं आगते दिवसे करिष्यामि इति धारणा दीर्घसूत्रता)।

इदानीमप्येवं क्रियताम्। सर्वैरेकचित्तीभूय जालमादायोड्डीयताम्।

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।**
**तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥**

**अन्वयः** अल्पानाम् वस्तूनाम् अपि संहतिः कार्यसाधिका (भवति)। (यथा) तृणैः गुणत्वम् आपन्नैः मत्तदन्तिनः बध्यन्ते।

**भावार्थः** लघूनांवस्तूनामपि समूहः कार्यसाधको वर्तते। यथा तृणानां गुणत्वं जाते मदोन्मताः गजाः अपि बध्यन्ते।

**संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि।**
**तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः॥**

**अन्वयः** अल्पकैः अपि स्वकुलैः संहतिः पुंसा श्रेयसी (वर्तने)। (यथा)
तुषेण परित्यक्ताः तण्डुलाः अपि न प्ररोहन्ति।

**भावार्थः** स्वलपैः अपि स्वकुलैः सह संहतिः (संघटनम्) श्रेयस्करं वर्तते। यथा तुषेण परित्यक्तः तण्डुलाः न प्ररोहन्ति।

इति विचिन्त्य पक्षिणः सर्वे जालमादाय उत्पितताः। अनन्तरं स व्याधः सुदूराज्जालापहारकान् तान् अवलोक्य पश्चाद् धावन् अचिन्तयत्।

**संहतास्तु हरन्त्येते मम जालं विहङ्गमाः।**
**यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा॥**

**अन्वयः** एते संहताः विहंगमाः मम जालं हरन्ति।
यदा तु निपतिष्यन्ति तदा मे वशम् एष्यन्ति।

**भावार्थः** एते जालेनसहितोड्डयनमानाः पक्षिणः (कपोताः) संघीभूताः ममजालं हरन्ति, किन्तु, यदा ते अधः पतिष्यन्ति तदा मे वशम् एष्यन्ति, वशीभूताः भविष्यन्ति इति।

ततः तेषु चक्षुर्विषयातिक्रान्तेषु स व्याधः निवृत्तः। अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता हिरण्यकनामकस्य मूषकराजस्य समीपं गतवन्तः। चित्रग्रीवस्य मित्रेण मूषकराजेन स्वकीयैः तीक्ष्णैः दन्तैः सर्वेषां बन्धनानि छिन्नानि। चित्रग्रीवोऽपि हिरण्यकस्य उपकारं मत्वा सपरिवारः यथेष्टदेशान् अगच्छत्। अनया कथया अस्माभिः बोद्धव्यं पत् कस्मिन्नपि कर्मणि साहचर्यं परस्परं स्यात्तर्हि सारल्येन तद् कार्यं सिद्ध्यति।

## शब्दार्थाः

| | |
|---|---|
| विकीर्य = प्रसार्य | सुजीर्णम् = सुष्ठु पक्कम् |
| आशङ्कमनाः = शंकितमनाः | मुखरः = वाचालः |
| वायसः = काकः | विहङ्गमाः = पक्षिणः |

## सन्धिः

रात्रावस्ताचलचूडावलम्बिनि – रात्रौ + अस्ताचलचूडा + अवलम्बिनि।
उत्थायोत्थाय = उत्थाय + उत्थाय
प्रत्याह = प्रति + आह
सुदीर्घकालेऽपि = सुदीर्घकाले + अपि
त्वसंतुष्टः = तु + असंतुष्टः।
सुमहान्त्यपि = सुमहान्ति + अपि
धियोऽपि = धियः + अपि
तज्जयः = तत् + जयः
येनेष्टम् = येन + इष्टम्
गणस्याग्रतः = गणस्य + अग्रतः
हितोऽप्यायाति = हितः + अपि + आयाति
पुरुषेणेह = पुरुषेण + इह
स्वकुलैरल्पकैरपि = स्वकुलैः + अल्पकैः + अपि
हरन्त्येते = हरन्ति + एते
चक्षुर्विषयातिक्रान्तेषु = चक्षुः + विषय + अतिक्रान्तेषु

## स्वाध्यायः

1. **प्रदत्तेषु विकल्पेषु योग्यं विकल्पं चित्वा लिखत।**

(1) कुत्र विशालः तरुः वर्तते?
(क) पर्वते (ख) वने (ग) नदीतीरे (घ) गृहे

(2) काकस्य नाम किम्?
(क) चित्रग्रीवः (ख) लघुपतनकः (ग) जम्बुकः (घ) वायसराजः

(3) पापस्य कारणं किम्?
(क) मोहः (ख) क्रोधः (ग) लोभः (घ) प्रमादः

(4) रामः कस्मै लुलुभे?
(क) वानराय (ख) मृगाय (ग) व्याघ्राय (घ) सिंहाय

(5) कपोतराजः कः वर्तते?
(क) लघुपतनकः (ख) व्याघ्रः (ग) चित्रग्रीवः (घ) हिरण्यकः

(6) संहतिः नाम किम्?
(क) विघटनम् (ख) संघटनम् (ग) स्वातंत्र्यम् (घ) स्वाभिमानः

(7) हितोपदेशस्य कति भेदाः सन्ति?
(क) 3 (ख) 4 (ग) 5 (घ) 2

(8) संहतिः कार्यसाधिका इति कथा कुतः उद्धृता?

(क) मित्रलाभात् (ख) सुहृद्भेदात् (ग) विग्रहात् (घ) सन्धेः

(9) हितोपदेशस्य कः कर्ता?

(क) विष्णुशर्मा (ख) पण्डितनारायणः (ग) भट्टनारायणः (घ) पण्डितजगन्नाथः

(10) हितोपदेशस्य प्रयोजनं किम्?

(क) नीतिज्ञानम् (ख) अर्थज्ञानम् (ग) शास्त्रज्ञानम् (घ) संस्कृतज्ञानम्

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) संस्कृतकवयः किम् आश्रित्य बालेभ्यः नीतीः अपाठयन्?

(2) कदा लग्नः संस्कारः अन्यथा न भवेत्?

(3) शोकस्थानानि कति सन्ति?

(4) जननी कीदृशं विरलं सुतं जनयति?

(5) के षड् दोषाः भूतिमिच्छता पुरुषेण हातव्याः?

(6) बद्धाः कपोताः कुत्र गतवन्तः?

(7) मत्तदन्तिनः कस्मात् बद्ध्यन्ते?

**3. पञ्चवाक्यैः प्रश्नानाम् उत्तराणि लिखत।**

(1) लोभः पापस्य कारणम्।

(2) संहतिः कार्यसाधिका।

(3) चित्रग्रीवस्य नेतृत्वम्।

**4. सन्धिविच्छेदं कुरुत।**

(1) सुदीर्घकालेऽपि। (2) येनेष्टम्।

(3) हितोऽप्यायाति। (4) स्वकुलैरल्पकैरपि।

(5) सुमहान्त्यपि।

**5. श्लोकपूर्तिं कुरुत।**

(1) सुजीर्णमन्न .......... विक्रियाम्।

(2) असम्भवं .......... भवन्ति।

(3) विपदि .......... महात्मनाम्।

(4) षड् दोषाः .......... दीर्घसूत्रता।

(5) अल्पानामपि .......... मत्तदन्तिनः।

**छात्रप्रवृत्तिः**

छात्राः हितोपदेशस्य अन्याः अपि बोधप्रदकथाः पठेयुः।

**अध्यापकप्रवृत्तिः**

अध्यापकाः हितोपदेशस्य इव पञ्चतन्त्रस्यापि परिचयं कारयेयुः।

# 22

# यत्र स्वच्छता तत्र प्रभुता

**प्रस्तावना**

स्वच्छता इति गुणः मनुष्यजीवनस्य दिव्यतायाः प्रथमं सोपानम् अस्ति। स्वच्छतायाः गुणः वैयक्तिकादारभ्य विश्वफलकं यावत् विततः अस्ति। ''शरीरमाद्यं खलु धर्मसाधनम्'' सूत्रमिदं स्वच्छसुदृढशरीरम् आधारीकृत्यधर्मसिद्धतायै गन्तव्यम् इति भावं दर्शयति। यत्र स्वच्छतायाः सञ्चारः तत्र प्रभुतायाः निश्चितरूपेण पादसञ्चारः सिद्धः एव।



स्वच्छता मनुष्याय परमात्मनः निकटं नयति। स्वच्छता ईश्वरीयो गुणः वर्तते। स्वच्छता, शुद्धता, पवित्रता, निर्मलता, एते पारस्परिकं पर्यायशब्दाः सन्ति। अस्याः पृथ्व्याः निर्माणम् एतदर्थम् एव जातं यत् वयं स्वस्थं जीवनं जीवामः।

स्वच्छतायाः आरम्भः स्वस्थानीयक्षेत्रादारभ्य विश्वस्तरीयः क्षेत्रावधि कर्तव्यः।

''यत्र स्वच्छता तत्र प्रभुता'' इति सूत्रस्य अवधारणं निर्मलतायाः मूले निहितमस्ति।

स्वच्छता इति शब्दस्य श्रवणमात्रेण वयं सात्त्विकं भावं मनसि दध्मः। अयमेव सात्त्विकः भावः प्रभुतां प्रति श्रेष्ठतमं पदं प्रस्थापयितुं प्रेरयति। भाविते‌ऽस्मिन् पदे, विना प्रभुताम् विना परमप्रीतिञ्च न किमपि तिष्ठति। इदमेव परमोत्कर्षस्य स्थानं वर्तते।

अतः उभयभाविनीयं स्वच्छता बाह्या आन्तरिकी च विज्ञेया। स्वजीवनसुदृढतायै सर्वतः सर्वजनहिताय सर्वजन-सुखाय च सार्वत्रिकी स्वच्छता सुकरा शुभंकरा च स्वीकृता अस्ति।

प्रायशो वयं पश्यामः श्वानः अपि यस्मिन् कस्मिन् स्थाने उपविशति तदा पद्‌भ्यां तत्स्थानं सम्यक् सम्मार्जयति। अस्माकं प्रधान-मन्त्रिणः अपि स्वच्छतासज्जतायै स्वच्छभारतस्य अभियानं स्वीकृतवन्तः सन्ति।

स्वच्छतया सह अस्माभिः कदापि समाधानं न विधेयम्। इदं कार्यं जीवने जलमिव भोजनमिव च अनिवार्यं विद्यते। स्वच्छता नैव अस्माकं व्यवस्था परं अन्तःस्था वृत्तिर्भवेत्।

स्वच्छतायाः चत्वारि सोपानानि सन्ति।

(1) शारीरिकी स्वच्छता (2) मानसिकी स्वच्छता

(3) आध्यात्मिकी स्वच्छता (4) नैतिकी स्वच्छता

**(1) शारीरिकी स्वच्छता** एव मानसिकीं स्वच्छतां प्रति गमनस्य पन्थाः वर्तते। योगसाधनायै उपवेष्टुं प्रथमं शरीरस्य स्वच्छता परमम् आवश्यकी यथा शौचं यथा स्नानम्।

**(2) मानसिकी स्वच्छता** - प्राणायामबलेन सिध्यति। विकारैः ग्रथितं मनः कदापि शुद्धविचारान् कर्तुं न प्रभवति। यतः प्रसिद्धवाक्यमेव अस्मान्-बोधयति- ''मन एव मनुष्याणां कारणं बन्धमोक्षयोः।''

''तन्मे मनः शिवसङ्कल्पमस्तु'' इत्यपि मानसिकीस्वच्छतायै सुनिश्चितमेव।

**(3) आध्यात्मिकी स्वच्छता** - एषा स्वच्छता निर्व्याजधर्मपालनेन एव सिद्ध्यति। मनस्यन्यत् वचस्यन्यत् कर्मण्यन्यत् इति असम्भावी एव। सूत्रे-मणिगणा इव त्रिकमेतत् सम्यक् सम्पादनीयं साधनीयञ्चात्र भवेत्।

**(4) नैतिकीस्वच्छतायाः** मूलाधारः अस्माकं स्वच्छतावलितः (सम्पृक्तः) प्रभुताप्रसादितः आत्मबलधर्मः। अनेन माध्यमेन एव नैतिकी स्वच्छता जागर्ति उदेति च।

स्वच्छता नाम न केवलं बाह्यशुद्धिः अपि च अन्तःशुद्धिः अपि भावनीया। बाह्यशुद्धौ कविभिः सम्यक् बोधिताः वयम्।

**गुणा दश स्नानपरस्य नित्यं रूपं च तेजश्च बलश्च शौचम्।**
**आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च यशश्च मेधा॥**

मनुष्य तीर्थं तु ''मानसिकी शुद्धता एव'' अन्यथा ग्रन्थकाराः वदन्त्येव -

**चित्तमन्तर्गतं दुष्टं तीर्थस्नानान्न शुद्ध्यति।**
**शतशोऽथ जलैर्धौतं सुराभाण्डमिवाशुचि॥**

भूमिषु, नदीषु, समुद्रेषु, पर्वतेषु, गुहासु च विना विचारम् अवकरं क्षिपामः अतः एतेषां समेषां वास्तविकं सौन्दर्यं नश्यति। भूमेः उर्वरत्वं, नदीनां माधुर्यं, समुद्राणां सौन्दर्यं, पर्वतानां प्राकृतिकत्वं सर्वमपि नष्टप्रायं दृश्यते।

अनेन कारणेन वयं प्रापणीयं सात्त्विकत्वं न लभामहे। यत्र तत्र ष्ठीवनं, मलमूत्रत्यागः अवकरक्षेपणं, यन्त्रालयस्य दूषितजलस्य प्रस्रवणं सर्वमिदं प्रकृतेः विरुद्धं, तस्याः मूलस्वरूपस्य सर्वनाशाय प्रवर्तते।

प्रकृतिः अस्माकं दैवीसम्पत् विद्यते। अतः अस्याः देव्याः संरक्षणाय स्वच्छतासंरक्षणं योग्यम्। एषा दैवीसम्पद् एव अस्माकं प्रभुतायाः परमं पदम् अभिशंसते।

सर्वासु भगवत्सेवासु मार्जनसेवा सर्वतोऽप्यधिका निगद्यते।

**मार्जनात् देवगेहस्य मनो विक्षेपकं रजः।**
**नाशमेति तदर्थन्तु मार्जयामि तथाऽस्तु मे॥**

माध्यमेन अनेन स्वच्छतायाः बोधः सम्यक् समुपलभ्यते।

उद्याने संवर्धितपादपस्य विकासः सरलतया भवेत्-एतदर्थं वयं परितः वर्धितं तृणचयं कर्तयामः तद् खलु स्वच्छताया एकं सोपानम् अस्ति।

इत्थमेव बोधरूपेण गृह्णीमश्चेत् जीवनवृक्षस्य संवर्धनाय अवगुणतृणचयावकरः कर्तयित्वा अपसारणीयः।

स्वच्छभारतम् इति अभियानेन अपि अस्माकं भारतं स्वच्छभारतम् इति प्रत्येकं भारतीयस्य स्वप्नः अस्ति। प्रतिजनं स्वच्छतायाः एतावत् महत्त्वं वर्तते येन वयं स्वच्छतमे सुन्दरतमे वातावरणे वसतिं न कुर्मः कलुषिते च स्थाने निवसामः तर्हि नानाविधरोगैः ग्रस्ताः भूत्वा निजजीवनम् एव दूषयामः। सर्वाण्यपि स्थानानि मम गृहाण्येव सन्ति इति शुभसङ्कल्पेन स्वच्छानि सुन्दरतमानि च कर्तुं प्रयतेम।

## शब्दार्थाः

| | |
|---|---|
| विततः = विस्तृतः | निकटं = समीपं |
| दध्मः = धारणं कुर्म | सम्मार्जयतिः = स्वच्छं करोति |
| पन्थाः = मार्गः | समेषां = सर्वेषां |
| वसतिं = निवासं | |

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यं विकल्पं चित्वा लिखत।**

(1) यत्र स्वच्छतायाः सञ्चारः तत्र कस्य पादसञ्चारः?

(क) दीनतायाः (ख) दैत्यस्य (ग) प्रभुतायाः (घ) नैकस्यापि

(2) स्वच्छता मनुष्यं कस्य निकटं नयति?

(क) सज्जनस्य (ख) परमात्मनः (ग) दुर्जनस्य (घ) सज्जन-दुर्जनयोः

(3) स्वच्छतायाः कति सोपानानि सन्ति?

(क) पञ्च (ख) षट् (ग) अष्टौ (घ) चत्वारि

(4) कः यस्मिन् कस्मिन् स्थाने उपविशति तदा पद्भ्यां तत्स्थानं सम्यक् सम्मार्जयति?

(क) श्वानः (ख) उष्ट्रः (ग) महिषः (घ) वराहः

(5) स्वच्छतायाः आरम्भः कुतः करणीयः?

(क) स्वस्थानीयक्षेत्रात् (ख) ग्रामात् (ग) नगरात् (घ) नैकतोऽपि

(6) शारीरिकी-स्वच्छता कं प्रति गमनस्य पन्थाः वर्तते?

(क) शान्तिं प्रति (ख) मानसिकीस्वच्छतां प्रति

(ग) योगं प्रति (घ) न किमपि प्रति

(7) कीदृशं मनः कदापि शुद्धविचारान् कर्तुं न प्रभवति?

(क) विकारग्रथितम् (ख) चिन्तायुतम् (ग) शान्तम् (घ) अशान्तम्

(8) .......... एव मनुष्याणां कारणं बन्ध-मोक्षयोः।

(क) विचारः (ख) मनः (ग) शरीरम् (घ) नैकमपि

(9) रूपञ्च .......... श्च बलश्च शौचम्।

(क) वीर्यम् (ख) देहः (ग) तेजः (घ) पराक्रमः

(10) स्वच्छतामाध्यमेन अधः स्थितेषु किं भवति?

(क) रोगाणां नाशः (ख) रोगाणां वर्धनम् (ग) रोगाणाम् उत्पत्तिः (घ) एकमपि न

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) कः गुणः मनुष्यजीवनस्य दिव्यतायाः प्रथमं सोपानमस्ति?

(2) स्वच्छतायाः कति सोपानानि? कानि च?

(3) स्वच्छता कीदृशः गुणः वर्तते?

(4) अस्याः पृथिव्याः निर्माणं किमर्थं जातम्?

(5) स्वच्छतासज्जतायै केन स्वच्छभारतस्याभियानं स्वीकृतम्?

(6) अस्मद् प्रभुता प्रायः केषां नाशं करोति?

(7) आध्यात्मिकी शुद्धता कस्य पालनेन सिद्ध्यति?

**3. पञ्चवाक्यैः प्रश्नानाम् उत्तराणि लिखत।**

(1) ''स्वच्छता तत्र प्रभुता'' इति शीर्षकं स्पष्टं कुरुत।

(2) स्वच्छतायाः महत्त्वं यथामति प्रतिपादयत।

(3) स्वच्छतायाः चत्वारि सोपानानि प्रतिपादयत।

**4. टिप्पणी कार्या।**

(1) मानसिकी शुद्धता

(2) आध्यात्मिकी शुद्धता

(3) नैतिकी शुद्धता

**छात्रप्रवृत्तिः**

''स्वच्छताभियानम्'' विषये छात्राः स्वयं प्रतिग्रामं प्रतिनगरं गत्वा जनान् बोधयेयुः।

**अध्यापकप्रवृत्तिः**

अध्यापकाः छात्रैः सह सोत्साहं 'स्वच्छताभियानम्' सफलं कर्तुं प्रतिग्रामं प्रतिनगरं सेवाकार्यं कुर्युः।

●

# 23

# यद्भविष्यो विनश्यति

**प्रस्तावना**

संस्कृते पञ्चतन्त्रं हितोपदेशश्च वन्यप्राणिकथानां प्रसिद्धग्रन्थौ स्तः। अस्मिन् ग्रन्थद्वये पशून् आधारीकृत्य मानवजीवनोपयोगिबोधः सरलतया प्रतिपादितः अस्ति। कथारसानन्दसन्दोहेन बालानां कृते अध्ययनभारः न बाधते।

पाठोऽयम् पञ्चतन्त्रादेव गृहीतोऽस्ति। पञ्चतन्त्रप्रणेता विष्णुशर्मा अस्ति।

कथा इयम् त्रयाणां मत्स्यानाम् अस्ति। अनागतविधाता, प्रत्युत्पन्नमतिः, यद्भविष्यः इति त्रयो मत्स्याः आसन्। नामानुसारमेव तेषां गुणाः आसन्। धीवरेभ्यः आत्मानं रक्षितुं अनागतविधाता, प्रत्युत्पन्नमतिः प्रयत्नं कुरुतः किन्तु यद्भविष्यमत्स्यः प्रमादेन कालकवलीभूय स्वयमेवात्मनाशं करोति। 'प्रमादो वै मृत्युः' इति वचनात् प्रमादत्यागबोधनार्थं एषः पाठः निरूपितः। प्रमादं त्यक्त्वा आत्मोत्कर्षाय स्वरक्षणाय च स्वेनैव पुरुषार्थः करणीयः इति।

---

पुरा कस्मिंश्चित् जलाशये अनागतविधाता, प्रत्युत्पन्नमतिः यद्भविष्यश्चेति त्रयो मत्स्याः अवसन्। अथ कदाचित् मत्स्यैः पूर्णं जलाशयं दृष्ट्वा मत्स्यजीविभिरुक्तं यत्–

''अहो!! मत्स्यपूर्णोऽयं जलाशयः। कदाचिदपि अस्माभिः नान्वेषितः। तदद्य अस्माकं भोजनवृत्तिः सञ्जाता। श्वः अत्रागत्य मत्स्यकूर्मादयो व्यापादयितव्याः। अधुना सायङ्कालः, प्रभाते अत्र आगन्तव्यमिति'' निश्चित्य अगच्छन्।

अतस्तेषां तत् कुलिशपातोपमं वचः समाकर्ण्य अनागतविधाता सर्वान् मत्स्यान् आहूय कथयति– ''अहो!! श्रुतं भवद्भिः? यत् धीवरैः भणितम्? तदद्य रात्रावेव इतः गमिष्यामः निकटस्थं सरः। उक्तञ्च'

**अशक्तैर्बलिनः शत्रोः**
**कर्तव्यं प्रपलायनम्।**
**श्रयितव्योऽथवा दुर्गः**
**नान्या तेषां गतिर्भवेत्॥**



**अन्वयः** अशक्तैः बलिनः शत्रोः प्रपलायनं कर्तव्यम्। अथवा दुर्गः श्रयितव्यः। तेषां अन्य गतिः न भवेत्।

तन्नूनं प्रभातसमये धीवराः अत्रागत्य अस्माकं संक्षयं करिष्यन्ति, तन्न युक्तमत्र क्षणमपि अवस्थातुम्। उक्तञ्च

**विद्यमाना गतिर्येषामन्यत्रापि सुखावहा।**
**ते न पश्यन्ति विद्वांसः देशभङ्गं कुलक्षयम्॥**

**अन्वयः** येषाम् अन्यत्रापि गतिः सुखावहा विद्यमाना (वर्तते) ते विद्वांसः कुलक्षयं देशभङ्गं न पश्यन्ति।

तदाकर्ण्य प्रत्युत्पन्नमतिः प्राह। भविष्यदर्थे कुत्रापि कालं न प्राप्स्याम इति नास्ति। सर्वत्र मृत्युभयं निश्चितम्। किन्तु,

**''उत्पन्नामापदं यस्तु समाधत्ते स बुद्धिमान्''**

ततो यद्भविष्येण उक्तम् - अहो! भवद्भ्यां सम्यक् न मन्त्रितम्। किं वाङ्मात्रेणापि पूर्वजानां एतत्सरः त्यक्तुं युज्यते? यदि आयुःक्षयोऽस्ति तदन्यत्र गमनेनापि मृत्युर्भविष्यति एव।

कथितञ्च-

**अरक्षितं तिष्ठति दैवरक्षितम्**
**सुरक्षितं दैवहतं विनश्यति।**
**जीवत्यनाथोऽपि वने विसर्जितः**
**कृतप्रयत्नोऽपि गृहे विनश्यति॥**

**अन्वयः** अरक्षितं दैवरक्षितम् तिष्ठति, सुरक्षितं दैव हतं विनश्यति। वने विसर्जितः अनाथोऽपि जीवति, किन्तु कृतप्रयत्नोऽपि गृहे विनश्यति।

तदहं न यास्यामि। भवद्भ्यः यत् रोचते तत् कुर्वन्तु।

अथ तस्य तं निश्चयं ज्ञात्वा अनागतविधाता परिजनैः सह निष्क्रान्तः। द्वाविमौ तत्रैव स्थितौ।

अपरेद्युः धीवरैः आगत्य जलाशये जालं क्षिप्तम्। जालेन बद्धः प्रत्युत्पन्नमतिः आत्मानं मृतवत् संदर्श्य स्थितः। ततो धीवरेण जालात् अपसारितः उत्प्लुत्य अगाधनीरं प्रविष्टः।

यद्भविष्यः धीवरजालबद्धो व्यापादितः। अत एवोक्तम्ः-

**अनागतविधाता च**
**प्रत्युत्पन्नमतिस्तथा।**
**द्वावैतौ सुखमेधेते**
**यद्भविष्यो विनश्यति॥**

**अन्वयः** अनागतविधाता प्रत्युत्पन्नमतिः तथा एतौ द्वौ सुखमेधेते, यद्भविष्यो विनश्यति।

**शब्दार्थाः**

| | |
|---|---|
| समाकर्ण्य = श्रुत्वा | कुलिशपातः = वज्रपातः |
| श्रयितव्यः = सेवितव्यः | सरः = सरोवरः |
| प्रमादेन = आलस्येन | आहारवृत्तिः = भोजनवृत्तिः |
| मत्स्यजीविनः = धीवराः | सन्दोहः = समूहः |

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) मत्स्याः कुत्र अवसन्?

(क) शिवालये (ख) अरण्ये (ग) आश्रमे (घ) जलाशये

(2) अन्यत्र गन्तुं कः निश्चयं करोति?

(क) अनागतविधाता (ख) यद्भविष्यः (ग) धीवरः (घ) मकरः

(3) जलाशयः कीदृशः आसीत्?

(क) सस्यपूर्णः (ख) मृत्तिकापूर्णः (ग) मत्स्यपूर्णः (घ) अपूर्णः

(4) मत्स्यान् ग्रहीतुं के समागताः?

(क) सैनिकाः (ख) पशवः (ग) धीवराः (घ) राजानः

(5) धीवराणां वचः कीदृक्?

(क) कुलिशपातोपमम् (ख) विषोपमम् (ग) यमोपमम् (घ) घातोपमम्

(6) अनागतविधाता कैः सह अन्यत्र अगच्छत्?

(क) पशुभिः (ख) धीवरैः (ग) पक्षिभिः (घ) परिजनैः

(7) धीवराः कस्मिन् समये आगमिष्यन्ति?

(क) मध्याह्ने (ख) प्रभाते (ग) रात्रौ (घ) सायम्

(8) सर्वत्र ............. भयं निश्चितम्।

(क) सर्प (ख) धन (ग) मृत्यु (घ) राग

(9) यः उत्पन्नम् आपदं समाधत्ते सः कीदृशः?

(क) धनवान् (ख) शीलवान् (ग) बुद्धिमान् (घ) बलवान्

(10) कः विनश्यति?

(क) जलचरः (ख) प्रत्युत्पन्नमतिः (ग) सहचरः (घ) यद्भविष्यः

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) जलाशये के त्रयः मत्स्याः आसन्?

(2) अपरेद्युः कैः जालं क्षिप्तम्?

(3) जलाशये कौ स्थितौ?

(4) सर्वान् मत्स्यान् कः आह्वयति?

(5) अशक्तैः किं कर्तव्यम्?

(6) अरक्षितः केन रक्षितः तिष्ठति?

(7) आत्मानं मृतवत् संदर्श्य कः स्थितः?

**3. द्वित्रवाक्यैः उत्तराणि लिखत।**

(1) प्रत्युत्पन्नमतिः आत्मानं कथं रक्षति?

(2) अनागतविधाता किं विचिन्त्य निष्क्रान्तः?

(3) यद्भविष्यः कथं नश्यति?

(4) कथयाऽनया कः बोधः प्राप्यते?

**4. निम्नपदानां परिचयं यच्छत।**

(1) यास्यामि (2) कुर्वन्तु (3) गमिष्यामि (4) अवसन् (5) पश्यन्ति

**5. संधिविग्रहं कुरुत।**

(1) अत्रागत्य (2) तन्नूनम् (3) एवोक्तम् (4) मत्स्यानाहूय (5) जलाशयः

**छात्रप्रवृत्तिः**

पञ्चतन्त्रस्य अन्यकथानां सङ्कलनं कुरुत।

**अध्यापकप्रवृत्तिः**

छात्रैः सह वार्ताकथनप्रवृत्तिः समायोजनीया।

●

24

# संस्कृतभाषायाः महत्त्वम्

**प्रस्तावना**

भाषा मानवसमाजस्य अभिन्नमङ्गमस्ति। भाषया एव मानवः स्वकीयान् सुःखदुःखहर्षद्वेषघृणादीन् भावान् प्रकटयति। भाषया एव दूरस्थो जनः दूरध्वनिना स्वजनस्य हर्षामर्षभयोद्वेगान् अनुभवति। ''भाष्यते शास्त्रव्यवहारादिना प्रयुज्यते इति भाषा। बालानां रोदनमपि मातुः कृते भाषा एवास्ति।

प्रवर्तमानसमाजे विविधभाषाणामुपयोगः भवति। यथा-आंग्ल-हिन्दी-जापानी-फारसी-उर्दू-संस्कृत-गुजराती-तमिलादिभाषाः। किन्तु तासां सर्वासां भाषाणां जननी संस्कृतभाषाऽस्ति। ''संस्कृतं नाम दैवी वाक् अन्वाख्याता महर्षिभिः'' इति दण्डिनः कवेः प्रसिद्धा उक्तिः। तेनात्र वयं संस्कृतस्य महत्त्वं चिन्तयामहे।

---

सम् उपसर्गपूर्वकात् कृ धातुतः क्तप्रत्ययं विधाय ''संस्कृतम्'' इति निष्पादितम् अस्ति। प्रकृतिप्रत्ययविभागाख्य-संस्काररूपेण ''संस्कृतम्'' इत्युच्यते। एषा न केवलं देववाणी अपि तु मानुषीवाणी अपि अस्ति। तत् प्रत्यभिज्ञानमावश्यकम् अस्माकम्। अत एव अस्याः महत्त्वविषये विशेषविचारणा कार्या।

इयं सर्वश्रेष्ठा भाषा इति भाषाकोविदाः वदन्ति। सर्वभाषाणां जननीयम् इति संज्ञा। सर्वाः भाषाः अनया जाता, अनया एव पोषिताश्च वर्तन्ते। आदिकाले जगति सर्वत्र जनविभागे धर्मविषये संस्कृतविषये च एकत्वम् आसीत्। अत एव प्रत्येकनामकरणेन विना सनातनधर्मः, सनातनसंस्कृतिः इत्यादिकं सनातनशब्देन व्यवहृतम् अभवत्। तस्मिन् काले भाषाऽपि एका एव। सा एव सनातनभाषानामकं संस्कृतम्। अतिप्राचीनलिखितः ग्रन्थः 'ऋग्वेदः' संस्कृतभाषायामेव अस्ति। अस्याः शब्दनिर्माणसामर्थ्यम् अपरिमितं श्रेष्ठञ्चास्ति। संस्कृतभाषायां विद्यमानानां धातूनाम्, उपसर्गाणां, प्रत्ययानां बलेन असंख्यशब्दाः निर्मातुं शक्यन्ते। उपसर्गविषये श्लोकोऽपि प्रतिपादितः-

**उपसर्गेण धात्वर्थः बलादन्यत्र नीयते।**
**प्रहाराहारसंहारः विहारपरिहारवत्॥**

अत्र हृञ् हरणे धातोः निष्पन्नात् शब्दात् अग्रे उपसर्गसंयोजनेन पृथगर्थानां बोधः भवति। प्रायः द्विसहस्त्रं धातवः, द्वाविंशति उपसर्गाः, कृत्तद्धितसमासादयः पञ्चवृत्तयः तत्र विद्यमानाः असंख्यप्रत्ययाः च शब्दनिर्माणसामग्र्यः। अस्याः कर्तृकर्मक्रियारूपवाक्यघटना शाब्दबोधप्रक्रिया च अतिविशिष्टा। गणकयन्त्रेऽपि (कोम्प्युटर) उपयोगयोग्या इति तज्ज्ञाः वदन्ति। अस्याः भाषायाः प्रयोगसामर्थ्यं, शब्दमाधुर्यं, सूत्रीकरणसौकर्यम् इत्यादिकम् अत्युन्नतस्तरीयम् भवति।

पूर्वस्मिन् काले सकलविषयाः अपि संस्कृतमाध्यमेन पाठिताः आसन्। वैदिकगणितम्, विज्ञानम्, तन्त्रशास्त्रम् वास्तुशास्त्रम्, ज्यौतिषम्, आयुर्वेदः, गान्धर्ववेदादयः, संस्कृतभाषया एव आसन्।

अलङ्कारशास्त्राध्यात्मिकदार्शनिकशास्त्राणाम् विषयविहारानन्दः अस्यामेव भाषायां प्राप्यते। श्रृंगारशास्त्रं समारभ्य वैमानिकशास्त्रपर्यन्तं चतुःषष्टिकलानां मार्गदर्शिका इयमेव भाषा आसीत्। चोरविद्याऽपि अनया प्रतिपादिताऽस्ति।

पुरातनसंस्कृतेः अविच्छिन्नप्रवाहे तटरूपा एषा भाषा। सर्वासां भाषाणां एकसूत्रीकरणं अनया सुरकन्यकया एव सम्पद्यते। ये जनाः बालाः एतां पठन्ति ते सर्वेऽपि सुसंस्कृताः भविष्यन्ति। तेनैव आरक्षकाधिकारिणा उक्तम् यत् ''अपराधिनां गणनायां संस्कृतज्ञानां सङ्ख्या अल्पीयसी एव वर्तते। तथा ये प्रविष्टाः तेऽपि स्वीयस्वार्थेन न प्रविष्टाः, किन्तु परार्थे एव।'' कथनस्याशयः संस्कृतज्ञः कदापि निजस्वार्थे अपराधी भवितुं नैवार्हति। संस्कृतपठनेन जनाः

नीतिमन्तः भवन्ति इत्येव अस्याः भाषायाः सांस्कृतिकमहत्त्वम्। अधुना भ्रष्टाचारकाले नीतिमतां जनानां आवश्यकता बहु वर्तते।

लण्डनदेशस्य सेण्टझेवियर्सविद्यालयस्य प्रधानाचार्यस्य मतानुसारं ''संस्कृतभाषा मनुष्यमस्तिष्कस्य विकासाय बहूपयोगिनी'' इति। संस्कृतपठनेन छात्राणां शक्तिः वर्धते। तेन ''अभयं वै ब्रह्म'', ''तत्त्वमसि'', ''अयमात्मा ब्रह्म'', ''अमृतस्य पुत्राः'' इत्यादयः उपनिषत्प्रयोगाः आत्मबलं संवर्धयन्ति। संस्कृतगद्यपद्यानाम् उच्चारणेन प्राणायामफलप्राप्तिः भवति। स्वामिविवेकानन्दपादैः प्रतिपादितं यत् ''अस्याः भाषायाः कुलीनता अद्वितीया''। संस्कृतभाषा कायेन मनसा, वाचा, इन्द्रियैः बुद्ध्या, आत्मना च मानवं निर्विकारं कृत्वा तस्मै परिपूर्णव्यक्तित्वप्रदायिनी भवति। राष्ट्रस्य परमोन्नत्यै उत्तमं साधनं भवति संस्कृतम्। यदा यदा राष्ट्रस्य पुनरुद्धरणप्रक्रिया जायते तदा तत्र कस्यापि संस्कृतविदः दायित्वं निहितं भवति। यथा चन्द्रगुप्तकाले चाणक्यस्य। राष्ट्रं सदैव स्वसंस्कृत्या जीवति, स्वसंस्कृतिश्च स्वभाषया एव जीवति। अतः राष्ट्रोज्जीवनाय संस्कृतोज्जीवनं प्रथमं प्रधानञ्च सोपानम्। पूर्वं नालन्दादिविद्यालयेषु केन्द्रस्थाने ''एतद्देशप्रसूतस्य सकाशादग्रजन्मनः स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः'' इति ध्येयवाक्यानि आसन्। यदि संस्कृतोत्थानं भविष्यति तर्हि राष्ट्रस्य परमवैभवस्य प्रााप्तिः भविष्यत्येव।

एवं भाषाशास्त्रदृष्ट्या संस्कारवाहिनीरूपेण, वैज्ञानिकसांकेततन्त्रज्ञानादिना, शास्त्रव्यवहारयोग्यतया, व्यक्तित्वविकासमाध्यमत्वेन, राष्ट्रपुनःनिर्माणसाधनत्वेन च संस्कृतभाषायाः महत्त्वं सदैव अस्त्येव।

जयतु संस्कृतम्। जयतु भारतम्।

## शब्दार्थाः

अभिन्नम् = संलग्नम्

आदिकाले = पुरातनसमये

अपरिमितम् = अगण्यम्

मार्गदर्शिका = मार्गदर्शिनी

नीतिमन्तः = नीतियुक्ताः

भाष्यते = उच्चार्यते

निर्मातुं = रचयितुम्

बोधः = ज्ञानम्

परार्थे = उपकारार्थे

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) भाषा कस्य अभिन्नम् अङ्गम्?

(क) मानवसमाजस्य (ख) इन्द्रस्य (ग) स्वर्गस्य (घ) मोक्षस्य

(2) बालानां रोदनं मातुः कृते किमस्ति?

(क) बलम् (ख) भाषा (ग) आयुधम् (घ) शस्त्रम्

(3) केन उपसर्गेण संस्कृतशब्दः भवति?

(क) प्र (ख) परा (ग) सम् (घ) अनु

(4) अतिप्राचीनग्रन्थः कस्यां भाषायामस्ति?

(क) आंग्ल (ख) हिन्दी (ग) संस्कृत (घ) गुर्जर

(5) संस्कृतभाषा कस्मिन् यन्त्रे उपयोगयुक्ता?

(क) चालक (ख) सूचक (ग) लेखक (घ) गणक

(6) आहारशब्दे कः उपसर्गः ?

(क) निस् (ख) निर् (ग) दुस् (घ) आङ्

(7) कतिकलानां मार्गदर्शिका इयं भाषा ?

(क) त्रि (ख) चतुःषष्टि (ग) सप्त (घ) नव

(8) संस्कृतज्ञः कदापि कीदृशः न भवति ?

(क) साधुः (ख) सज्जनः (ग) अपराधी (घ) सैनिकः

(9) कस्य विकासाय संस्कृतभाषा उपयोगिनी ?

(क) हस्तस्य (ख) मस्तिष्कस्य (ग) नेत्रस्य (घ) पादस्य

(10) कस्य उन्नत्यै उत्तमं साधनं संस्कृतम् ?

(क) ग्रामस्य (ख) नगरस्य (ग) कामस्य (घ) राष्ट्रस्य

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) संस्कृतं नाम किम् ?

(2) संस्कृतस्य व्याख्या का ?

(3) सर्वासां भाषाणां जननी का ?

(4) प्राचीनतमः ग्रन्थः कः ?

(5) उपसर्गेण अन्यत्र किं नीयते ?

(6) अस्याः भाषायाः किमुन्नतस्तरीयम् ?

(7) पूर्वकाले सकलविषयाः केन माध्यमेन पाठिताः आसन् ?

(8) के संस्कृतिमन्तः भविष्यन्ति ?

(9) संस्कृतपठनेन छात्राणां का शक्तिः वर्धते ?

(10) स्वामिविवेकानन्देन किम् प्रतिपादितम् ?

**3. पञ्चवाक्यैः प्रश्नानां उत्तराणि लिखत।**

(1) संस्कृतस्य महत्त्वविषये विशेषचिन्तनं कथम् ?

(2) धातूपसर्गविषये संस्कृते किम् प्रतिपादितम् ?

(3) संस्कृतेन जनाः नीतिमन्तः, आरोग्यवन्तः कथं भवन्ति ?

(4) राष्ट्रोन्नत्यै कथमावश्यकी संस्कृतभाषा ?

**4. विभक्तिपरिचयं लिखत।**

(1) भाषायाः (2) पोषिताः (3) विद्यालयेषु (4) छात्राणाम् (5) उच्चारणेन

**5. संधिविग्रहं कुरुत।**

(1) अयमात्मा (2) श्रेष्ठञ्चास्ति (3) विभागाख्य (4) राष्ट्रोज्जीवनम् (5) इयमेव

**छात्रप्रवृत्तिः**

विविधभाषासु संस्कृतशब्दान् गवेषयत।

**अध्यापकप्रवृत्तिः**

संस्कृतस्य उपवेदानां शास्त्राणाञ्च परिचयं कारयतु।

# 25

# शास्त्रपरिचयः-1

**प्रस्तावना**

संस्कृतच्छात्राणाम् उपकाराय लाभाय च पाठ्यपुस्तके शास्त्रपरिचय इति पाठः प्रदीयते। छात्राः अनेन विविध-शास्त्राणां सामान्यं परिचयं जानीयुः इति मुख्यं प्रयोजनम् अस्ति। अस्मिन् पाठे आचार्यजयदेवस्य तस्य कृतेः चन्द्रालोकस्य च परिचयः प्रस्तूयते।

**आचार्यजयदेवः**

साहित्यशास्त्रे षट् सम्प्रदायाः सन्ति। रस-अलङ्कार-ध्वनि-वक्रोक्ति-रीति-औचित्येति नाम्ना ख्याताः। तेषु अलङ्कार-सम्प्रदायस्य महत्त्वम् अन्यसम्प्रदायापेक्षया अधिकं वर्तते। अत एव साहित्यशास्त्रस्य अपरं नाम अलङ्कारशास्त्रम् अपि वर्तते।

अलङ्कारशास्त्रस्य इतिहासे चन्द्रालोककारः जयदेवः चन्द्र इव शोभमानः वर्तते।

— श्रूयते यत् बङ्गप्रदेशस्य राजपुत्रः लक्ष्मणसेनः एकादशशताब्द्यां राज्यं करोति स्म। जयदेवः तस्य सभापण्डितः आसीत्।

— तस्य अपरं नाम पीयूषवर्षः आसीत्।

**गोवर्धनश्च शरणो जयदेव उमापतिः।**
**कविराजश्च रत्नानि समितौ लक्ष्मणस्य च॥**

प्रद्योतभट्टः 1583 ख्रीष्टाब्दे चन्द्रालोकस्य टीकां लिखितवान्। अतः जयदेवस्य कालः 1583 ख्रीष्टाब्दात् पूर्वं निर्धार्यते। जयदेवः मम्मटस्य काव्यलक्षणे असम्मतिं प्रदर्शितवान्। मम्मटस्य कालः द्वादशशताब्द्याः उत्तरार्धः मन्यते अतः जयदेवः द्वादशशताब्द्याः अनन्तरं जातः इति निश्चीयते। प्रसन्नराघवस्य केचन श्लोकाः शार्ङ्गधरपद्धतौ उदाहृताः सन्ति। शार्ङ्गधरपद्धतेः कालः 1363 ख्रीष्टाब्दः मन्यते अतः जयदेवः त्रयोदशशताब्द्यां सञ्जातः इति वक्तुं शक्यते।

जयदेवस्य माता सुमित्रा पिता च महादेवः आसीत्। चन्द्रालोके प्रसन्नराघवे च जयदेवः एतयोः नामोल्लेखं कृतवान्। चन्द्रालोके यथा-

**महादेवः सत्रप्रमुखमखविद्यैकचतुरः।**
**सुमित्रा तद्भक्तिप्रणहितमतिर्यस्य पितरौ॥**

प्रसन्नराघवे यथा-

**लक्ष्मणस्येव यस्यास्य सुमित्राकुक्षिजन्मनः।**
**रामचन्द्रपदाम्भोजे भ्रमद् भृङ्गायते मनः॥**

अनेन सिद्ध्यति यत् प्रसन्नराघवस्य चन्द्रालोकस्य च कर्ता एक एव जयदेवः आसीत्। जयदेवस्य अन्या कृतिः गीतगोविन्दम् अपि अतिप्रसिद्धम् अस्ति। अत्र अलङ्कारशास्त्रस्य उपयोगित्वात् चन्द्रालोकस्य परिचयः प्रदीयते।

**चन्द्रालोकः**

जयदेवविरचितः अलङ्कारशास्त्रसम्बन्धी एक एव ग्रन्थः चन्द्रालोकः प्राप्यते। अस्मिन् ग्रन्थे 10 मयूखाः (अध्यायाः) सन्ति। सम्पूर्णेऽपि ग्रन्थे 350 श्लोकाः सन्ति। चन्द्रालोकस्य भाषा सरला, शैली मनोहरा चास्ति।

चन्द्रालोकस्य प्रथमे मयूखे काव्यलक्षणम्, काव्य-हेतुः शब्दत्रैविध्यम् (रूढः, यौगिकः, योगरूढः) इति विषयाः निरूपिताः सन्ति। द्वितीये मयूखे दोषनिरूपणं कृतं वर्तते। तृतीये मयूखे काव्याङ्गा निरूपणम्, चतुर्थे मयूखे दशगुणानां निरूपणम् अस्ति। पञ्चमे मयूखे पञ्चशब्दालङ्काराणां शतानाम्-अर्थालङ्काराणां च निरूपणम् अस्ति। षष्ठे मयूखे रस-भाव-रीति-वृत्तिनिरूपणम् अस्ति। सप्तमे मयूखे व्यञ्जनानिरूपणं ध्वनिकाव्यनिरूपणं चास्ति। अष्टमे मयूखे गुणीभूतव्यङ्ग्यकाव्यनिरूपणम्, नवमे मयूखे लक्षणानिरूपण्, दशमे मयूखे अभिधानिरूपणम् अस्ति।

अस्य ग्रन्थस्य इयं विशेषता वर्तते यत् एकस्मिन् एव श्लोके अलङ्कारलक्षणम् उदाहरणसहितं प्रदत्तमस्ति। पूर्वार्धे लक्षणम्, उत्तरार्धे उदाहरणम् इति अस्य ग्रन्थस्य ग्रन्थकर्तुश्च विशेषता वर्तते। एतादृशी समासशैली अलङ्कारनिरूपणे अन्यत्र कुत्रापि नावलोक्यते। अत्र किञ्चित् उदाह्रियते यथा-

**व्यतिरेको विशेषश्चेदुपमानोपमेययोः। (लक्षणम्)**
**शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः॥ (उदाहरणम्)**

**(चन्द्रा. 5-59)**

अपि च

**विभावना विनापि स्यात् कारणं कार्यजन्म चेत्। (लक्षणम्)**
**पश्य लाक्षारसासिक्तं रक्तं त्वच्चरणद्वयम्॥ (उदाहरणम्)**

**(चन्द्रा. 5-77)**

अनया प्रतिपादनशैल्या अयं ग्रन्थः अलङ्कारशास्त्रे अत्यन्तं प्रसिद्धिम् अगमत्। अप्पयदीक्षितस्तु तावान् प्रभावितः अभवत् यत् तेन स्वकीयग्रन्थे कुवलयानन्दे चन्द्रालोकस्य अलङ्कारविभागः पूर्णतया यथातथ्येन स्वीकृतः। कतिपयानि उदाहरणानि स्वोपज्ञानि प्रस्तूय अप्पयदीक्षितः स्वस्यापि पाण्डित्यं प्रादर्शयत्। कुवलयानन्दे अप्पयदीक्षितः स्वयमेव स्वीकरोति यत्-

**चन्द्रालोको विजयतां शरदागमसम्भवः।**
**हृद्यः कुवलयानन्दो यत्प्रसादादभूदयम्॥**

अस्य पद्यस्य तात्पर्यमस्ति यत् शरदागमे उत्पद्यमानस्य चन्द्रालोकस्य विजयोऽस्तु, यस्य प्रसादात् रमणीयः कुवलयानन्दः प्रादुरभवत्। शरदागमे एव चन्द्रः स्पष्टतया आलोक्यते, तदा एव कुवलयानां विकासो जायते। इत्थं श्लेषालङ्कारेण चन्द्रालोकात् कुवलयानन्दः जातः इति अप्पयदीक्षितेन सूचितम्। ''शरदागमसम्भवः'' इति पदेन प्रद्योतभट्टकृतायाः शरदागमटीकायाः उल्लेखः क्रियते।

**चन्द्रालोकस्य टीकाः**

जयदेवकृतः अयं ग्रन्थः अलङ्कारशास्त्रे अतिप्रसिद्धः लोकप्रियश्च वर्तते। तस्मादेव कारणात् अस्य ग्रन्थस्योपरि षड् टीकाः प्राप्यन्ते। तिस्रः टीकाः हस्तलिखितरूपेण उपलभ्यन्ते, तिस्रश्च प्रकाशिताः वर्तन्ते। दीपिका, शारदशर्वरी वाजचन्द्रकृतटीका च हस्तलिखितस्वरूपेण उपलब्धाः सन्ति। प्रकाशितटीकासु प्राचीना टीका शरदागमटीका अस्ति। अस्याः टीकायाः लेखकः प्रद्योतभट्टः अस्ति। द्वितीया रमानाम्नी टीका आचार्यवैद्यनाथपायगुण्डेन विचरिता अस्ति। तृतीया टीका अस्ति सुधा। अस्याः अपरं नाम अस्ति राकागमटीका। अस्याः टीकायाः कर्ता विश्वेश्वरभट्टः अस्ति, तस्य अपरं नाम गागाभट्टः इत्यपि वर्तते।

इत्थं छात्राणां ज्ञानार्थम्, अलङ्कारशास्त्रे प्रवेशार्थं च अत्र प्रसिद्धग्रन्थस्य चन्द्रालोकस्य, तत्कर्तुः जयदेवस्य च परिचयः प्रदत्तः।

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) जयदेवस्य अपरं नाम किम्?

(क) पीयूषवर्षः (ख) विश्वनाथः (ग) विद्यानाथः (घ) शार्ङ्गधरः

(2) जयदेवः कस्य सभापण्डितः आसीत्?

(क) रामसेनस्य (ख) लक्ष्मणसेनस्य (ग) प्रद्योतस्य (घ) उदयनस्य

(3) जयदेवस्य मातुः नाम किम्?

(क) सुमतिः (ख) सुमित्रा (ग) सुरथ्या (घ) सुमाला

(4) चन्द्रालोके कति मयूखाः सन्ति?

(क) 08 (ख) 12 (ग) 09 (घ) 10

(5) कुवलयानन्दस्य रचयिता कः?

(क) जयदेवः (ख) विश्वनाथः (ग) अप्पयदीक्षितः (घ) रूय्यकः

(6) शरदागमटीकायाः लेखकः कः?

(क) प्रद्योतभट्टः (ख) जगन्नाथः (ग) अप्पयदीक्षितः (घ) शारदातनयः

**2. सङ्क्षेपेण उत्तरं लिखत।**

(1) साहित्यशास्त्रे कति सम्प्रदायाः सन्ति?

(2) जयदेवस्य पित्रोः नाम किम्?

(3) ''प्रसन्नराघवम्'' केन विरचितम्?

(4) कस्मिन् मयूखे अभिधानिरूपणम् अस्ति?

(5) चन्द्रालोकस्य प्रकाशिताः टीकाः कति सन्ति?

**3. सविस्तरमुत्तरं लिखत।**

(1) जयदेवस्य कालनिर्धारणम्।

(2) चन्द्रालोकस्य विषयवस्तु।

(3) चन्द्रालोकस्य टीकाग्रन्थाः।

(4) चन्द्रालोकस्य वैशिष्ट्यम्।

**छात्रप्रवृत्तिः**

छात्राः जयदेवस्य अन्यान् ग्रन्थान् अधीत्य तेन परिचिताः भवेयुः।

**अध्यापकप्रवृत्तिः**

अध्यापकाः चन्द्रालोकस्य सम्पूर्णाम् अधीतिं कृत्वा मुख्यांशान् छात्रान् प्रति वदेयुः।

●

# 26

# शास्त्रपरिचयः-2

**प्रस्तावना**

कविराजराजशेखरेण 'काव्यमीमांसा' इति अलङ्कारशास्त्रस्य ग्रन्थः लिखितः। ग्रन्थोऽयं भारतीय-साहित्य जिज्ञासूनां कृते प्रमुखः वर्तते। संस्कृत-साहित्यशास्त्रस्य अमूल्यं रत्नमिदम्। काव्यमीमांसानुसारम् आदिकविः 'काव्यपुरुषः', द्वितीयकविः शुक्रः, तृतीयकविः वाल्मीकिः। अस्मिन् ग्रन्थे राजशेखरादपि पूर्वकालिनी या परंपरा कविजगति प्रचलन्ती आसीत् सा एव परंपरा अर्वाचीनकविषु काल्पनिकरूपकमाध्यमेन काव्यपुरुषसाहित्यविद्यावधूविवाहप्रसङ्गत्वेन कविना प्रणीता अस्ति। अस्य मतेन काव्यपुरुषः ब्रह्मसरस्वत्योः पुत्रः। ध्वन्यालोकप्रणेता आनन्दवर्धनाचार्यः अपि अस्मिन् विषये राजशेखरेण सह सम्मतः। ग्रन्थोऽयम् खलु अष्टादशाधिकरणेषु संविभक्तः बृहद्ग्रन्थ आसीत्। किन्तु अधुना केवलं प्रथमाधिकरणमात्रम् उपलभ्यते। अस्मिन्नाधिकरणे अष्टादश अध्यायाः सन्ति।

---

प्रथमाध्याये शास्त्रावतरणस्य इतिहासः, ब्रह्मणा कृता काव्यपुरुषस्य सृष्टिः, काव्यविद्याप्रसाराय काव्यपुरुषस्य नियोजनम्, तेन काव्यपुरुषेण कृतः अष्टादशभ्यः इन्द्रादिशिष्येभ्यः एकैकस्य अधिकरणस्य उपदेशः।

तैः एव शिष्यैः नानाविधविषयेषु पृथक्-पृथक् ग्रन्थाः विरचिताः। एतादृशाः वैविध्यपूर्णाः विषयाः समाविष्टाः सन्ति।

द्वितीयाध्याये संस्कृतवाङ्मयस्य काव्यत्वेन शास्त्रत्वेन च द्विधा प्रतिपादनमस्ति। शास्त्रेऽपि अपौरुषेयं पौरुषेयं पुराणम्, आन्वीक्षिकीमीमांसा स्मृतित्रयं शास्त्ररूपम्। अलङ्कारशास्त्रमपि वेदस्य सप्तमम् अङ्गम् अभिहितम्। चतुर्दशविद्यासु साहित्यविद्याऽपि पञ्चदशत्वेन अन्तर्भवतीति प्रतिपादितमत्र। अपि च आन्वीक्षिकीत्रयीवार्ता दण्डनीतिविद्यासु पञ्चमी साहित्यविद्या इत्यत्र कविना निर्दिष्टम्।

तृतीयाध्याये हिमालये तपश्चरन्ती पुत्रार्थिनी सरस्वती ब्रह्मणः प्रसादेन पुत्रप्राप्तिं चकार। तं बालमादाय शारदा यदा स्नातुं निष्क्रान्ता तदा तं बालं निःसहायं मत्वा ऋषिः उशना: (शुक्राचार्यः) स्वाश्रमं नीतवान्। अत्र मूलग्रन्थस्य कानिचन वाक्यानि स्मरणीयानि सन्ति। यथा-

''एवं गुरुभ्यो गिरः पुष्पाः पुराणीः'' शृणुमःस्म यत् किल घिषणं शिष्याः कथाप्रसङ्गे पप्रच्छुः- कीदृशः पुनरसौ सारस्वतेयः ?

काव्यपुरुषो वो गुरुः इति। सः बृहताम्पतिः तान् शिष्यान् ऊचे।

पुरा पुत्रीयन्ती सरस्वती तुषारगिरौ तपस्यामास। प्रीतेन मनसा तां विरिञ्चः प्रोवाच ''पुत्रं ते सृजामि'' अथैषा काव्यपुरुषं सुषुवे। सोऽभ्युत्थाय सपादोपग्रहं छन्दस्वतीं वाचम् उदचीचरत् (निजगाद)

यदेतत्वाङ्मयं विश्वम्, अर्थमूर्त्या विवर्तते।

**सोऽस्मि काव्यपुमानम्ब! पादौ वन्देय तावकौ॥** इति

एवमेव शुक्रस्य समीपेऽपि सारस्वतेयः छन्दस्वतीं वाचमुदैरयत् यथा-

**या दुग्धाऽपि न दुग्धैव**
**कवि दोग्धृभिरन्वहम्।**
**हृदि नः सन्निधत्तां सा**
**सूक्तिः धेनुः सरस्वती॥**

वाल्मीकिना पुनः प्राप्तपुत्रा सरस्वती तं ऋषिं वाल्मीकिं कृपयाऽवलोक्य तस्मै एव छन्दोमयीं वाचं प्रायच्छत्। एकदा सः ऋषिः शोकाकुलः सन् निषादेन निहतं क्रौञ्चयुगलं दृष्ट्वा श्लोकमुज्जगाद।

**मा निषाद प्रतिष्ठां त्व-**
**मगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेक-**
**मवधीः काममोहितम्॥**

चतुर्थाध्याये गुरुशिष्ययोः भेदौ कथितौ। प्रथमः बुद्धिमान्, द्वितीय आहार्यबुद्धिश्च इति। प्रसङ्गानुसारं दुर्बुद्धिरपि शिष्यः विवेचितः। प्रतिभा द्विविधा कारयित्री भावयित्री चेति। कविराजशेखरमतानुसारं शक्तिरेव श्रेष्ठतमं तत्त्वम् इति। शक्तियुक्तः कविः व्युत्पत्तिप्रतिभे प्राप्नोति।

— पञ्चमाध्याये कविना प्रतिभाव्युत्पत्तिविवेचनं कृतमस्ति। बहूनां पूर्वविदुषां मतानि विविच्य प्रतिपादितं यत् प्रतिभाव्युत्पत्तियुक्तः कविरेव श्रेष्ठः।

ततः कवीनां प्राधान्येन त्रयो भेदाः वर्णिताः। शास्त्रकविः, काव्यकविः, उभयकविः। यद्यपि कवीनां नैके भेदाः किन्तु तेषु मुख्याः त्रयः।

अत्र नवविधा काव्यपाकचर्चाऽपि चर्चिता।

''**वरमकविर्न पुनः कुकविः स्यात्।**''
''**कुकविता हि सोच्छ्वासं मरणमिति।**'' इति
वाक्येनानेन कुकवित्वं निन्दितम्।

— षष्ठाध्याये पदवाक्यविवेकः, सप्तमाध्याये वाक्यानां विचारः, अष्टमाध्याये काकुवाक्प्रकारः, नवमाध्याये पाठप्रतिष्ठा, दशमाध्याये काव्यार्थयोर्नयः, एकादशाध्याये अर्थानुशासनम्, द्वादशाध्याये कविचर्चा, त्रयोदशाध्याये राजचर्या, चतुर्दशाध्याये शब्दार्थहरणोपायाः, पञ्चदशाध्याये कविविशेषः, षोडशाध्याये कविसमयः, सप्तदशाध्याये देशकालविभागः, अंतिमे अष्टादशाध्याये भुवनकोशः। इत्थं विविधविषयाः निरूपिताः।

**अष्टादशाधिकरणविधानम् :-**

श्रीकण्ठसदाशिवात् शासितः ब्रह्मा निजपुत्रमरीच्यादिभ्यः प्रथमम् 'काव्यम्' तेषु सर्वेषु देवैरपि पूज्यमानः सरस्वतीसुतः काव्यपुरुषः अष्टादशाधिकरणैः युक्तां काव्यविद्यां स्वशिष्येभ्यः देवेभ्यश्च प्रोवाच। तेषु शिष्येषु यथा-इन्द्रः कवि-रहस्यनामकम् अधिकरणम्, उक्तिगर्भः-उक्तिवैचित्र्यपादकम्, यमः-यमकम् चित्राङ्गदः चित्रकाव्यम्, शेषः शब्दश्लेषम्, पुलत्स्युः वास्तवम्, औपकायनः औपम्यम्, पाराशरः-अतिशयम्, उतथ्यः-अर्थश्लेषम्, कुबेरः- उभयालङ्कारिणम्, कामदेवः वैनोदिकम्, भरतः रूपकनिरुपणम्, नंदिकेश्वरः-रसाधिकरणम्, धिषणः- शोषाधिकरणम्, उपमन्युः गुणौपादानिकम्, कुचुमाराख्य औपनिषदिकम् च अधीत्य विस्तारयामास। तदनन्तरम् ते सर्वेऽपि स्वशास्त्राणि अरचयन्। एवं च तस्मात् कालात् विच्छिन्ना काव्यविद्या यायावरेण (राजशेखरेण) सा संक्षेपेण काव्यमीमांसेति प्रणीता।

**शब्दार्थाः**

| | |
|---|---|
| उपलभ्यते = प्राप्यते | उशनाः = शुक्रः |
| गिरः = वाचः (ब.व.) | छन्दस्वतीम् = छन्दयुक्ताम् |
| सारस्वतेयः = सरस्वतीपुत्रः | विरिञ्चः = ब्रह्मा |
| निषादेन = लुब्धकेन | शाश्वती = चिरकालीना |

निष्क्रान्ता - गता

सोच्छ्वासम् - श्वाससहितम्

तुषारगिरौ - हिमालये

उज्जगाद - अवोचत्

विदुषाम् - बुधानाम्

तपश्चरन्तीम् - तपः आचरन्तीम्

प्रोवाच - अकथयत्

सुषुवे - सूतवती

## स्वाध्यायः

**1. प्रदत्तेषु विकल्पेषु योग्यविकल्पं चित्वा लिखत।**

(1) राजशेखरेण कः ग्रन्थः रचित?

(क) काव्यमीमांसा (ख) साहित्यशास्त्रम् (ग) भगवद्गीता (घ) रामायणम्

(2) काव्यमीमांसानुसारं आदिकविः कः?

(क) वाल्मीकिः (ख) व्यासः (ग) कालिदासः (घ) काव्यपुरुषः

(3) काव्यपुरुषस्य पिता कः?

(क) इन्द्रः (ख) वाल्मीकिः (ग) ब्रह्मा (घ) महेशः

(4) काव्यपुरूषस्य माता का?

(क) यमुना (ख) गङ्गा (ग) सरस्वती (घ) गोमती

(5) अस्मिन्नधिकरणे कति अध्यायाः सन्ति?

(क) 18 (ख) 22 (ग) 20 (घ) 10

(6) काव्यपुरुषेण कति शिष्येभ्यः विद्या प्रदत्ता?

(क) 15 (ख) 18 (ग) 18 (घ) 19

(7) वाङ्मयं शास्त्रं कतिविधम्?

(क) सप्तविधम् (ख) पञ्चविधम् (ग) द्विविधम् (घ) नवविधम्

(8) अपौरुषेयशास्त्रं किम्?

(क) रामायणम् (ख) पुराणम् (ग) व्याकरणम् (घ) मन्त्रब्राह्मणम्

(9) अलङ्कारशास्त्रम् वेदस्य कतमम् अङ्गम्?

(क) अष्टमम् (ख) सप्तमम् (ग) पञ्चमम् (घ) तृतीयम्

(10) हिमालये सरस्वत्या किमर्थं तपस्तप्तम्?

(क) मोक्षार्थम् (ख) योगार्थम् (ग) पुत्रार्थम् (घ) ज्ञानार्थम्

(11) काव्यपुरुषं आश्रमं कः नीतवान्?

(क) बृहस्पतिः (ख) वाल्मीकिः (ग) उशनाः (घ) इन्द्रः

(12) कः ऋषिः सरस्वतीं उशनसः आश्रमं नीतवान्?

(क) कण्डुः (ख) दुर्वासाः (ग) दधीचिः (घ) वाल्मीकिः

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) काव्यपुरुषेण यमाय का विद्या शिक्षिता?

(2) कामदेवाय का विद्या प्रदत्ता?

(3) आदिकाव्यप्रर्तकः कः ?

(4) संस्कृतशास्त्रस्य अमूल्यरत्नं किम् ?

(5) काव्यपुरुषः कयोः पुत्रः ?

(6) शास्त्रावतरणस्य इतिहासः कस्मिन्नध्याये ?

(7) पञ्चमी का विद्या ?

(8) काव्यपुरुषं कः सुषुवे ?

(9) कतिविधाः काव्यपाकाः ?

(10) कुबेराय का विद्या प्रदत्ता ?

**3. पञ्चवाक्यैः प्रश्नानां उत्तराणि लिखत।**

(1) प्रथमाध्यायस्य सारांशं लिखत।

(2) काव्यपुरुषस्य वृत्तान्तं प्रतिपादयत।

(3) वाल्मीकिविरचितां श्लोककथां वर्णयत।

(4) काव्यपुरुषेण दत्तविद्यानां पञ्चानां नामानि लिखत।

(5) पञ्चमाध्यायस्य सारं लिखत।

**4. संधिं कुरुत।**

(1) मत + अनुसारम् (2) तस्मिन् + अधिकरणे

(3) हरण + उपायः (4) पाद + उपग्रहम्

(5) चर्चा + अपि

**5. विभक्तिपरिचयं यच्छत।**

(1) विद्यायाः (2) माध्यमेन (3) ऋषिम् (4) शिष्येभ्यः (5) रचनायाम्

**छात्रप्रवृत्तिः**

अन्यसाहित्यग्रन्थानां विषये ज्ञातव्यम्।

**अध्यापकप्रवृत्तिः**

अन्येषाम् अलङ्कारग्रन्थानां परिचयं कारयेयुः।

● ● ●